Downloaded from https:// www.studiestoday.com

# संस्कृतम्

# आह्लादः

## एकादशी कक्षा




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अभ्यास-२११६/(प्र.क्र.४३/१६) एसडी-४ दिनाङ्कः - २५.४.२०१६ इत्यमुं शासननिर्णयक्रमाङ्कम् अनुसृत्य स्थापितायाः समन्वयसमित्याः उपवेशने २०.०६.२०१९ दिने इदं पुस्तकम् २०१९-२० इति शैक्षणिकवर्षतः अनुमानितम्।

### एकादशी कक्षा

# संस्कृतम्

# आह्लादः

(मराठी, गुजराती, हिन्दी, इंग्रजी इत्यादीनां माध्यमानां कृते)

२०१९

महाराष्ट्रराज्य-पाठ्यपुस्तक-निर्मितिः तथा अभ्यासक्रम-संशोधन-मण्डलम्, पुणे-४

A6S1W1

'स्मार्टफोन' इति उपकरणेन 'दीक्षा ॲप' द्वारा पाठ्यपुस्तकस्य प्रथमपृष्ठे योजितेन Q. R. Code माध्यमेन (PDF) पाठ्यपुस्तकं द्रष्टुं शक्यते तथा पाठ्यपुस्तके योजितेन Q. R. Code साहाय्येन दृक्श्रव्य-अध्ययन-अध्यापनसाहित्यम् उपलभ्यते ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रथमावृत्तिः - २०१९** © महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलम्, पुणे - ४११ ००४.
अस्य पुस्तकस्य सर्वे अधिकाराः महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलस्य सन्ति। महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलस्य सञ्चालकस्य लिखित-अनुमतिं विना अस्य पुस्तकस्य कमपि भागम् उद्धृतं कर्तुं न शक्यते।

**संस्कृतभाषातज्ज्ञसमितिः**

पं. गुलाम दस्तगीर बिराजदार (अध्यक्षः)
डॉ. प्रज्ञा देशपाण्डे
श्रीमती तरङ्गिणी खोत
डॉ. प्रसाद भिडे
डॉ. शिवराम भट्ट
डॉ. मञ्जूषा गोखले
श्रीमती सविता अनिल वायळ (सदस्य-सचिव)
श्रीमती संध्या विनय उपासनी (प्र. सदस्य-सचिव)

**संस्कृतभाषाभ्यासगणसदस्याः**

श्रीमती प्राची कुण्टे
डॉ. माधव केळकर
डॉ. लीना हुन्नरगीकर
श्रीमती अदिती माधवन्
डॉ. अरुणा श्यामराज
श्रीमती श्वेता पवनीकर
श्रीमती ऋचा वैद्य
श्री. जगदीश इन्दलकर
डॉ. ओङ्कार जोशी
श्रीमती मुग्धा रिसबुड
श्रीमती मैथिली पोतनीस
डॉ. अजय निलङ्गेकर
डॉ. प्रसादशास्त्री कुलकर्णी
श्री. मकरन्द दामले
श्रीमती पल्लवी जोशी
श्रीमती धनश्री लेले

**निर्मितिः :**

सच्चिदानन्द आफळे, मुख्यनिर्मिति-अधिकारी
राजेन्द्र चिन्दरकर, निर्मिति-अधिकारी
राजेन्द्र पांडलोसकर साहाय्यक- निर्मिति-अधिकारी

**मुख्य समन्वयकः**

श्रीमती प्राची रवींद्र साठे

**प्रकाशकः**

विवेक उत्तम गोसावी

**नियन्त्रकः**

पाठ्यपुस्तकनिर्मितिमण्डलम्, प्रभादेवी, मुम्बई - २५.

**संयोजनम्** : **श्रीमती सविता अनिल वायळ**
विशेषाधिकारी, मराठी
**श्रीमती संध्या विनय उपासनी**
प्र. विशेषाधिकारी, मराठी

**चित्रकारः** : फारुख नदाफ

**मुखपृष्ठम्** : विवेकानंद पाटील

**अक्षरयोजनम्** : भाषाविभागः पाठ्यपुस्तकमण्डलम्, पुणे.

**कागदम्** : 70 GSM Creamwove

**मुद्रणादेशः** : N/PB/2019-20/0.40

**मुद्रकः** : S. P. BINDING WORKS , PUNE

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# भारतस्य संविधानम्

## प्रस्तावना

वयं, भारतस्य जनाः, भारतं सम्पूर्णप्रभुत्वसम्पन्नं, समाजवादिनं, सम्प्रदायनिरपेक्षं, लोकतन्त्रात्मकं गणराज्यं विधातुं, तस्य समस्तान् नागरिकांश्च

सामाजिकम्, आर्थिकं, राजनीतिकं च न्यायं,
विचारस्य, अभिव्यक्तेः, आस्थायाः, धर्मस्य,
उपासनायाश्च स्वतन्त्रतां,
प्रतिष्ठायाः, अवसरस्य च समतां प्रापयितुं;
तेषु सर्वेषु च
व्यक्तिगौरवस्य राष्ट्रस्य एकतायाः,
अखण्डतायाश्च सुनिश्चायिकां बन्धुतां
वर्धयितुं;

कृतदृढसङ्कल्पाः अस्याम् अस्मदीयायां संविधानसभायाम्

अद्य, ख्रिस्तीये १९४९ तमे वर्षे नवम्बरमासस्य २६-तमे दिने (२००६-तमे विक्रमसंवत्सरे मार्गशीर्षे शुक्लपक्षे सप्तम्यां तिथौ) एतेन इदं संविधानम् अङ्गीकृतम्, अधिनियमितम्, आत्मार्पितं च कुर्महे ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## प्रतिज्ञा

भारतो मम देशोऽयं भारतीयाश्च बान्धवा: ।
परानुरक्तिरस्मिन् मे देशेऽस्ति मम सर्वदा ।।१।।

समृद्धा विविधाश्चास्य या देशस्य परम्परा: ।
सन्ति ता: प्रति मे नित्यमभिमानोन्नतं शिर: ।।२।।

प्रयतिष्ये सदा चाहमासादयितुमर्हताम् ।
येन तासां भविष्यामि श्रद्धायुक्त: पदानुग: ।।३।।

सम्मानयेयं पितरौ वयोज्येष्ठान् गुरूंस्तथा ।
सौजन्येनैव वर्तेय तथा सर्वैरहं सदा ।।४।।

स्वकीयेन हि देशेन स्वदेशीयैश्च बान्धवै: ।
एकान्तनिष्ठमाचारं प्रतिजाने हि सर्वथा ।।५।।

एतेषामेव कल्याणे समुत्कर्षे तथैव च ।
नूनं विनिहितं सर्वं सौख्यमात्यन्तिकं मम ।।६।।

## राष्ट्रगीतम्

जनगणमन–अधिनायक जय हे
भारत–भाग्यविधाता ।
पंजाब, सिंधु, गुजरात, मराठा,
द्राविड, उत्कल, बंग,
विंध्य, हिमाचल, यमुना, गंगा,
उच्छल जलधितरंग,
तव शुभ नामे जागे, तव शुभ आशिस मागे,
गाहे तव जयगाथा,
जनगण मंगलदायक जय हे,
भारत–भाग्यविधाता ।
जय हे, जय हे, जय हे,
जय जय जय जय हे ।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# प्रस्तावना

आत्मीयाः छात्राः,

संस्कृतभाषायाः एकादशकक्षायाः 'संस्कृत-आह्लादः' इत्येतद् नूतनं पाठ्यपुस्तकं युष्मभ्यम् उपाहर्तुं मोदम् अनुभवामः । अस्य पुस्तकस्य संस्कृतमाध्यमम् अस्मत्कृते पूर्वपरिचितम् एव । शालायां यत् संस्कृतभाषाकौशलम् अस्माभिः अधिगतं तस्य पुनःस्मारणेन महाविद्यालये विषयप्रवेशः सुगमः भवेत् ।

अस्मिन् पाठ्यपुस्तके भावमुद्राणां कृते दत्ताः केचन नूतनाः सूचकशब्दाः द्रष्टव्याः । तथैव विशिष्टविषयान् अनुसृत्य सिद्धाः शब्दस्तबकाः यथा खाद्यपदार्थाः, आभूषणानि इत्यादयः अपि अध्येतव्याः । तेन शब्दसम्पद् वर्धेत व्यवहारे संस्कृतभाषायाः प्रयोगः च सुकरः भवेत् । संस्कृतेन चित्रपटवर्णनं वा वृत्तान्तलेखनं वा कर्तुमपि तत्साहाय्यकरं भवेत् । साम्प्रतम् अपि व्यवहारे संस्कृतभाषायाः प्रयोगः भवति, किं बहुना संस्कृतवार्तापत्राणि अपि प्रकाश्यन्ते इत्यस्य प्रमाणम् अस्मिन् पुस्तके उपलभ्यते । अधिगतानां भाषाकौशलानाम् उपयोजनं कथं कर्तव्यं तस्य उदाहरणमेव एतद् । संस्कृतमाध्यमेन वृत्तिलाभाय एषः अपि अन्यतमः मार्गः ।

प्राचीन-भारते नैके शास्त्रग्रन्थाः संस्कृतेन लिखिताः इति तु अस्माभिः पूर्वमेव ज्ञातम् । अस्मिन् पुस्तके आयुर्वेदविषयकं तथा पाकशास्त्रविषयकं पाठ्यद्वयम् अध्येतुं शक्यते । एतौ सुगमौ पाठौ मूलसंस्कृतग्रन्थयोः एव अंशौ । एताभ्यां पाठ्यांशाभ्यां मूलसंस्कृतसंहिताभिः युष्माकं परिचयः भवेत् । तेन संस्कृताध्ययने अग्रिमं सोपानम् आक्रमितुं शक्यते । पुस्तके उद्धृतं गीतामृतमपि अवश्यं पठनीयं मननीयं च । भगवद्गीता इति न तत्त्वज्ञानपरं जडं पद्यं, परं दैनन्दिनजीवने तद् मार्गदर्शकम् इत्यस्य प्रत्ययः अत्र लभ्यते ।

कथाकलशः इति अस्य पाठ्यपुस्तकस्य प्रमुखम् आकर्षणम् । संस्कृतभाषा नाम 'कथा' इति वाङ्मयप्रकारस्य खनिः एव । वेदाद् आरभ्य आधुनिकशतकपर्यन्तं यत् कथावाङ्मयं संस्कृतभाषया निर्मितं निर्मीयते च तस्य रसास्वादेन मनोरञ्जनं भवेत् इत्यत्र नास्ति संशयः । कथानाम् आशये शाश्वतमूल्यानाम् अपि दर्शनं भवति। व्याकरणे तद्धितान्ताः तथा कृदन्ताः एतयोः शब्दप्रकारयोः परिचयः कारितः । तेन भाषायाम् अधिकं कौशलं प्राप्यते । प्रतिपाठं दत्तैः विस्तृतैः भाषाभ्यासैः यद् अधीतं तद् दृढं भवेत् । भाषाविषयकाः उपक्रमाः अपि यद् ज्ञातं तस्य उपयोजने उपकारकाः एव भवेयुः । पाठ्यपुस्तकेन सहैव अस्माकम् अभ्यासमण्डलसदस्यैः अध्ययनार्थम् उपयुक्त-दृक्-श्रव्य-साहित्यं निर्मितम् । तच्च Q. R. Code माध्यमेन योजितम् । छात्रैः अवश्यं तस्य उपयोगः करणीयः । शालायां छात्राणां संस्कृतभाषया सह सुष्ठु-परिचयः जातः, महाविद्यालये सर्वे संस्कृतवाग्विशेषान् अवगच्छन्तु अभिजातसंस्कृतसाहित्यम् आस्वादयन्तु च इति उद्देशेन निर्मितम् इदं पुस्तकं सर्वेषां कृते आह्लादकरं भवेत् इति आशास्महे ।

(डॉ. सुनिल मगर)
सञ्चालकः
महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा
अभ्यासक्रमसंशोधनमण्डलम्, पुणे.

पुणे
दिनाङ्कः - २० जून २०१९,
भारतीयसौर दिनाङ्कः - ३० ज्येष्ठ १९४१

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# संस्कृतम् ।

**एकादशकक्षाच्छात्राणां संस्कृतभाषाविषये अध्ययननिष्पत्तिः ।**

| क्षेत्रम् | अध्ययननिष्पत्तिः |
|---|---|
| श्रवणम् | • संस्कृतमाध्यमेन निर्मितस्य ध्वनिमुद्रणस्य श्रवणं, संस्कृतस्य वर्णोच्चारवैशिष्ट्यानां सम्यक् ग्रहणम् ।<br>• वर्गे संस्कृतभाषया प्रदत्तानां सूचनानां ग्रहणम् ।<br>• संस्कृतसूक्तीनां स्तोत्राणां च श्रवणं ग्रहणं च ।<br>• ध्वनिचित्रमाध्यमेन प्रसारितस्य संस्कृतवार्तापत्रस्य श्रवणम् । |
| भाषणम् | • वर्गे संस्कृतशिक्षकैः सह संस्कृतेन सम्भाषणम् ।<br>• मातृभाषया संवादे संस्कृतसुभाषितानाम् उद्धरणम् ।<br>• संस्कृतभाषया कथाकथनम् । |
| पठनम् | • संस्कृतपाठानाम् उच्चैः पठनम् ।<br>• संस्कृतकाव्यस्तोत्रादीनां पठनम् ।<br>• संस्कृतनियतकालिकानां वाचनम् ।<br>• आधुनिकसंस्कृतकथानां वाचनम् ।<br>• मूलसंस्कृतग्रन्थेभ्यः पाठ्यांशानां पठनम् । |
| लेखनम् | • माध्यमभाषया संस्कृतपाठस्य विस्तृतं विवरणम् ।<br>• माध्यमभाषया संस्कृतकथानां सारांशलेखनम् ।<br>• चित्रपटवर्णनं, वृत्तान्तलेखनम् इत्यादिषु आधुनिकलेखनप्रकारेषु संस्कृतभाषया अभिव्यक्तिः ।<br>• संस्कृतभाषया अन्यभाषासु तथा अन्यभाषाभ्यः संस्कृतभाषायाम् अनुवादः । |
| अध्ययनम् | • द्वैभाषिकशब्दकोषस्य तथा धातुकोषः, अमरकोषः च आदीनां विशेषसंस्कृतकोषाणाम् उपयोगः ।<br>• आन्तरजाले उपलब्धानाम् अध्ययनसाधनानाम् उपयोजनम् ।<br>• चलभाषे उपलब्धानां भाषाभ्यासस्य संसाधनानाम् उपयोजनम् । |
| भाषाभ्यासः | • संस्कृतभाषायां कृदन्ताः तथा तद्धितान्ताः एतेषां रूपाणां परिचयः अवगमनं च ।<br>• संस्कृतकथावाङ्मयस्य कालानुक्रमेण परिचयः ।<br>• संस्कृतभाषायां कालानुसारेण जातानां परिवर्तनानाम् अवगमनम् । |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अनुक्रमणिका

## प्रथममण्डलम्


| | | |
|---|---|---|
| * | सुगमसंस्कृतम् । | |
| | १. भावमुद्राः । | १ |
| | २. सङ्ख्याः । | ३ |
| | ३. समयः । | ४ |
| | ४. व्यावहारिकशब्दस्तबकः । | ६ |
| | ५. भाषासेतुः । | १० |
| * | सङ्कलितभाषाभ्यासः । | २० |


## द्वितीयमण्डलम्


| | | |
|---|---|---|
| १. | संस्कृतेन वृत्तविद्या । | २२ |
| २. | पाकविधानम् । (पद्यम्) | २६ |
| ३. | सूक्तिसौरभः । (पद्यम्) | ३३ |
| ४. | गीतामृतम् । (पद्यम्) | ३८ |
| ५. | अथातो रसजिज्ञासा । | ४३ |
| * | सङ्कलितभाषाभ्यासः । | ४९ |


## तृतीयमण्डलम्


| | | |
|---|---|---|
| * | साहित्यपरिचयः । | ५१ |
| * | कथाविशेषः । | ५६ |
| * | सङ्कलितभाषाभ्यासः । | ५८ |




## चतुर्थमण्डलम्


(कथाकलशः)

| | | |
|---|---|---|
| १. | नीतिपरीक्षा । | ६१ |
| २. | बुद्धिर्बलवती । | ६७ |
| ३. | शरण्यः शिबिः । (पद्यम्) | ७२ |
| ४. | शुकवृत्तान्तः । | ७७ |
| ५. | भेरीदृष्टान्तः । | ८३ |
| ६. | देवेषु सत्यम् असुरेषु अनृतम् । | ८९ |
| * | सङ्कलितभाषाभ्यासः । | ९४ |


## पञ्चममण्डलम्


| | | |
|---|---|---|
| * | लेखनकौशलम् । | ९६ |
| * | सङ्कलितभाषाभ्यासः । | १०० |


## षष्ठमण्डलम्


| | | |
|---|---|---|
| * | परिशिष्टम् । | १०१ ते १२० |
| | १. अपठितगद्यांशः । | |
| | २. नाम-सर्वनाम-रूपाणि । | |
| | ३. क्रियापदरूपाणि-धातुतालिका । | |
| | ४. समासः । | |
| | ५. तद्धितान्ताः । | |
| | ६. कृदन्ताः । | |
| | ७. सन्धिः । | |
| | ८. अमरकोषः । | |
| * | सङ्कलितभाषाभ्यासः । | |


* सूक्तिसौरभः, नीतिपरीक्षा, बुद्धिर्बलवती, शरण्यः शिबिः- सरलार्थाय

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com


# प्रार्थना ।



सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे सञ्जानाना उपासते ।।

समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ।।

(ऋग्वेदः)



मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे ।
मित्रस्य चक्षुषा समीक्षामहे ।।

(यजुर्वेदः)

पश्येम शरदः शतम् ।
जीवेम शरदः शतम् ।
बुध्येम शरदः शतम् ।
पूषेम शरदः शतम् ।

(अथर्ववेदः)



Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com



# १. भावमुद्राः ।




हसनम् ।




कोपनम् ।




निन्दनम् ।



रोदनम् ।



ध्यानम्/चिन्तनम् ।




खेदनम् ।



स्वपनम् ।



क्रीडनम् ।




अनुगमनम् ।




अम्मो ।




लज्जा ।




मौनम् ।



हन्त ।



परिहासः ।



करतलवादनम् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



धावनम् ।




नर्तनम् ।



योगक्रिया ।




तरणम् ।




स्पष्टीकरणम् ।




ईक्षणम् ।



मान्यम् ।



अमान्यम् ।



निर्देशनम् ।



लेखनम् ।




चपेटिका ।




नमनम् ।



साधु ।



स्वस्ति ।



जितम् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# २. सङ्ख्याः ।

पूर्वम् अस्माभिः सङ्ख्यावाचकाः, क्रमवाचकाः आवृत्तिवाचकाः च अभ्यस्ताः। अधुना सङ्ख्यावाचकानां पुनरभ्यासः करणीयः ।

| | | | | |
|---|---|---|---|---|
| १. एकम् | २१. एकविंशतिः | ४१. एकचत्वारिंशत् | ६१. एकषष्टिः | ८१. एकाशीतिः |
| २. द्वे | २२. द्वाविंशतिः | ४२. द्विचत्वारिंशत् | ६२. द्विषष्टिः | ८२. द्व्यशीतिः |
| ३. त्रीणि | २३. त्रयोविंशतिः | ४३. त्रिचत्वारिंशत् | ६३. त्रिषष्टिः | ८३. त्र्यशीतिः |
| ४. चत्वारि | २४. चतुर्विंशतिः | ४४. चतुश्चत्वारिंशत् | ६४. चतुःषष्टिः | ८४. चतुरशीतिः |
| ५. पञ्च | २५. पञ्चविंशतिः | ४५. पञ्चचत्वारिंशत् | ६५. पञ्चषष्टिः | ८५. पञ्चाशीतिः |
| ६. षट् | २६. षड्विंशतिः | ४६. षट्चत्वारिंशत् | ६६. षट्षष्टिः | ८६. षडशीतिः |
| ७. सप्त | २७. सप्तविंशतिः | ४७. सप्तचत्वारिंशत् | ६७. सप्तषष्टिः | ८७. सप्ताशीतिः |
| ८. अष्ट | २८. अष्टाविंशतिः | ४८. अष्टचत्वारिंशत् | ६८. अष्टषष्टिः | ८८. अष्टाशीतिः |
| ९. नव | २९. नवविंशतिः (एकोनत्रिंशत्) | ४९. नवचत्वारिंशत् (एकोनपञ्चाशत्) | ६९. नवषष्टिः (एकोनसप्ततिः) | ८९. नवाशीतिः (एकोननवतिः) |
| १०. दश | ३०. त्रिंशत् | ५०. पञ्चाशत् | ७०. सप्ततिः | ९०. नवतिः |
| ११. एकादश | ३१. एकत्रिंशत् | ५१. एकपञ्चाशत् | ७१. एकसप्ततिः | ९१. एकनवतिः |
| १२. द्वादश | ३२. द्वात्रिंशत् | ५२. द्विपञ्चाशत् | ७२. द्विसप्ततिः | ९२. द्विनवतिः |
| १३. त्रयोदश | ३३. त्रयस्त्रिंशत् | ५३. त्रिपञ्चाशत् | ७३. त्रिसप्ततिः | ९३. त्रिनवतिः |
| १४. चतुर्दश | ३४. चतुस्त्रिंशत् | ५४. चतुष्पञ्चाशत् | ७४. चतुस्सप्ततिः | ९४. चतुर्नवतिः |
| १५. पञ्चदश | ३५. पञ्चत्रिंशत् | ५५. पञ्चपञ्चाशत् | ७५. पञ्चसप्ततिः | ९५. पञ्चनवतिः |
| १६. षोडश | ३६. षट्त्रिंशत् | ५६. षट्पञ्चाशत् | ७६. षट्सप्ततिः | ९६. षण्णवतिः |
| १७. सप्तदश | ३७. सप्तत्रिंशत् | ५७. सप्तपञ्चाशत् | ७७. सप्तसप्ततिः | ९७. सप्तनवतिः |
| १८. अष्टादश | ३८. अष्टात्रिंशत् | ५८. अष्टपञ्चाशत् | ७८. अष्टसप्ततिः | ९८. अष्टनवतिः |
| १९. नवदश (एकोनविंशतिः) | ३९. नवत्रिंशत् (एकोनचत्वारिंशत्) | ५९. नवपञ्चाशत् (एकोनषष्टिः) | ७९. नवसप्ततिः (एकोनाशीतिः) | ९९. नवनवतिः (एकोनशतम्) |
| २०. विंशतिः | ४०. चत्वारिंशत् | ६०. षष्टिः | ८०. अशीतिः | १००. शतम् |

१. अङ्कैः / अक्षरैः योग्यां सङ्ख्यां लिखत ।

| अङ्कैः | अक्षरैः |
|---|---|
| ................ | अष्टपञ्चाशत् |
| १८ | ................ |
| ४५ | ................ |
| ................ | द्वात्रिंशत् |
| ६३ | ................ |

| अङ्कैः | अक्षरैः |
|---|---|
| ................ | षट्सप्ततिः |
| ९९ | ................ |
| ................ | त्रयोदश |
| ................ | पञ्चाशत् |
| ८८ | ................ |



Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com

२. अक्षरैः सङ्ख्यां लिखत ।

| सङ्ख्या | अक्षरैः | सङ्ख्या | अक्षरैः | सङ्ख्या | अक्षरैः |
|---|---|---|---|---|---|
| ११ | | ३० | | २२ | |
| २१ | | ५० | | ४२ | |
| ३१ | | ६० | | ३२ | |
| ४३ | | ७० | | ८० | |
| ३३ | | ८० | | ९६ | |
| ७३ | | ९० | | ८६ | |
| ९३ | | १०० | | ५६ | |
| १९ | | ०४ | | ४४ | |
| २९ | | ०२ | | २४ | |
| ३९ | | ०३ | | ६४ | |

***

## ३. समयः ।






Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१. अङ्कैः / अक्षरैः समयं लिखित्वा तालिकां पूरयत ।

| अङ्कैः | अक्षरैः |
|---|---|
| ७.३० | ................. |
| ................. | द्वादशवादनम् |
| ५.१५ | ................. |
| ................. | दश–अधिक–द्विवादनम् |
| १०.५० | ................. |
| ................. | पादोनद्विवादनम् |
| २.५५ | ................. |
| ................. | पञ्च–अधिक–एकादशवादनम् |

## कः समयः ?

२. मेलनं कुरुत ।

क) 'अ' गणः — 'आ' गणः

| 'अ' गणः | 'आ' गणः |
|---|---|
| ४.१५ | सपादद्विवादनम् |
| ६.३० | पादोनद्विवादनम् |
| १.४५ | पादोनएकवादनम् |
| २.१५ | सपादचतुर्वादनम् |
| १२.४५ | सार्धषड्वादनम् |

ख) 'अ' गणः — 'आ' गणः

| 'अ' गणः | 'आ' गणः |
|---|---|
| विंशति–अधिक– षड्वादनम् | ८.३५ |
| पञ्चत्रिंशत्–अधिक– अष्टवादनम् | ९.०५ |
| पञ्च–अधिक– नववादनम् | ९.५५ |
| पञ्चपञ्चाशत्–अधिक– नववादनम् | ६.२० |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# ४. व्यावहारिकशब्दस्तबकः ।

**सूचना –** तालिकायां कानिचन चित्राणि सन्ति । शिक्षकस्य साहाय्येन छात्रैः तेषां मेलनम् उचितैः शब्दैः करणीयम् ।

## प्रथमः स्तबकः – आहारः ।

ओदनम्
रोटिका
पर्पटः
अवलेहः
व्यञ्जनम्
नवनीतम्
वटकः
जलपूरिका



पानकगोलकम्
सारः
पायसम्
ताम्बूलम्
फलपानीयम्/पानकम्
अपूपः
लड्डुकः
शाकव्यञ्जनम्

## द्वितीयः स्तबकः – भाण्डागारः ।

चालनी
कटाहः
पक्त्रम्
स्थाली
दर्वी
सन्दंशः
वेल्लनी
छुरिका



चषकः
घटः
शूर्पः
पीठम्
समभ्राष्ट्रम्
मथनी
भरणी



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## तृतीयः स्तबकः– वस्त्रालयः ।

अर्धोरुकम्
चोलकः
युतकम्
शाटिका
वेष्टिः
अञ्चलः
उत्तरीयम्
करवस्त्रम्



स्वेदकः
पादकोषः
उष्णीषम्
धौतवस्त्रम्
प्रोञ्छः
निचोलः
राङ्कवम्

## चतुर्थः स्तबकः– कोषागारः ।

धनम्
धनादेशः
आहर्ता
गणकः
स्वदपत्रम्
स्वदयन्त्रम्
न्यासगुप्तिः



मुद्रा
कर्गजधनम्
नाणकम्
परकीयचलनम्
व्यवस्थापकः
लिपिकः
धनाधिकारी



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## पञ्चमः स्तबकः– आभूषणालयः ।

अङ्गुलीयकम्
नासाभरणम्
मुक्ताहारः
हेममाला
केयूरम्
कङ्कणम्



नूपुरम्
कुण्डलम्
मेखला
सीमन्ताभरणम्
चूडामणिः
मुक्ताजालकम्

## षष्ठः स्तबकः– पर्यटनम् ।

यात्रा
यात्रास्यूतः
यात्रापत्रम्
पथिकगृहम्
यात्रिकः/
पर्यटकः
यात्रासूत्रधारः



उपाहारगृहम्
पारपत्रम्
प्रवेशपत्रम्
यात्रा–आस्थापनम्
यात्रामार्गदर्शकः
रेलयानम्
विमानपत्तनम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# सप्तमः स्तबकः– रुग्णालयः ।

चिकित्सालयः
चिकित्सकः
स्पन्दमापिनी
रुग्णवाहिनी
उपचारपट्टिका
तापमापिनी



सूच्यौषधम्
परिचारिका
गुटिका
सम्पुटिका
रुग्णः
औषधम्

## भाषाभ्यासः

**मञ्जूषातः शब्दान् चित्वा उचितस्तम्भे लिखत ।**

| आभूषणालयः | वस्त्रालयः | रुग्णालयः | कोषागारः |
|---|---|---|---|
| .................. | .................. | .................. | .................. |
| .................. | .................. | .................. | .................. |

(उष्णीषम् , केयूरम् , गणकः, मुक्ताहारः, शाटिका, तापमापिनी, नाणकम् , परिचारिका)

**उपक्रमः – निम्नलिखितानां संस्कृतशब्दानां व्यावहारिकान् अर्थान् अवगच्छत ।**

१. **आहारः** – चित्रौदनम्, पयोहिमम्, चिवटिकः, मिष्टपाकः
२. **भाण्डागारः** – रन्ध्रदर्वी, उद्ध्मानम्, करण्डः
३. **वस्त्रालयः** – कटिबन्धः, कर्णरक्षकः, गलपट्टः, हस्तकोषः
४. **कोषागारः** – धनाकर्षः, निवेशः, आवर्तिन्यासः, ऋणम्
५. **आभूषणालयः** – एकावली, अङ्गदम्, वलयम्, शिखाभरणम्
६. **पर्यटनम्** – पर्यावरणयात्रा, सांस्कृतिकयात्रा, साहसयात्रा, निसर्गभ्रमणम्
७. **रुग्णालयः** – चिकित्सा, शल्यकर्म, क्षकिरणचिकित्सा, सूतिकागृहम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# ५. भाषासेतुः । (पुनरवलोकनम् )

**भूमिका –** अष्टमकक्षातः दशमकक्षापर्यन्तं यानि भाषासूत्राणि अद्यावधि पठितानि तानि पुनरेकवारम् अवलोकनीयानि । अभ्यासक्रमः राज्यमण्डलस्य केन्द्रीयमण्डलस्य वा भवेत्; अद्यपर्यन्तं छात्रैः ये संस्कृतभाषाबिन्दवः सामान्यतया पठिताः तेषां पुनःस्मारणम् आवश्यकम् । तथा च दशमकक्षापर्यन्तं यैः छात्रैः संस्कृतं कदापि न पठितं, किन्तु महाविद्यालये संस्कृतं पठितुकामाः, तेषां कृते अपि एषः विभागः संस्कृते सुखप्रवेशाय उपयुक्तः भवेत् । शिक्षकाणां साहाय्येन छात्रैः भाषासेतुः लङ्घनीयः ।

## संस्कृतवर्णमाला ।

### स्वराः

| ह्रस्वाः | दीर्घाः |
|---|---|
| अ | आ |
| इ | ई |
| उ | ऊ |
| ऋ | ॠ |
| ऌ | |
| | ए |
| | ऐ |
| | ओ |
| | औ |

अनुस्वारः – (ं) (स्वराधिष्ठितः)

विसर्गः – (ः) (स्वराधिष्ठितः)

### व्यञ्जनानि

| कठोराणि | | मृदूनि | | | |
|---|---|---|---|---|---|
| क् | ख् | ग् | घ् | ङ् | कण्ठ्याः |
| च् | छ् | ज् | झ् | ञ् | तालव्याः |
| ट् | ठ् | ड् | ढ् | ण् | मूर्धन्याः |
| त् | थ् | द् | ध् | न् | दन्त्याः |
| प् | फ् | ब् | भ् | म् | ओष्ठ्याः |
| य् | र् | ल् | व् | | अन्तस्थाः |
| श् | ष् | स् | ह् | | ऊष्माणः |

### अध्येतव्यानि

क् + ष् + अ = क्ष (क्षेत्रम्)

ज् + ञ् + अ = ज्ञ (ज्ञानम्)

त् + र् + अ = त्र (पत्रम्)

द् + ध् + अ = द्ध (वृद्धः)

द् + भ् + अ = द्भ (उद्भवः)

द् + म् + अ = द्म (पद्म)

द् + य् + अ = द्य (अद्य)

द् + व् + अ = द्व (द्वयम्)

ब् + द् + अ = ब्द (शब्दः)

र् + क् + अ = र्क (अर्कः)

श् + न् +अ = श्न (प्रश्नः)

श् + र् + अ = श्र (श्रवणम्)

श् + व् + अ = श्व (अश्वः)

ह् + न् + अ = ह्न (चिह्नम्)

ह् + म् + अ = ह्म (ब्रह्मा)

ह् + ल् + अ = ह्ल (प्रह्लादः)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

उपक्रमः – अधोनिर्दिष्टान् शब्दान् चलभाषफलके देवनागरीलिप्यां टङ्कयत ।

| | | | | | |
|---|---|---|---|---|---|
| १. सौमित्रः | २. प्रज्ञा | ३. हृदयम् | ४. ह्रीयते | ५. भूषणम् | ६. चञ्चलः |
| ७. क्षमा | ८. ब्रह्म | ९. आह्लादः | १०. विद्या | ११. वृद्धः | १२. अङ्गम् |
| १३. अम्बरम् | १४. कण्टकम् | १५. कैवल्यम् | | | |

**कर्तृपदार्थम् उपयुज्यमानानि सर्वनामानि**

| वचनम् / पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | सः / सा / तद् | तौ / ते / ते | ते / ताः / तानि |
| **मध्यमपुरुषः** | त्वम् | युवाम् | यूयम् |
| **उत्तमपुरुषः** | अहम् | आवाम् | वयम् |

**कर्तृपद–क्रियापदसम्बन्धः । लट् लकारः (वर्तमानकालः)**

| परस्मैपदम् | | | | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| ति<br>सः / सा / तद् | तः<br>तौ / ते / ते | अन्ति<br>ते / ताः / तानि | **प्रथमः** | ते<br>सः / सा / तद् | इते<br>तौ / ते / ते | अन्ते<br>ते / ताः / तानि |
| सि<br>त्वम् | थः<br>युवाम् | थ<br>यूयम् | **मध्यमः** | से<br>त्वम् | इथे<br>युवाम् | ध्वे<br>यूयम् |
| मि<br>अहम् | वः<br>आवाम् | मः<br>वयम् | **उत्तमः** | इ<br>अहम् | वहे<br>आवाम् | महे<br>वयम् |

| परस्मैपदम् | | | | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| सः गच्छति । | तौ गच्छतः । | ते गच्छन्ति । | **प्रथमः** | सः रमते । | तौ रमेते । | ते रमन्ते । |
| त्वं गच्छसि । | युवां गच्छथः। | यूयं गच्छथ । | **मध्यमः** | त्वं रमसे । | युवां रमेथे। | यूयं रमध्वे । |
| अहं गच्छामि। | आवां गच्छावः। | वयं गच्छामः। | **उत्तमः** | अहं रमे । | आवां रमावहे । | वयं रमामहे। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**स्वाध्यायः –** निर्दिष्टान् धातून् प्रयुज्य तालिकां पूरयत । – १. पठ्, २. रुच्–(रोच्)

| पुरुषः \ वचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सः --- । | तौ ---। | ते ---। |
| मध्यमपुरुषः | त्वं --- । | युवां --- । | यूयं ---। |
| उत्तमपुरुषः | अहं --- । | आवां --- । | वयं ---। |

## धात्वभ्यासः।

**क्रियापदस्य सूत्रम् –**

* धातुः + गणविकरणम् + लकारवाचकप्रत्ययः
  यथा – याच् (धातुः) + अ (गणविकरणम् ) + ते (लट् लकारवाचकः प्रत्ययः) = याचते।
* सोपसर्गः धातुः – (धातोः प्राक् उपसर्गः प्रयुज्यते।)
  यथा– वि + ईक्ष् + अ + ते = वीक्षते ।
* लङ्लकारे अडागमः – (धातोः प्राक् 'अ' प्रयुज्यते।)
  यथा– अ + याच् + अ + त (लङ्लकारवाचकः प्रत्ययः) = अयाचत ।
  वि + अ + रम् + अ + त (लङ्लकारवाचकः प्रत्ययः) = व्यरमत ।

| धातूनां समूहः | गणः | विकरणम् | उदाहरणम् (अङ्गम्) | क्रियापदरूपम् |
|---|---|---|---|---|
| प्रथमः | १ | अ | जीव् + अ = जीव | जीवति |
| | ४ | य | नृत् + य = नृत्य | नृत्यति |
| | ६ | अ | लिख् + अ = लिख | लिखति |
| | १० | अय | कथ् + अय = कथय | कथयति |
| द्वितीयः | २ | – | या + = या | याति |
| | ३ | धातोः द्वित्वम् | दा + दा = ददा | ददाति |
| | ५ | नु | शक् + नु = शक्नु | शक्नोति |
| | ७ | न(धातोः वर्णमध्ये विकरणम् ) | भुज् = भुनज् | भुनक्ति |
| | ८ | उ | कृ + उ = कर् | करोति |
| | ९ | ना | ग्रह् + ना = गृह्णा | गृह्णाति |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अधोनिर्दिष्टं संवादं पठित्वा स्वाध्यायं कुरुत ।**

(महाविद्यालये कानिचन मित्राणि वार्तालापं कुर्वन्ति।)

**चिन्मयः** : भोः मित्राणि, अस्माकं महाविद्यालयस्य 'ऊर्जा' नाम महोत्सवः **भवति**। एतं महोत्सवम् अनुभवितुं विविधमहाविद्यालयेभ्यः नैके छात्राः **आगच्छन्ति**। तर्हि महोत्सवस्य सङ्कल्पनां प्रथमं **चिन्तयेम** ।

**पृथा** : का **आसीत्** गतवर्षीया सङ्कल्पना? वयं नूतनाः छात्राः स्मः। अतः न जानीमः अस्मिन् विषये किमपि।

**श्रुतिः** : 'चित्रपटसृष्टिः' इति **आसीत्** गतवर्षीया सङ्कल्पना ।

**वत्सलः** : तस्मात् पूर्वं छात्राः 'बाल्यम् ' एतया सङ्कल्पनया महोत्सवम् **अकुर्वन्** ।

**श्रुतिः** : मम पिता **अवदत्** , अस्य ऊर्जा-महोत्सवस्य यदा प्रथमं वर्षम् आसीत् तदा 'संस्कृतिः' इति सङ्कल्पनाम् अनुसृत्य तदानींतनी समितिः महोत्सवं यशःपथं **निनाय** । तदानीं मम पितामहः छात्रप्रतिनिधिरूपेण कार्यं **चकार** ।

**चिन्मयः** : बहु सम्यक्। तर्हि अस्मिन् वर्षे कः **भवेत्** छात्रप्रतिनिधिः? समितिसदस्यान् अपि **चिनुमः** ।

**पृथा** : अपि अहं सङ्कल्पनां **वदानि** ? अं.....'साहित्यम् '।

**श्रुतिः** : किं भोः! बहु अध्ययनपरः विषयः। वत्सल, त्वं किमर्थं तूष्णीम् **उपविशसि**? **वद** किमपि। तव सङ्कल्पनां **कथय** । रे, सर्वे शान्तं **तिष्ठन्तु** । वत्सलस्य विचारान् **शृण्वन्तु** ।

**वत्सलः** : **अस्ति** एका सङ्कल्पना। किन्तु यूयं मां मूढं **मंस्यध्वे** ।

**चिन्मयः** : हे वयस्य, इदानीं **वदसि** वा **ताडयेयम्** ?

**वत्सलः** : मा...मा **ताडय** ! **वदामि** । ........खाद्यम् ?

**पृथा** : एषः तु नित्यं खाद्यविषये एव **चिन्तयति** ।

**वत्सलः** : **पश्यथ** , अहं पूर्वमेव **अभाषे** खलु यूयं **हसिष्यथ** इति। इतः परं न **वदिष्यामि** ।

**अ) उदाहरणम् अनुसृत्य वर्णयुतानि क्रियापदानि उचिते स्तम्भे लिखत ।**

| लट् | लङ् | विधिलिङ् | लिट् | लृट् | लोट् |
|---|---|---|---|---|---|
| कुर्वन्ति | आसीत् | चिन्तयेम | निनाय | हसिष्यथ | वद |
| | | | | | |
| | | | | | |
| | | | | | |

**आ) निर्दिष्टलकारे वाक्यानि पुनर्लिखत ।**

१. राघवः पुस्तकं --------। (पठ्- लट्)

२. चोरः -------- सुवर्णहारम् । (अप+ हृ - लङ्)

३. मयूराः वर्षाकाले ---------। (नृत्-लट्)

४. सैनिकाः रणाङ्गणे ----------। (युध् - लिट्)

५. कृषकः क्षेत्रं --------। (कृष्-विधिलिङ्)



Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com


**कथां लङ्लकारे परिवर्तयत।**

कश्चन बालकः अस्ति । सः अलसः अस्ति। सः काकं पश्यति। तं क्रीडार्थम् आह्वयति। काकः वदति, 'मम समीपे समयः नास्ति' इति। अनन्तरं सः एकं शुकं पश्यति। बालकः शुकं क्रीडार्थम् आह्वयति । शुकः अपि 'मम समीपे समयः नास्ति' इति वदति। ततः सः एकां पिपीलिकाम् ईक्षते ताम् आह्वयति च। पिपीलिका अपि तथैव ब्रूते। बालकः सर्वं शृणोति। सः लज्जितः भवति। 'सर्वे स्व- स्व-कार्ये निरताः' इति जानाति। आलस्यं त्यजति।

## विभक्तीनाम् उपयोजनम् ।

| | |
|---|---|
| एषः कः ? | एषः तनयः । |
| तनयः किं खादति ? | मोदकं खादति । |
| तनयः मोदकं केन खादति ? | मुखेन खादति । |
| तनयः मोदकं मुखेन किमर्थं खादति ? | क्षुधाशमनाय खादति । |
| तनयः मोदकं मुखेन क्षुधाशमनाय कस्मात् खादति ? | शरावात् खादति । |
| तनयः मोदकं मुखेन क्षुधाशमनाय कस्य शरावात् खादति ? | स्वस्य शरावात् खादति । |
| तनयः मोदकं मुखेन क्षुधाशमनाय स्वस्य शरावात् कुत्र खादति ? | पाकगृहे खादति । |






Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**स्वाध्याय** – उदाहणानि दृष्ट्वा तालिकायाः उपयोगं कृत्वा नूतनवाक्यानि रचयत ।

यथा– १) अमोलः चलति । २) मयूरी मधुरस्वरेण गायति । ३) पुष्पं वृक्षात् पतति ।

| प्रथमा | द्वितीया | तृतीया | चतुर्थी | पञ्चमी | षष्ठी | सप्तमी | क्रियापदम् |
|---|---|---|---|---|---|---|---|
| कर्ता | कर्म | करणम् | सम्प्रदानम् | अपादानम् | – | अधिकरणम् | |
| राजा | लड्डुकं | वेल्लन्या | कवये | यानात् | स्वस्य | गृहे | खादति । |
| सिंहः | पोलिकां | चषकेण | सेवकाय | कलहात् | परस्य | स्थानके | पिबति । |
| शिशुः | दुग्धं | वर्णलेखन्या | मनोरञ्जनाय | वृक्षात् | मित्रस्य | उत्सवे | चिनोति । |
| माता | चित्रं | मुखेन | | वित्तकोषात् | सूर्यस्य | महाविद्यालये | वेल्लति । |
| तन्मयः | धनं | मधुरस्वरेण | | रथात् | छात्रस्य | उद्याने | विरमति । |
| चित्रकारः | पुस्तकं | हस्तेन | | तडागात् | नाटकस्य | मार्गे | पश्यति । |
| यात्रिकः | पारितोषिकं | शकटेन | | | शशकस्य | ग्रन्थालये | लिखति । |
| छात्रा | शाकं | | | | | अरण्ये | करोति । |
| लेखकः | कुसुमानि | | | | | मन्दिरे | पूजयति । |
| अर्चकः | जलं | | | | | | यच्छति। |
| अमोलः | गीतं | | | | | | शृणोति । |
| मयूरी | | | | | | | गायति । |
| शिक्षकः | | | | | | | पठति । |
| | | | | | | | आलिखति। |
| | | | | | | | अवतरति । |
| | | | | | | | नृत्यति । |
| | | | | | | | पचति । |
| | | | | | | | आनयति । |

## विशेषण – विशेष्यसम्बन्धः ।

**अत्र कथायां कानिचन विशेषण–विशेष्ययुग्मानि अधोरेखितानि सन्ति । एतादृशानि अन्यानि युग्मानि संशोध्य अधोरेखनं कुरुत ।**

नदीषु पवित्रा गङ्गा । तस्याः निर्मले तीरे कोऽपि साधुः अस्ति । परोपकारी साधुः लोककल्याणमग्नः सर्वदा । एकस्मिन् दिने सः स्नानाय नदीं गच्छति। नदीप्रवाहे एकः भयङ्करः वृश्चिकः अस्ति । तस्य पुच्छं विषपूर्णम् । सः साधुः तं वृश्चिकं पश्यति । तं मृदुना हस्तेन गृह्णाति । तीरे स्थापयितुं च प्रयतते । किन्तु सः साधोः अनावृतं हस्तं दशति । साधुः तं त्यजति । वृश्चिकः साधोः हस्तात् विमले जले पतति । पुनः साधुः दंशकरं वृश्चिकं गृहीत्वा तीरे स्थापयितुं प्रयतते । पुनः वृश्चिकः तं दशति । एवं नैकवारं साधुः वृश्चिकं गृह्णाति । वृश्चिकः अपि दशति ।

नदीतीरे कश्चन पुरुषः अस्ति । सः वदति, ‘‘साधुमहाराज । अयं वृश्चिकः विषयुक्तः। सः पुनः पुनः दशति। भवान् किमर्थम् एतादृशं वृश्चिकं गृह्णाति?’’



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

साधुः वदति, ''वृश्चिकः तु क्षुद्रः जन्तुः। दंशः एव तस्य स्वाभाविकी वृत्तिः। सः स्वस्य स्वभावं न त्यजति। अहं तु मनुष्यः । अहं परोपकारी मम स्वभावं कथं त्यजामि? यः अपकारिणम् अपि उपकारं करोति सः एव साधुः भवति।

## धातुसाधितानि अव्ययानि ।

### पूर्वकालवाचकं (क्त्वा/ल्यप्) तथा हेत्वर्थकं (तुमुन्)

| क्त्वा-प्रत्ययान्ताः | ल्यप्-प्रत्ययान्ताः | तुमुन्-प्रत्ययान्ताः |
|---|---|---|
| **स्पष्टीकरणम्** | | |
| समानः कर्ता ।<br>एकाधिकाः क्रियाः ।<br>अन्तिमां क्रियां वर्जयित्वा<br>उपसर्गरहिताः पूर्वक्रिया-सूचकाः<br>धातवः क्त्वा-प्रत्ययान्ताः।<br>ताः कालस्य पूर्वतां सूचयन्ति। | समानः कर्ता ।<br>एकाधिकाः क्रियाः ।<br>अन्तिमां क्रियां वर्जयित्वा<br>उपसर्गसहिताः पूर्वक्रिया-सूचकाः<br>धातवः ल्यप्-प्रत्ययान्ताः।<br>ताः कालस्य पूर्वतां सूचयन्ति। | समानः कर्ता ।<br>एकाधिकाः क्रियाः ।<br>हेतुक्रियासूचकाः धातवः<br>तुमुन्-प्रत्ययान्ताः । |
| **उदाहरणम्** | | |
| मन्दारः प्रातः जागरितः **भूत्वा** मुखमार्जनं **कृत्वा** देवं **नत्वा** अध्ययनं करोति। | मन्दारः प्रातः **उत्थाय** मुखमार्जनं कृत्वा देवं **प्रणम्य** अध्ययनं करोति। | मन्दारः अध्ययनं **कर्तुं** प्रातः उत्तिष्ठति। |

### स्वाध्यायः

**अ) कथां पठित्वा क्त्वा/ल्यप्/तुमुन्- प्रत्ययान्तानि अव्ययानि चित्वा लिखत।**

(श्रीधरः, अमेरिका, सम्भाषणसन्देशः डिसेम्बर् २०१५)

कश्चन बालकः स्वस्य प्रकोष्ठे शयने सुप्तः। तदा कश्चन चोरः वातायनम् उद्घाट्य प्रकोष्ठस्य अन्तः आगच्छत्।
बालकः आगतं चोरं दृष्ट्वा अपृच्छत्, ''भोः, भवान् कः? किं कर्तुं रात्रौ मम प्रकोष्ठं प्रविष्टः?'' इति ।
तदा चोरः अवदत्, ''अहं निर्दयः चोरः। एतस्मिन् गृहे यानि वस्तूनि सन्ति तानि सर्वाणि चोरयितुम् अहम् आगतः'' इति।
बालकः अपृच्छत्, ''अपि चौर्यं न करणीयम् इति भवतः माता भवन्तं न बोधितवती?'' इति ।
तत् श्रुत्वा क्रुद्धः चोरः प्रत्यवदत्, ''अलं जल्पनेन । अपरिचितेन सह सम्भाषणं मा कुरु इति तव माता न उक्तवती? तूष्णीं शयनं कुरु । अहं सर्वाणि वस्तूनि शीघ्रमेव गृहीत्वा पलायनं करिष्यामि'' इति ।
''एवं कर्तुम् अहम् अवसरं न ददामि । भवान् चौर्यं कर्तुम् इच्छति चेत् आदौ मां रज्ज्वा बध्नीयात्'' इति धैर्येण अवदत् बालकः। तदा चोरः हसित्वा अवदत्, ''अरे मूर्ख! रज्ज्वा बन्धनं लीला-कार्यं मम। अहं क्षणाभ्यन्तरे एव त्वां बध्नामि'' इति उक्त्वा रज्जुम् उपयुज्य बालकम् अबध्नात् । परन्तु बालकः क्षणाभ्यन्तरे एव बन्धनात् आत्मानम् अमोचयत् । एतत् दृष्ट्वा चकितः चोरः पुनरेकवारं बालकम् अबध्नात् । बालकः पुनरपि विना श्रमेण बन्धनात् आत्मानम् अमोचयत् ।
ततः बालकः परिहासस्वरेण अवदत्,- ''अयि भोः! कीदृशः चोरः भवान्? असहायकं माम् अपि दृढं बन्द्धुं



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

यत् न शक्नोषि! अहं दर्शयामि यत् कथं बन्धनं करणीयम्'' इति ।
चोरेण एतत् अङ्गीकृतम् । ततः बालकः चोरस्य पादौ हस्तौ ग्रीवां च बद्ध्वा अवदत्,- ''इदानीं भवान् बन्धनात् विमोक्तुं न अर्हति'' इति । चोरः बहुधा प्रयासम् अकरोत् परन्तु ग्रन्थीनां शिथिलीकरणे सः असमर्थः अभवत् । ततः सः अवदत्, ''इदानीं मया अवगतं यत् कथं रज्ज्वा बन्धनं करणीयम् इति। शीघ्रमेव मां मुञ्च'' इति ।

**आ) यथानिर्दिष्टं कोष्ठगतानां धातूनां तुमुन्/क्त्वा/ल्यप्-प्रत्ययान्तानि अव्ययानि उपयोजयत।**

१. मूषकः लड्डुकं ............. पाकगृहम् आगतः । (चुर्- तुमुन्)
२. विनोदकणिकां ............ सर्वे जनाः व्यहसन् । (श्रु- क्त्वा)
३. सुमधुरं स्वरम् ............ सर्वे प्रेक्षकाः मन्त्रमुग्धाः जाताः । (आ + कर्ण् - ल्यप्)

**इ) क्त्वा/ल्यप्-प्रत्ययान्तानि निष्कास्य वाक्यानि पुनर्लिखत ।**

१. नृत्याङ्गना गुरुं प्रणम्य नृत्यारम्भं करोति ।
२. लगुडं वीक्ष्य मार्जारः पलायते ।
३. सा माता श्रमं कृत्वा पुत्रम् अपालयत् ।
४. चित्रकारः चित्रम् आलिख्य प्रसन्नः अभवत् ।
५. मर्कटस्य लीलाः पुनः पुनः स्मृत्वा शिशुः हसति ।

**उ) क्त्वा/ल्यप् प्रत्ययान्तानि प्रयुज्य वाक्यानि पुनर्लिखत।**

१. अलसाः जनाः खादन्ति । आसने उपविशन्ति ।
२. शिष्यः भूमौ उपविशति। ततः स्वाध्यायं करोति ।
३. सज्जनाः प्रथमं स्वयं कुर्वन्ति । ततः उपदिशन्ति ।
४. छात्रः पाठं पठति । स्वाध्यायं करोति ।

## वाच्यपरिवर्तनम् ।

| | कर्ता | कर्म | क्रियापदम् |
|---|---|---|---|
| **कर्तृवाच्यम्** | **प्रथमा** | **द्वितीया** | कर्तृपदम् अनुसृत्य (धातुः + स्वस्य गणविकरणम् + स्वपदप्रत्ययः अथवा धातु: +क्तवतुप्रत्ययः ।) |
| **कर्मवाच्यम्** | **तृतीया** | **प्रथमा** | कर्मपदम् अनुसृत्य (धातुः + य + आत्मनेपदस्य प्रत्ययः अथवा धातु: + क्तप्रत्यय:/कृत्यप्रत्यय: ।) |
| **भाववाच्यम्** | **तृतीया** | -- | (अकर्मकधातुः + य + आत्मनेपदस्य प्रथमपुरुष-एकवचनस्य प्रत्यय:) |

## स्वाध्यायः

**तालिकायाः साहाय्येन वाच्यपरिवर्तनं कुरुत । (प्रयोगपरिवर्तनं कुरुत।)**

१. बालकः कन्दुकेन खेलति ।
२. भल्लूकाः उच्चैः क्रन्दन्ति ।
३. एषः प्रसङ्गः मया पुनः पुनः स्मर्यते।
४. चित्रपटगृहे जनैः प्रविश्यते ।
५. राजा मौक्तिकमालां कवये दत्तवान् ।
६. ललनया मुक्तामाला धार्यते ।
७. सैनिकः युध्यते ।
८. छात्राः ग्रन्थम् अपठन् ।
९. छात्रैः गुरोः आज्ञा परिपालनीया ।
१०. बालिका लेखनीं क्रीणाति ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## समासाः ।

### स्वाध्यायः

**रेखाङ्कितानि पदानि आधृत्य समासानां तालिकां पूरयत ।**

अस्ति एकस्मिन् नगरे **धनसम्पन्नः** एकः पुरुषः। स केनापि **अज्ञातेन** रोगेण पीडितः आसीत् । **नैके** वैद्याः **औषधोपचारान्** कृतवन्तः, किन्तु सः धनिकः न **रोगमुक्तः** । **प्रतिदिनं** तस्य रोगः वर्धमानः एव । **मरणभयात्** सः अतीव **चिन्तातुरः** । अतः सः अचिन्तयत्, ''**जननमरणे** कस्यापि वशे न स्तः। किन्तु रोगात् मुक्तिः तु प्राप्तव्या एव । **रोगमोचनार्थं** कं **शरणं गच्छामि**?'' किञ्चित् चिन्तयित्वा सः **धनिकपुरुषः** साधुम् एकम् अभ्यगच्छत् । सः साधुम् अपृच्छत्, ''कदा वीतरोगः भवामि अहम्?'' इति । साधुः **निमीलितनयनः** एव किञ्चित् विस्मित्य उक्तवान्, ''भोः, यदा **सन्तुष्टजनस्य** युतकम् आनयसि, स्वयं च परिधारयसि तदा एव त्वं सुखी भविष्यसि'' इति ।

'साधुः **उपायज्ञः** अस्ति' इति चिन्तयित्वा सः तादृशं युतकम् अन्वेष्टुं प्रस्थितः। सप्ताहं यावत् स इतस्ततः अभ्रमत् । किन्तु यं यं पृच्छति स्म, ''अपि सन्तुष्टः भवान्?'' इति, प्रत्येकं जनः तं वदति स्म, ''न हि न हि रे! अहं **न सन्तुष्टः**'' इति । निराशः भूत्वा सः पुनः साधुं प्रति आगन्तुं प्रस्थितः । मार्गे सः नृत्यन्तं, गायन्तम्, **आत्मनि मग्नम्** एकं मनुष्यम् अपश्यत् । सः तम् अपृच्छत्, ''अपि सन्तुष्टः भवान्?'' इति । सः अवदत्, ''अथ किम् ? अतीव सन्तुष्टः अहम् । **यथाशक्ति** श्रमं करोमि, **यथाश्रमं** धनं प्राप्नोमि, कदाचित् ओदनम् अश्नामि, कदाचित् **कन्दमूलफलानि** अपि खादामि। **आकण्ठं** जलपानं करोमि। रात्रौ **कृतकृत्यः** भवामि, सुखेन निद्रामि च ।'' एतत् श्रुत्वा धनिकः **सानन्दं** तम् अवदत्, यदि एवं, तर्हि देहि मह्यं तव युतकम् इति । सः पुरुषः अवदत्, ''मम समीपे युतकम् एव नास्ति'', इति । **खिन्नवदनः** धनिकः **सखेदं** साधुं प्रति आगतवान्।

साधुः **ध्यानमग्नः** आसीत्। धनिकः तं पृष्टवान्, ''साधुवर! अहं सर्वत्र अगच्छम् । किन्तु **न लब्धं** सन्तुष्टजनस्य युतकम् । येषां समीपे युतकानि आसन् ते **न सन्तुष्टाः**, यः च सन्तुष्टः, तस्य समीपे युतकम् एव नासीत्। अधुना किं कर्तव्यम् ?'' इति। साधुः **सस्मितम्** अवदत्, ''भद्र, चिन्तयतु एकवारं, एतावन्ति दिनानि यावत् त्वं **स्वस्य रोगस्य** विषये किमपि चिन्तितवान् वा? अपि स्मरणं जातं स्वस्य रोगस्य? त्वं गृहे एव तिष्ठसि प्रत्यहम् । अतः तव रोगः न शारीरिकः । **चिन्ता एव रोगः** तव । अतः चिन्ता न करणीया ।'' इति उक्त्वा साधुः **तत्स्थानात्** निर्गतः।

### कृतिः

| सामासिकशब्दः | समासविग्रहः | समासनाम |
|---|---|---|
| प्रत्यहम् | अहनि अहनि | अव्ययीभावः |
| ...................... | आत्मनि मग्नम् | सप्तमीतत्पुरुषः |
| असन्तुष्टाः | न सन्तुष्टाः | .................. |
| ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## धातुसाधित-विशेषणानि ।

| धातुसाधितम् | पाणिनीयसंज्ञा | प्रत्ययः | उदाहरणम् | विशेषणरूपम् |
|---|---|---|---|---|
| **कर्मणि भूतकालवाचकम्** | क्त | त / इत | या + त | यात= यातः, याता, यातम् |
| | | | पत् + इत | पतित = पतितः, पतिता, पतितम् |
| **कर्तरि भूतकालवाचकम्** | क्तवतु | तवत् / इतवत् | मुच् +तवत् | मुक्तवत् = मुक्तवान्, मुक्तवती, मुक्तवत् |
| | | | पत् + इतवत् | पतितवत् = पतितवान्, पतितवती, पतितवत् |
| **कर्तरि वर्तमानकालवाचकम्** | शतृ/ शानच् | परस्मैपदम् - अत् | गम् (गच्छ) + अत् | गच्छत् = गच्छन्, गच्छन्ती, गच्छत् |
| | | आत्मनेपदम् (१,४.६,१०)-मान | वृत् (वर्त) + मान | वर्तमान = वर्तमानः, वर्तमाना, वर्तमानम् |
| | | आत्मनेपदम् (शेषाः गणाः) -आन | दा + आन | ददान = ददानः, ददाना, ददानम् |
| **कर्मणि वर्तमानकालवाचकम्** | शानच् | य + मान | लभ् + य + मान | लभ्यमान= लभ्यमानः लभ्यमाना, लभ्यमानम् |
| **कर्मणि विध्यर्थी** | कृत्य | य | कृ - कर् + य | कार्य= कार्यः, कार्या, कार्यम् |
| | | तव्य | कृ - कर् + तव्य | कर्तव्य-कर्तव्यः, कर्तव्या, कर्तव्यम् |
| | | अनीय | कृ - कर् + अनीय | करणीय-करणीयः, करणीया, करणीयम् |

अष्टादश (१८) पृष्ठक्रमाङ्के कथायां धातुसाधित-विशेषणानि अधोरेखितानि कुरुत ।



Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com



प्रथममण्डलम् ।

# सङ्कलितभाषाभ्यासः -१

## अभ्यासः–१

१. चित्रं दृष्ट्वा भावमुद्रानामानि लिखत ।



२. अङ्कैः / अक्षरैः योग्यम् उत्तरं लिखत ।

१) अष्टात्रिंशत्   २) पञ्चाशत्   ३) १९   ४) ८०

३. समयमेलनं कुरुत ।

| | |
|---|---|
| १) पञ्चवादनम् | १) ८.४५ |
| २) सपाद-दशवादनम् | २) ४.३० |
| ३) पादोन-नववादनम् | ३) ५.०० |
| ४) सार्ध-चतुर्वादनम् | ४) १०.१५ |

४. व्यावहारिकशब्दस्तबकः ।

| आहारः | वस्त्रालयः | आभूषणालयः |
|---|---|---|
| ........ | ........ | ........ |
| ........ | ........ | ........ |





(मञ्जूषा- मथनी, मुक्ताहारः, चोलकः, ओदनम्, गणकः, स्वेदकम्, कङ्कणम्, अवलेहः)

५. वर्णानुक्रमेण शब्दान् योजयत ।

| | |
|---|---|
| १) यानम् | ४) लघुः |
| २) रेखा | ५) समयः |
| ३) अरण्यम् | ६) शारदा |

## अभ्यासः–२

१. चित्रं दृष्ट्वा भावमुद्रानामानि लिखत ।

२. अङ्कैः / अक्षरैः योग्यम् उत्तरं लिखत ।

१) अष्टाविंशतिः   २) सप्ततिः   ३) ३९   ४) ९५



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३. **समयमेलनं कुरुत ।**

| | |
|---|---|
| १) सपाद-एकादशवादनम् | १) ५.४५ |
| २) सार्धसप्तवादनम् | २) ८.०० |
| ३) अष्टवादनम् | ३) ११.१५ |
| ४) पादोन-षड्वादनम् | ४) ७.३० |

४. **व्यावहारिकशब्दस्तबकः ।**

| आभूषणालयः | रुग्णालयः | कोषागारः |
|---|---|---|
| ........ | ........ | ........ |
| ........ | ........ | ........ |




(मञ्जूषा- पारपत्रम्, मेखला, धनादेशः, तापमापिनी, अङ्गुलीयकम्, उत्तरीयम्, नाणकम्, गुटिका)

५. **वर्णानुक्रमेण शब्दान् योजयत ।**

१) कादम्बरी  २) दण्डी  ३) औषधम्  ४) उत्सवः  ५) गणेशः  ६) धीवरः

## अभ्यासः-३

१. **चित्रं दृष्ट्वा भावमुद्रानामानि लिखत ।**

२. **अङ्कैः / अक्षरैः योग्यम् उत्तरं लिखत ।**

१) पञ्चविंशतिः  २) षट्षष्टिः  ३) ५४  ४) ७७

३. **समयमेलनं कुरुत ।**

| | |
|---|---|
| १) सपादद्विवादनम् | १) ०१.०० |
| २) सार्धद्वादशवादनम् | २) २.१५ |
| ३) एकवादनम् | ३) २.४५ |
| ४) पादोन-त्रिवादनम् | ४) १२.३० |

४. **व्यावहारिकशब्दस्तबकः ।**

| भाण्डागारः | कोषागारः | पर्यटनम् |
|---|---|---|
| ........ | ........ | ........ |
| ........ | ........ | ........ |

(मञ्जूषा- धनाधिकारी, वल्लनी, पर्यटकः, चूडामणिः, कटाहः, व्यवस्थापकः, प्रवेशपत्रम्, रुग्णः)

५. **वर्णानुक्रमेण शब्दान् योजयत ।**

१) हस्ती  २) पयः  ३) अक्षयः  ४) भवानी  ५) कनकम्  ६) खद्योतः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



# संस्कृतेन वृत्तविद्या ।

**भूमिका –** वृत्तविद्या नाम पत्रकारिता । संस्कृतपत्रकारिता इति क्षेत्रमपि सुप्रतिष्ठितमस्ति अधुना । जनतन्त्रस्य मुख्यः स्तम्भः नाम वृत्तपत्रम् इति उच्यते। संस्कृतज्ज्ञानां कृते अपि वृत्तेः एषः विस्तृतः अवकाशः उद्घाटितः । दृग्माध्यमं, श्रव्यमाध्यमं, दृक्श्रव्यमाध्यमं तथैव समाजमाध्यमम् एतेषु क्षेत्रेषु अवसराः अद्य उपलब्धाः । निर्मितिः (Production), सञ्चालनम् (Direction), विज्ञापनक्षेत्रम् (Advertising), संरचनाशास्त्रम् (Designing) इत्यादिषु क्षेत्रेषु बहवः जनाः अद्य उद्योगरताः ।

दैनिकपत्रात् वार्षिकपत्रिकापर्यन्तं नैकानि नियतकालिकानि संस्कृतभाषया सम्प्रति प्रकाश्यन्ते । तेषु वार्षिकवृत्तपत्रस्य अभिरूपम् अपि पुस्तके प्रदर्शितम् ।

पत्रकारिता नाम आधुनिकसमाजस्य एकम् अविभाज्यम् अङ्गम् । वार्ताप्रसारणस्य कृते पत्रकारिता इति महत्त्वपूर्णं माध्यमम् । सूचनातन्त्रज्ञानक्षेत्रे पत्रकारिता विशिष्टं महत्त्वं भजते । सर्वासु भाषासु इव संस्कृतभाषायामपि पत्रकारिता भृशं विकसिता दृश्यते । संस्कृतपत्रिकायाः आरम्भः जूनमासस्य प्रथमे दिने षट्षडष्टैकतमे ख्रिस्ताब्दे (१ जून १८६६) काशीक्षेत्रे अभवत्। 'काशी विद्यासुधानिधिः' इत्येषा सा पत्रिका। तदनन्तरं संस्कृतवृत्तपत्रिकाणां सङ्ख्या सवेगं वृद्धिं गता। अधुना भारतवर्षे उपद्विशतमिताः संस्कृतपत्रिकाः नियमिततया प्रकाश्यन्ते । तासु दैनिकं, साप्ताहिकं, पाक्षिकं, मासिकं, द्वैमासिकं, त्रैमासिकं, षाण्मासिकं, वार्षिकं तथा विशेषाङ्कः इत्यादयः प्रकाराः अन्तर्भूताः। संस्कृतभाषायाः प्रसारः इत्यपि एतासां पत्रिकाणाम् उद्दिष्टम् । जनाः संस्कृतं पठितुम् उत्सुकाः भवन्तु इति धिया एतासु पत्रिकासु सरलसंस्कृतेन वार्ताः, लेखाः, काव्यानि, कथाश्च समाविष्टाः सन्ति । चन्दमामा इति मासिकपत्रिका बालकानां ज्येष्ठानां च चेतांसि आकर्षयति स्म । इदानीं **गुञ्जारवः, संस्कृतभवितव्यम्, गीर्वाणसुधा, भारती, सम्भाषणसन्देशः, समर्पणम्** इत्यादीनि नियतकालिकानि संस्कृतप्रचारप्रसारकार्यरतानि । **'सुधर्मा'** तथैव **'विश्वस्य वृत्तान्तः'** एते संस्कृतदैनिके अद्यापि संस्कृतमाध्यमेन वार्ताङ्कनं कुरुतः इति अत्र विशेषः ।

जूनमासस्य त्रिंशत्तमे दिने चतुःसप्तनवैकतमे ख्रिस्ताब्दे (३० जून १९७४) अस्माकं केन्द्रशासनेन आकाशवाण्यां प्रातः नववादने संस्कृतवार्तापत्रस्य प्रसारणम् आरब्धम् । संस्कृतपत्रकारिताक्षेत्रे एतद् महत्त्वपूर्णं पदमासीत्। तदनन्तरम् अचिरादेव सन्ध्यासमये दशाधिकषड्वादने द्वितीयं संस्कृतवार्तापत्रमपि आरब्धम् । वृत्तनिवेदकः बलदेवानन्दसागरः निवेदनकौशलेन प्राप्तख्यातिः ।

संस्कृतमाध्यमेन पत्रकारिता शनैः शनैः प्रगतिपथम् अगच्छत् । ऑगस्टमासस्य एकविंशतितमे दिने चतुर्नवनवैकतमे ख्रिस्ताब्दे (२१ ऑगस्ट १९९४) दूरदर्शनेन साप्ताहिकं संस्कृतवार्तापत्रं प्रसारितम्। साम्प्रतं दूरदर्शनद्वारा प्रतिसप्ताहं प्रसार्यमाणः 'वार्तावलिः' इति कार्यक्रमः विशेषोल्लेखनीयः। तस्य आशयवैविध्यं रोचकं प्रस्तुतीकरणं च प्रेक्षकान् रञ्जयतः ।

एवं संस्कृतमाध्यमेन पत्रकारितायाः मार्गक्रमणं लक्षणीयम् । संस्कृतभाषा न केवलं पुराणकथाविषये सीमिता अपि तु आधुनिककाले प्रचलिताः सर्वे विषयाः संस्कृतभाषया वर्णयितुं शक्याः। अतः नैके जनाः संस्कृतपत्रकारितया संस्कृतं प्रति आकृष्टाः । संस्कृतेन पत्रकारितां युवकाः वृत्तिरूपेण अपि स्वीकर्तुं शक्नुवन्ति इति विचारेण भारतीय-जनसञ्चार-संस्था (IIMC) द्वारा संस्कृत-पत्रकारिता-अभ्यासक्रमः अपि आरब्धः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आधुनिकसमाजमाध्यमेषु अपि संस्कृतस्य उपयोजनं बहुशः दृश्यते । तत्कृते संस्कृतज्ञानस्य आवश्यकता वर्तते । अतः संस्कृतज्ञानां युवकानां कृते विस्तृतं कार्यक्षेत्रम् उपलब्धमस्ति इति ।

## शब्दार्थः ।

१) प्राप्तख्यातिः – प्रसिद्धः ।
२) भृशम् – बहु ।
३) पदक्षेपः – प्रवेशः ।

## समासविग्रहः ।

१) सवेगम् – वेगेन सह । अव्ययीभावः ।
२) प्राप्तख्यातिः – प्राप्ता ख्यातिः येन सः । बहुव्रीहिः ।
३) अचिरात् – न चिरात् । नञ्तत्पुरुषः ।
४) प्रतिसप्ताहम् – सप्ताहं सप्ताहं प्रति । अव्ययीभावः ।

## रूपपरिचयः ।

१) इयम् – इदम्, सर्वनाम, स्त्रीलिङ्गम् , प्रथमा, एकवचनम् ।
२) प्रकाशन्ते – प्र + काश् (१ आ.प.), लट् , प्रथमपुरुषः, बहुवचनम् ।
३) आरब्धम् – आ + रभ् (१ आ.प.), क्तप्रत्ययान्तं विशेषणम् , नपुंसकलिङ्गम् , प्रथमा, एकवचनम् ।
४) स्वीकर्तुम् – स्वी + कृ (८ उ.प.), च्विरूपम् , हेत्वर्थक-तुमन्त-अव्ययम् ।

## भाषाभ्यासः ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) संस्कृतभाषायाः प्रसारः इत्यपि एतासां पत्रिकाणाम् उद्दिष्टम् ।
२) आधुनिकसमाजमाध्यमेषु अपि संस्कृतस्य उपयोजनं बहुशः दृश्यते ।

**२. पूर्णवाक्येन उत्तरत ।**

१) संस्कृतपत्रिकायाः आरम्भः कुत्र अभवत् ?
२) का प्रथमा संस्कृतपत्रिका ?
३) कः विख्यातः संस्कृतवृत्तनिवेदकः ?
४) कया संस्थया संस्कृत-पत्रकारिता-अभ्यासक्रमः आरब्धः ?
५) किं संस्कृतमासिकं बालकानां ज्येष्ठानां च प्रियम् ?

**३. समानार्थकशब्दान् लिखत ।**

भारतवर्षः, धीः, साम्प्रतम् , वैविध्यम् , सीमिता, आकृष्टाः, युवकाः, बालकाः

**४. विरुद्धार्थकशब्दान् लिखत ।**

अविभाज्यम् , आधुनिकम् , भृशम् , विकसिता, वृद्धिः, सीमिता



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ५. विशेषण–विशेष्याणां मेलनं कुरुत ।

| अ | आ |
|---|---|
| १) महत्त्वपूर्णम् | विषयाः । |
| २) अविभाज्यम् | प्रसारणम् । |
| ३) साप्ताहिकम् | अङ्गम् । |
| ४) प्रचलिताः | कार्यक्षेत्रम् । |
| ५) विस्तृतम् | माध्यमम् । |

## ६. सूचनानुसारं परिवर्तनं कुरुत ।

१) सूचनातन्त्रज्ञानक्षेत्रे पत्रकारिता विशिष्टं महत्त्वं भजते । (क्रियापदं विधिलिङ्लकारे परिवर्तयत।)

२) चन्दमामा इति मासिकं बालकानां चेतांसि आकर्षयति स्म । ('स्म' निष्कास्य वाक्यं पुनर्लिखत ।)

३) एते संस्कृतदैनिके संस्कृतमाध्यमेन वार्ताङ्कनं कुरुतः । (क्रियापदं बहुवचने परिवर्तयत ।)

४) केन्द्रशासनेन आकाशवाण्यां संस्कृतवार्तापत्रस्य प्रसारणम् आरब्धम् । (वाच्यपरिवर्तनं कुरुत।)

## ७. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

१) संस्कृतपत्रिकायाः आरम्भः काशीक्षेत्रे अभवत् (तद्)

२) संस्कृतभाषा केवलं पुराणकथाविषये न सीमिता । (तद्)

३) सर्वे विषयाः संस्कृतभाषया वर्णयितुं शक्याः । (तद्)


४) तासु दैनिकं, वार्षिकम् इत्यादयः प्रकाराः अन्तर्भूताः । (पत्रिका)

५) तस्य आशयवैविध्यं प्रेक्षकान् रञ्जयति । (कार्यक्रम)

## ८. पृथक्करणम् ।

**जालरेखाचित्रं पूरयत ।**

१)




२)







Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३)




उपक्रमः – संस्कृतनियतकालिकं, संस्कृत-अनुप्रयोगः (app), संस्कृत-युट्युब प्रसारणम् एतेषु कस्यापि एकस्य विस्तृतं परिचयं लिखत ।

***

## कथारञ्जनी

कश्चन दारुहारः स्वपौत्रेण सह काष्ठकर्तनार्थं वनं गतवान् । वने विभिन्नाकाराः वृक्षाः आसन् । पौत्रस्य तत् प्रथमं वनगमनम् आसीत् इत्यतः सः दारुहारः तेषां विषये पौत्रं बोधयन् आसीत् । सः अवदत्– ''पश्य! एषः स्थूलः वृक्षः । एतस्य काष्ठेन काष्ठफलकानि निर्मीयन्ते । तैः फलकैः द्वाराणि, उत्पीठिकाः, काष्ठभित्तिकाः इत्यादयः निर्मीयन्ते ।''

''एते वक्राः वृक्षाः अपि उपयोगिनः भवन्ति किम्?'' पौत्रः अपृच्छत् ।

''आम् । निश्चयेन । एतादृशानां वृक्षाणां काष्ठैः नौकायाः बाह्यानि वक्राङ्गानि निर्मीयन्ते ''इति अबोधयत् पितामहः । किञ्चिद्दूरे स्थितान् उन्नतान् वृक्षान् दर्शयन् सः पौत्रम् अवदत्– ''एतैः उन्नतैः वृक्षैः नौकायां यः दिङ्नियन्त्रकः स्तम्भः भवति सः, ध्वजस्तम्भः वा निर्मास्यते'' इति ।

''आम्'' इति सम्मतिं दर्शितवान् पौत्रः । स च अग्रे विद्यमानं कञ्चित् वृक्षं दृष्ट्वा पितामहं पृष्टवान्– ''एषः वृक्षः न स्थूलः न वा वक्रः न च उन्नतः । एतस्य उपयोगः नौकानिर्माणार्थं भवितुं न अर्हति । अतः एतं वृक्षं किम् इन्धनार्थं कर्तयेव?'' इति ।

तस्य स्कन्धे हस्तं स्थापयित्वा दारुहारः अवदत्– ''आदौ तं स्थूलं शुष्कं वृक्षं कर्तयेव । अनन्तरं चिन्तयेव अस्य विषये'' इति । अस्तु इति पौत्रः अङ्गीकृतवान् । स्थूलवृक्षं कर्तयित्वा श्रान्तः पौत्रः विश्रान्तिम् इच्छन् पितामहं प्रार्थितवान्– 'उपविशाव किञ्चित्' इति ।

पितामहः तं पुनः तेन दर्शितस्य वृक्षस्य समीपं नीत्वा छायायाम् उपावेशितवान् । किञ्चित् विश्रम्य सः पौत्रम् उक्तवान्– ''पश्य! एषः वृक्षः निरुपयोगी इति मत्वा इन्धनार्थं कर्तयेव इति त्वया उक्तम् आसीत् । किन्तु अधुना तस्य छायायाम् एव विश्रान्तिं प्राप्तवान् खलु त्वम्! अतः सर्वदा त्वया स्मर्तव्यं यत् कस्य अपि वस्तुनः इव जनस्य अपि उपयोगिता निरुपयोगिता वा सहसा न निर्णेतव्या इति । कस्मिन् कीदृशाः गुणाः सन्ति, ते च कथम् उपकारिणः भवेयुः इति गच्छता कालेन अनुभवेन च ज्ञायेरन् । अतः कोऽपि जनः वस्तु वा क्षणेन न उपेक्षणीयम्'' इति ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# द्वितीयः पाठः । पाकविधानम् ।

**भूमिका** – यदि उदरं परिपूर्णं, रसना तृप्ता तर्हि चित्तमपि तुष्यति । अत एव अस्माकं दैनन्दिनं जीवनम् अशनं, तत्सम्बन्धिनः पदार्थाः, उपकरणानि, पाकादिक्रियाः च इत्यादिकैः प्रायशः व्याप्तम् । परिचित-पाककृतिभिः नैके संस्कृतशब्दाः लीलया रञ्जकतया च ज्ञातुं शक्याः । अतः एतादृशः विषयः एव तस्याः भाषायाः विषये छात्राणां मनसि स्नेहम् उत्पादयेत् जिज्ञासां च वर्धयेत् ।

पुरातनेषु संस्कृतकाव्येषु यत् व्यञ्जनवैविध्यं दृश्यते तत् तु प्राचीनकालादारभ्य मानवस्य खाद्यरसिकताम् एव प्रदर्शयति । पाकविधिविषयकाः नैके प्राचीनाः ग्रन्थाः विद्यन्ते ।


तृतीयसोमेश्वरेण एकादश-द्वादशतमे शतके लिखितं 'मानसोल्लास' काव्यं विविधविषयान् ज्ञापयति । ग्रन्थस्य एतस्य पाककलाविषयकः विभागः प्रामुख्येन प्रसिद्धः । इडली, मज्जिका, शिखरिणी, मस्तु एते पाकविधयः मानसोल्लासात् सङ्गृहीताः । 'नलपाकदर्पणम्' इति ग्रन्थः राज्ञा नलेन लिखितः इति परम्परया कथितम् । किन्तु न तस्य कालः ज्ञायते । अस्मिन् ग्रन्थे ११ प्रकरणेषु ७६१ श्लोकाः सन्ति । अत्र 'सूप' इति पदार्थस्य कृतिः नलपाकदर्पणस्य प्रथमप्रकरणात् उद्धृता ।

एषः पाठः अन्नप्रक्रियाविषये रुचिं जनयति ।

## १. इडली / इडलिका

माषस्य विदलान् क्लिन्नान्निस्तुषान् हस्तलोडनैः ।
ततः सम्पेष्य पेषण्यां सम्भारेण विमिश्रितान् ।
स्थाल्यां विमर्द्य बहुशः स्थापयेत्तदहस्ततः ।।
आम्लीभूतं माषपिष्टं वटिकासु विनिक्षिपेत् ।
वस्त्रगर्भाभिरन्याभिः पिधाय परिपाचयेत् ।।
अवतार्यात्र मरीचं चूर्णितं विकिरेदनु ।
घृताक्ता हिङ्गुसर्पिर्भ्यां जीरकेण च धूपयेत् ।।





## २. सूपः



कुलित्थ-माष-निष्पाव-तुवरी-चणकादयः।
शूर्पेण शोधयेत् सम्यक् मुद्गादीन्वितुषीकृतान् ।।
पचेत् प्रवण्यां पाकज्ञः समभागोदकैश्च तान् ।
पक्वे सूपे समालोक्य यथार्हं सैन्धवं क्षिपेत् ।।
सुवर्णार्थञ्च तत्रैव निशावर्णं विनिक्षिपेत् ।
पुनश्च वासनार्थन्तु यथार्हं हिङ्गु निक्षिपेत् ।।
दर्वीपुटेन निर्मथ्य पयसा लोडयेच्च तम् ।
कर्पूरपुष्पमुख्यैश्च सुदृढं चाधिवासयेत् ।।
एवं मत्साधितं सूदः प्रदद्यात् सूपमुत्तमम् ।।
अयं रुचिकरात्सूपः रुच्यः पित्तविनाशकः ।
सर्वैर्गुणैस्समाविष्टो लघुरूपो निरामयः ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



### ३. मज्जिका

मथितं शर्करायुक्तमेलाचूर्णविमिश्रितम् ।
कर्पूरधूपितं नाम्ना मज्जिकेत्यभिधीयते ।।







### ४. शिखरिणी

निष्पीड्य दधि वस्त्रेण स्रावयेत्तद् द्रुतं जलम् ।
शर्करैलासमायुक्ता सूदैः शिखरिणी मता ।।

### ५. मस्तु

स्रावितं यद्धृतं तोयं जीरकार्द्रकसैन्धवैः ।
संयुक्तं हिङ्गुधूपेन धूपितं मस्तु कीर्तितम् ।।

### अन्वयः ।

१) माषस्य क्लिन्नान् विदलान् हस्तलोडनैः निस्तुषान् कुर्यात् । ततः पेषण्यां सम्पेष्य (विविधशाकानां वा पिष्टधान्यानां वा) सम्भारेण विमिश्रितान् (पिष्टमाषान्) स्थाल्यां बहुशः विमर्द्य ततः तत् अहः स्थापयेत्। आम्लीभूतं माषपिष्टं वटिकासु विनिक्षिपेत् । अन्याभिः वस्त्रगर्भाभिः वटिकाभिः पिधाय परिपाचयेत् । अवतार्य अत्र चूर्णितं मरीचम् अनु विकिरेत् । घृताक्ताः (ताः इडलिकाः / इडल्यः) हिङ्गुसर्पिर्भ्यां जीरकेण च धूपयेत् ।

२) कुलित्थमाषनिष्पावतुवरीचणकादयः शूर्पेण सम्यक् शोधयेत् । पाकज्ञः वितुषीकृतान् मुद्गादीन् प्रवण्यां समभागोदकैः पचेत् च । पक्वे सूपे समालोक्य यथार्हं सैन्धवं क्षिपेत् । तत्रैव सुवर्णार्थं निशावर्णं विनिक्षिपेत्। पुनश्च वासनार्थं तु यथार्हं हिङ्गु निक्षिपेत् । दर्वीपुटेन निर्मथ्य तं पयसा लोडयेत् कर्पूरपुष्पमुख्यैः च (तम्) सुदृढम् अधिवासयेत् । एवं सूदः मत्साधितम् उत्तमं सूपं प्रदद्यात् । रुचिकरात् अयं सूपः रुच्यः पित्तविनाशकः सर्वैः गुणैः समाविष्टः लघुरूपः निरामयः (च) ।

३) शर्करायुक्तम् एलाचूर्णविमिश्रितं कर्पूरधूपितं मथितं (दधि) 'मज्जिका' इति अभिधीयते ।

४) वस्त्रेण दधि निष्पीड्य द्रुतं जलं स्रावयेत् । सूदैः शर्करा-एलासमायुक्ता 'शिखरिणी' मता ।

५) यत् स्रावितं धृतं तोयं, (तत्) जीरकार्द्रकसैन्धवैः संयुक्तं, हिङ्गुधूपेन धूपितं 'मस्तु' (इति) कीर्तितम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## वाग्विशेषाः ।

विकिरेदनु – विकिरेत् + अनु, 'अनु' इति शब्दः अत्र उपसर्गरूपेण न योजितः । स्वतन्त्ररूपेण योजितः । 'तत्पश्चात् विकिरेत् ।' इति अर्थः अस्ति ।

## शब्दार्थः ।

१) सूदः – पाककर्ता, पाचकः ।
२) अहः – आदिनम्, दिनं यावत् ।
३) पेषणी – पेषणोपयुक्तौ उपलौ।
४) वितुषीकृतान् – आवरणविरहितान् ।
५) निर्मथ्य – सम्यक् मन्थनं कृत्वा ।
६) लोडयेत् – मिश्रयेत् ।
७) सुदृढम् – सुयोग्यपद्धत्या ।
८) प्रवणी – बाष्पस्थाली ।
९) निशावर्णम् – हरिद्रा ।
१०) अक्ता – लिप्ता ।
११) निष्पावः – विशिष्टप्रकारकं द्विदलं धान्यम्, ('चवळी' इति मराठी भाषायाम्)।
१२) माषः – विशिष्टप्रकारकं द्विदलं धान्यम्, ('उडीद' इति मराठी भाषायाम्)।

## सन्धिविग्रहः ।

१) क्लिन्नान्निस्तुषान् – क्लिन्नान् + निस्तुषान् ।
२) यद्धृतम् – यत् + धृतम् ।
३) सुवर्णार्थञ्च – सुवर्णार्थम् + च ।
४) वासनार्थन्तु – वासनार्थम् + तु।
५) लोडयेच्च – लोडयेत् + च ।
६) अवतार्यात्र – अवतार्य + अत्र ।
७) स्थापयेत्तदहस्ततः – स्थापयेत् + तत् + अहः + ततः ।
८) वस्त्रगर्भाभिरन्याभिः – वस्त्रगर्भाभिः + अन्याभिः ।
९) मज्जिकेत्यभिधीयते – मज्जिका + इति + अभिधीयते ।
१०) सर्वैर्गुणैस्समाविष्टः – सर्वैः + गुणैः + समाविष्टः ।

## समासविग्रहः ।

१) हिङ्गुसर्पिर्भ्याम् – हिङ्गु च सर्पिः च हिङ्गुसर्पिषी, ताभ्याम् । इतरेतरद्वन्द्वः ।
(हिङ्गु उकारान्तं नपुंसकलिङ्गम्)
२) घृताक्ता – घृतेन अक्ता । तृतीयातत्पुरुषः ।
३) शर्करायुक्तम् – शर्करया युक्तम् । तृतीयातत्पुरुषः ।
४) एलाचूर्णविमिश्रितम् – एलानां चूर्णम् एलाचूर्णम् । षष्ठीतत्पुरुषः ।
एलाचूर्णेन विमिश्रितम् । तृतीयातत्पुरुषः ।
५) शर्करैलासमायुक्ता – शर्करा च एलाः च शर्करैलाः । इतरेतरद्वन्द्वः ।
शर्करैलाभिः समायुक्ता । तृतीयातत्पुरुषः ।
६) जीरकार्द्रकसैन्धवैः – जीरकाः च आर्द्रकः च सैन्धवं च जीरकार्द्रकसैन्धवानि, तैः । इतरेतरद्वन्द्वः।
७) हिङ्गुधूपेन – हिङ्गुनः धूपः, तेन । षष्ठीतत्पुरुषः ।
८) पाकज्ञः – पाकं जानाति इति । उपपदतत्पुरुषः ।
९) यथार्हम् – अर्हम् अनुसृत्य । अव्ययीभावः ।
१०) लघुरूपः – लघु रूपं यस्य सः । बहुव्रीहिः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### रूपपरिचयः ।

१) आम्लीभूतम् – आम्ल + भू (१ प.प.), च्विरूपम् , क्त-प्रत्ययान्त-विशेषणम् , 'आम्लीभूत' । नपुंसकलिङ्गम् , द्वितीया, एकवचनम् ।
२) विकिरेत् – वि + कृ (६ प.प.), विधिलिङ् , प्रथमपुरुषः, एकवचनम् ।
३) धूपयेत् – धूप् (१० उ.प. अत्र प.प.), विधिलिङ् , प्रथमपुरुषः, एकवचनम् ।
४) अभिधीयते – अभि + धा (३ उ.प.), कर्मणि लट् , प्रथमपुरुषः, एकवचनम् ।
५) स्थापयेत् – स्था (१ प.प.), णिजन्तम् , विधिलिङ् , प्रथमपुरुषः, एकवचनम् ।
६) विनिक्षिपेत् – वि + नि + क्षिप् (६ उ.प. अत्र प. प.), विधिलिङ् , प्रथमपुरुषः, एकवचनम् ।
७) दधि – दधि , इकारान्तम् , नपुंसकलिङ्गम् , प्रथमा, द्वितीया एकवचनम् ।
८) सर्पिः – सर्पिस् , सकारान्तम् , नपुंसकलिङ्गम् , प्रथमा, द्वितीया एकवचनम् ।
९) प्रवण्याम् – प्रवणी, ईकारान्तम् , स्त्रीलिङ्गम् , सप्तमी एकवचनम् ।
१०) लोडयेत् – लुड् (१ प.प.), णिजन्तम् , विधिलिङ् , प्रथमपुरुषः, एकवचनम् ।
११) अधिवासयेत् – अधि + वस् (१ प.प.), णिजन्तम् , विधिलिङ् , प्रथमपुरुषः, एकवचनम् ।
१२) प्रदद्यात् – प्र+ दा (३ उ.प. अत्र प.प.), विधिलिङ् , प्रथमपुरुषः, एकवचनम् ।

## भाषाभ्यासः ।

### १. ससन्दर्भं स्पष्टीकुरुत ।

१) वस्त्रगर्भाभिरन्याभिः पिधाय परिपाचयेत् । २) एवं मत्साधितं सूदः प्रदद्यात् सूपमुत्तमम् ।

### २. पूर्णवाक्येन उत्तरत ।

१) माषस्य विदलान् कथं निस्तुषान् कुर्यात् ?
२) आम्लीभूतं माषपिष्टं कुत्र विनिक्षिपेत् ?
३) का मज्जिका इति अभिधीयते ?
४) मस्तुपेये के रुचिवर्धकाः योक्तव्याः ?
५) वितुषीकृतान् मुद्गादीन् केन शोधयेत् ?
६) पाकज्ञः सैन्धवं कुत्र क्षिपेत् ?
७) निशावर्णं किमर्थं विनिक्षिपेत् ?
८) सूपं केन लोडयेत् ?
९) सूपस्य पञ्च वैशिष्ट्यानि लिखत ।
१०) सूपपाचनार्थं कतिभागोदकम् आवश्यकम् ?
११) पाठे कानि, कति च द्विदलधान्यानि निर्दिष्टानि?

### ३. समानार्थकशब्दान् लिखत ।

अग्निः, सूदः, क्लिन्नम् , मृदुः, शर्करा, सैन्धवम् , पाकज्ञः, प्रवणी, पयः, निरामयः, हरिद्रा

### ४. विरुद्धार्थकशब्दान् लिखत ।

क्लिन्नम् , संयुक्तम् , पक्वम् , पित्तविनाशकः, निरामयः, लघुरूपः

### ५. पद्यांशात् योग्यं विशेषणं चिनुत ।

१) ............ मुद्गादीन् । २) ............ सूपे । ३) .......... सूपम् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

६. विशेषण-विशेष्याणां मेलनं कुरुत ।

| अ | ब |
|---|---|
| १) आम्लीभूतम् | शिखरिणी |
| २) स्नावितम् | विदलान् |
| ३) शर्करैलासमायुक्ता | माषपिष्टम् |
| ४) क्लिन्नान् | तोयम् |
| ५) चूर्णितम् | मरीचम् |

७. मेलनं कुरुत ।

| **पदार्था:** | **क्रिया:** |
|---|---|
| मस्तु | मथनम् |
| इडलिका | निष्पीडनम् |
| मज्जिका | सम्पेषणम् |
| शिखरिणी | स्रावणम् |

८. सूचनानुसारं परिवर्तनं कुरुत ।


१) आम्लीभूतं माषपिष्टं वटिकासु विनिक्षिपेत् । (लट्लकारे परिवर्तयत ।)
२) पिष्टमाषान् स्थाल्यां बहुश: विमर्द्य अह: स्थापयेत् । (पूर्वकालवाचक-अव्ययं निष्कासयत ।)
३) पाकज्ञ: तान् प्रवण्यां पचेत् । (लोट्लकारे परिवर्तयत ।)
४) वस्त्रेण दधि निष्पीड्य द्रुतं जलं स्रावयेत् । (पूर्वकालवाचक-अव्ययं निष्कासयत ।)

९. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

१) माषपिष्टं वटिकासु विनिक्षिपेत् । (तद्)
२) मुद्गादीन् शूर्पेण शोधयेत् । (तद्)
३) पाकज्ञ: समभागोदकै: तान् प्रवण्यां पचेत् । (माष)
४) पयसा तं लोडयेत् । (सूप)
५) सूद: उत्तमं सूपं प्रदद्यात् । (तद्)
६) वस्त्रेण दधि निष्पीडयेत् । (तद्)

१०. पृथक्करणं कुरुत ।

**(अ) पद्यांशात् योग्यं विशेषणं चित्वा जालरेखाचित्रं पूरयत ।**






Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**(आ) प्रवाहिजालं पूरयत ।**

१)

............ → ............ → ............ → ............ → ............

(समभागोदकैः पचनम् , सैन्धवादीनां क्षेपणम् , शूर्पेण शोधनम् , वितुषीकरणम्)

२)

(आम्लीभूतस्य माषपिष्टस्य वटिकासु पाचनम् , माषविदलानां सम्पेषणम् , पिष्टमाषादीनां स्थापनम् , माषविदलानां निस्तुषीकरणम्)

३)

**द्विदलधान्यानां नामानि ।**

कुलित्थः .................. .................. .................. ..................

**(इ) स्तम्भं पूरयत ।**

१) स्वादवर्धकान् उचितस्तम्भे लिखत ।

| इडलिका | मज्जिका | शिखरिणी | मस्तु |
|---|---|---|---|
| | | | |

१) शर्करा + एला + कर्पूरः ।  २) शर्करा + एला ।
३) मरीचचूर्णम् + हिङ्गु + जीरकम् ।  ४) हिङ्गु + जीरकम् + सैन्धवम् ।

२)

| | | | | |
|---|---|---|---|---|
| केन | दर्वीपुटेन | ............. | ............ | शूर्पेण |
| किम् | ........... | लोडनम् | अधिवासनम् | ............ |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३)

| किमर्थम् / प्रयोजनम् | सुवर्णार्थम् | ............. | रुच्यर्थम् | ............. |
|---|---|---|---|---|
| किम् / पदार्थनाम | ............. | हिङ्गु | ............. | कर्पूरपुष्पादयः |

**उपक्रमः –**

१) 'इडली' इत्यस्य पाककृतिं पठित्वा तद्वत् अधुना स्वस्य प्रियपदार्थस्य पाककृतिं लिखत ।

**साहित्यम्** – चत्वारि पात्राणि तण्डुलाः, एकं पात्रं माषविदलानि, जलं लवणं च ।

**कृतिः** – तण्डुलाः चतुः, पञ्च होरापर्यन्तं जले स्थापयतु । माषविदलानि अर्धघण्टापर्यन्तं तथैव स्थापयतु । क्लिन्नान् तण्डुलान् माषविदलान् च पेषण्या मिश्रकेण वा पेषयतु । किञ्चित् जलं मिश्रयित्वा आरात्रि स्थापयतु । आम्लीभूतमिदं पिष्टम् इडलीपात्रस्य स्थालिकासु तैलं लेपयित्वा तासु क्षिपतु । इडलीपात्रं बाष्पपोते स्थापयित्वा पाचयतु । दशनिमेषाणामनन्तरं बाष्पेण पक्वाः इडल्यः सिद्धाः । अग्नेः अवतार्य किञ्चित् शीतलीकृत्य इडल्यः स्थालिकाभ्यः निष्कासयितुं शक्याः । एताः इडल्यः नारिकेलस्य वा चणकविदलस्य वा उपदंशेन सूपेन वा सहिताः रुचिराः भवन्ति ।

२) युट्युब-भित्तिकायां वेदिका-गीतसञ्चयस्य 'जम्बीरपानक' गीतं पश्यत ।

३) अन्यभाषायां प्रचलितानाम् एतेषां पदार्थानाम् आधुनिकानि नामानि लिखत –
मज्जिका, शिखरिणी, जीरकाः, आर्द्रकः, माषः, मरीचं चूर्णम् , घृतम् , हिङ्गु, सर्पिः, शर्करा, एला, सैन्धवम् ।

४) पञ्चपाककृतीनां लेखनं कुरुत ।

५) पाककृतिविषयकाणां संस्कृतग्रन्थानां सूचिं कृत्वा कोष्टकरूपेण रचयत ।

| अ. क्र. | ग्रन्थनाम | रचयिता | कालः | विशेषः |
|---|---|---|---|---|
| | | | | |
| | | | | |

६) बाष्पपक्वानां पदार्थानां नामानि लिखित्वा तेषु एकस्य कृतिं लिखत ।

७) अस्मिन् पाठे कति पाकविधयः सन्ति? तेषु एकस्य विधानप्रक्रियान्तरं कालानुसारं कथम् अभवत् इति लिखत ।

***



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# तृतीयः पाठः । सूक्तिसौरभः ।

**भूमिका** – सुभाषितं नाम सुष्ठु भाषितम् । सुभाषितानि संस्कृतभाषायाः वैशिष्ट्यपूर्णानि पद्यरत्नानि । सुभाषितानि अस्माकं मनः रञ्जयन्ति ज्ञानं च वर्धयन्ति । किं कर्तव्यं, किम् अकर्तव्यम् इति सम्यक् बोधयन्ति । मानुषजीवनस्य विशेषम् अपि निर्दिशन्ति । जीवनस्य साफल्यं मार्मिकरीत्या सूचयन्ति, सर्वान् पण्डितान् आह्लादयन्ति च । सुभाषितानि संस्कृतभाषायाः सौन्दर्यस्थानानि खलु ।

उपकारान् स्मरेन्नित्यम् अपकारांश्च विस्मरेत् ।
शुभे शैघ्र्यं प्रकुर्वीत अशुभे दीर्घसूत्रता ।।१।।

सुखं शेते सत्यवक्ता सुखं शेते मितव्ययी ।
हितभुक् मितभुक् चैव तथैव विजितेन्द्रियः ।।२।।

कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सुविद्यानां कोऽप्रियः प्रियवादिनाम् ।।३।।

न हि वैरेण वैराणि शाम्यन्तीह कदाचन ।
अवैरेण च शाम्यन्ति एष धर्मः सनातनः ।।४।।

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ।।५।।

क्वचिद्रुष्टः क्वचित्तुष्टः रुष्टस्तुष्टः क्षणे क्षणे ।
अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः ।।६।।

सम्भ्रमः स्नेहमाख्याति वपुराख्याति भोजनम् ।
विनयो वंशमाख्याति देशमाख्याति भाषितम् ।।७।।

षट्पदः पुष्पमध्यस्थो यथा सारं समुद्धरेत् ।
तथा सर्वेषु शास्त्रेषु सारं गृह्णन्ति पण्डिताः ।।८।।



मुक्ताफलैः किं मृगपक्षिणां च मिष्टान्नपानैः किमु गर्दभाणाम् ।
अन्धस्य दीपो बधिरस्य गीतं मूर्खस्य किं शास्त्रकथाप्रसङ्गः ।।९।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अन्वयः ।

१. नित्यम् उपकारान् स्मरेत् । अपकारान् च विस्मरेत् । शुभे शैघ्र्यं प्रकुर्वीत । अशुभे दीर्घसूत्रता (प्रकुर्वीत)।
२. सत्यवक्ता सुखं शेते । मितव्ययी सुखं शेते । हितभुक् मितभुक् च एव (सुखं शेते) तथा एव विजितेन्द्रियः (सुखं शेते) ।
३. समर्थानां कः अतिभारः? (न कश्चित् अतिभारः) व्यवसायिनां किं दूरम्? (न किञ्चित् दूरम्) सुविद्यानां कः विदेशः? (न कोऽपि विदेशः) प्रियवादिनां कः अप्रियः? (न कोऽपि अप्रियः)
४. इह कदाचन वैराणि वैरेण न हि शाम्यन्ति; अवैरेण (वैराणि) च शाम्यन्ति, एष सनातनः धर्मः ।
५. पुराणम् इति एव न सर्वं साधु, (सर्वं) नवम् इति च अपि न सर्वम् अवद्यं, सन्तः परीक्ष्य अन्यतरत् भजन्ते । (अपि तु) मूढः परप्रत्ययनेयबुद्धिः ।
६. क्वचित् रुष्टः, क्वचित् तुष्टः, क्षणे रुष्टः, क्षणे तुष्टः, अव्यवस्थितचित्तस्य (मनुजस्य) प्रसादः अपि भयङ्करः ।
७. सम्भ्रमः स्नेहम् आख्याति । वपुः भोजनम् आख्याति । विनयः वंशम् आख्याति । भाषितं देशम् आख्याति।
८. यथा पुष्पमध्यस्थः षट्पदः सारं समुद्धरेत्, तथा पण्डिताः सर्वेषु शास्त्रेषु सारं गृह्णन्ति ।
९. मृगपक्षिणां मुक्ताफलैः किम् ? गर्दभाणां मिष्टान्नपानैः किमु च? अन्धस्य दीपो, बधिरस्य गीतं, मूर्खस्य शास्त्रकथाप्रसङ्गः किम् ?

## वाग्विशेषः ।

१. 'काकु' रचना – संस्कृत भाषायाः एषा एका वैशिष्ट्यपूर्णा रचना । नवमे सुभाषिते 'किम्' पदस्य अर्थः 'कः उपयोगः?' अर्थात् उत्तररूपेण 'उपयोगः नास्ति' इत्येव उत्तरम् अपेक्षितम् । उदा – मुक्ताफलैः किं मृगपक्षिणाम्? अत्र मृगाणां पक्षिणां च कृते मुक्ताफलानां कः उपयोगः ? अर्थात् कोऽपि उपयोग नास्ति इत्येव अर्थः ।
२. पञ्चमश्लोकस्य पाठभेदः एवमपि– अन्यत्र एवमपि उक्तम्– पुराणमित्येव हि साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।

### शब्दार्थः ।

| | | | | | |
|---|---|---|---|---|---|
| १) शैघ्र्यम् | – | त्वरा । | २) अवद्यम् | – | निन्द्यम् । |
| ३) दीर्घसूत्रता | – | विलम्बेन क्रियाकरणम् । | ४) षट्पदः | – | भ्रमरः । |
| ५) शेते | – | निद्राति । | | | |

### सन्धिविग्रहः ।

| | | | |
|---|---|---|---|
| १) स्मरेन्नित्यम् | – स्मरेत् + नित्यम् । | २) अपकारांश्च | – अपकारान् + च । |
| ३) क्वचिद्रुष्टः | – क्वचित् + रुष्टः । | ४) वपुराख्याति | – वपुः + आख्याति । |
| ५) परीक्ष्यान्यतरद्भजन्ते | – परीक्ष्य + अन्यतरत् + भजन्ते । | | |

### समासविग्रहः ।

१) विजितेन्द्रियः – विजितानि इन्द्रियाणि येन सः । बहुव्रीहिः ।
२) मध्यस्थः – मध्ये तिष्ठति इति । उपपदतत्पुरुषः ।
३) अवैरेण – न वैरेण । नञ्तत्पुरुषः ।
४) सत्यवक्ता – सत्यं वक्ति । उपपदतत्पुरुषः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५) मितव्ययी – मितं व्येति । उपपदतत्पुरुषः ।
६) हितभुक् – हितं भुनक्ति । उपपदतत्पुरुषः ।
७) मितभुक् – मितं भुनक्ति । उपपदतत्पुरुषः ।
८) अव्यवस्थितचित्तस्य – न व्यवस्थितम् । अव्यवस्थितम् । नञ्तत्पुरुषः ।
अव्यवस्थितं चित्तं यस्य सः । बहुव्रीहिः ।
९) षट्पदः – षट् पदाः यस्य सः । बहुव्रीहिः ।
१०) प्रियवादिनम् – प्रियं वदति इति । तम् । उपपदतत्पुरुषः ।
११) मृगपक्षिणाम् – मृगाः च पक्षिणः च । तेषाम् । इतरेतरद्वन्द्वः ।

### रूपपरिचयः ।

१) विस्मरेत् – वि + स्मृ (१ प.प.), विधिलिङ् , प्रथमपुरुषः, एकवचनम्।
२) प्रकुर्वीत – प्र+ कृ (८ उ.प. अत्र आ.प.), विधिलिङ् , प्रथमपुरुषः, एकवचनम्।
३) शेते – शी (२ आ.प.), लट् , प्रथमपुरुषः, एकवचनम् ।
४) शाम्यन्ति – शम् (४ प.प.), लट् , प्रथमपुरुषः, बहुवचनम् ।
५) भजन्ते – भज् (१ उ.प. अत्र आ.प.), लट् , प्रथमपुरुषः, बहुवचनम् ।
६) आख्याति – आ + ख्या (२ प.प.), लट् , प्रथमपुरुषः, एकवचनम् ।
७) समुद्धरेत् – सम् + उद् + धृ (१ प.प.), विधिलिङ् , प्रथमपुरुषः, एकवचनम् ।
८) गृह्णन्ति – ग्रह् (९ उ.प. अत्र प.प.), लट् , प्रथमपुरुषः, बहुवचनम् ।

## भाषाभ्यासः ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) मूढः परप्रत्ययनेयबुद्धिः ।
२) मूर्खस्य किं शास्त्रकथाप्रसङ्गः ।
३) न हि वैरेण वैराणि शाम्यन्तीह कदाचन ।
४) सारं गृह्णन्ति पण्डिताः ।
५) एष धर्मः सनातनः ।

**२. पूर्णवाक्येन उत्तरत ।**

१) मनुजः नित्यं कान् विस्मरेत् ?
२) मनुजः नित्यं कान् स्मरेत् ?
३) दीर्घसूत्रता कदा योग्या ?
४) मनुजः कदा शैघ्र्यं प्रकुर्वीत ?
५) मूढः कीदृशः ?
६) सनातनधर्मः किं पाठयति ?
७) सम्भ्रमः किम् आख्याति ?
८) कस्य प्रसादः अपि भयङ्करः ?
९) पण्डितस्य सारग्रहणं केन समम् ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१०) कः वंशम् आख्याति ?
११) कस्य कृते शास्त्रकथाप्रसङ्गः अनुपयुक्तः ?
१२) गर्दभाणां कृते कस्य उपयोगः नास्ति ?

### ३. समानार्थकशब्दान् लिखत ।

षट्पदः, मितव्ययी, विदेशः, स्नेहः, वपुः, पण्डितः, भोजनम् , विनयः, पुष्पम् , गर्दभः, दीपः, मूर्खः

### ४. विरुद्धार्थकशब्दान् लिखत ।

पुराणम् , सुखम् , सन्तः, मूढः, शुभम्, उपकारः, शैघ्र्यम् , विदेशः, समर्थः, अप्रियः, वैरम्, भयङ्करः

### ५. विशेषण-विशेष्याणां मेलनं कुरुत ।

| अ | ब |
|---|---|
| १) नवम् | मूढः |
| २) परप्रत्ययनेयबुद्धिः | शास्त्रेषु |
| ३) सनातनः | काव्यम् |
| ४) पुष्पमध्यस्थः | धर्मः |
| ५) सर्वेषु | षट्पदः |

### ६. सूचनानुसारं परिवर्तनं कुरुत ।

१) मनुजः उपकारान् स्मरेत् । (बहुवचने परिवर्तयत ।)
२) वैरेण वैराणि न शाम्यन्ति । (एकवचने परिवर्तयत ।)
३) पण्डिताः सारं गृह्णन्ति । (एकवचने परिवर्तयत ।)
४) षट्पदः सारं समुद्धरेत् । (बहुवचने परिवर्तयत ।)
५) मनुजः अपकारान् विस्मरेत् । (लोट्लकारे परिवर्तयत ।)
६) षट्पदः सारं समुद्धरेत् । (लट्लकारे परिवर्तयत ।)

### ७. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

१) मनुजः उपकारान् नित्यं स्मरेत् । (तद्)
२) सत्यवक्ता सुखं शेते । (तद्)
३) सम्भ्रमः स्नेहम् आख्याति । (तद्)
४) पण्डिताः सारं गृह्णन्ति । (तद्)
५) अव्यवस्थितचित्तस्य प्रसादः अपि भयङ्करः । (तद्)

### ८. पृथक्करणं कुरुत ।

**अ) स्तम्भं पूरयत ।**

| | |
|---|---|
| केन | कस्य |
| | वपुषः |
| भाषितेन | |
| सम्भ्रमेण | |
| | वंशस्य |




Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com

**आ) जालरेखाचित्रं पूरयत ।**

१.




२.




**उपक्रमः –** निम्नलिखितान् विषयान् आधृत्य सुभाषितसङ्ग्रहं कुरुत ।
१) क्षमा २) पण्डितः ३) आरोग्यम्

***

**कथारञ्जनी**

एकं गुरुकुलम् आसीत् । तत्र एकः गुरुः आसीत् । गुरुः महापण्डितः आसीत् । एकः बालकः गुरुकुलम् आगच्छत्, अवदत्, – 'अहं भवतः शिष्यः भवितुम् इच्छामि ।' गुरुः अभाषत– 'तदर्थम् एका परीक्षा विद्यते ।' शिष्यः अवदत् – 'भवतु' । गुरुः अपृच्छत् – 'देवः कुत्र अस्ति ?' शिष्यः प्रत्यवदत् – 'देवः सर्वत्र अस्ति । सः कुत्र नास्ति इति भवान् एव कथयतु,' इति । तस्य उत्तरं श्रुत्वा गुरुः सन्तुष्टोऽभवत् । सः बालकं स्वशिष्यरूपेण स्व्यकरोत् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# चतुर्थः पाठः । गीतामृतम् ।

**भूमिका –** महाभारतस्य भीष्मपर्वान्तर्गता श्रीमद्भगवद्गीता नाम विश्वमान्यः ग्रन्थः। भारतीयतत्त्वज्ञानस्य मूलाधारः खलु एषः ग्रन्थः । किं बहुना, मानसशास्त्रं, व्यवस्थापनशास्त्रम् इत्यादीनाम् आधुनिकज्ञानशाखानां कृतेऽपि गीता साहाय्यकारिणी । साम्प्रतकालेऽपि जटिलायां जीवनपद्धत्यां गीतायाः उपदेशः सम्यक् मार्गदर्शनं करोति ।

अत्र भगवद्गीतायाः द्वितीय-तृतीयाध्यायतः केचन श्लोकाः सङ्गृहीताः । अस्माकम् इन्द्रियाणि चञ्चलानि। तानि सर्वदा ऐहिकसुखम् इच्छन्ति । मनः अपि तैः कर्षितम् ऐहिकसुखानि अनुधावति । अतः इन्द्रियसंयमनेन मनोनिग्रहः करणीयः । तदनु ऋते फलापेक्षायाः नियतं विहितं च कर्म सततम् आचरितव्यम्, कर्म नैव त्याज्यं, किन्तु कर्मफलासक्तिः एव त्याज्या इति सन्देशः अत्र बोधितः ।

### कर्मयोगः

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।। १।।
योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ।। २।।
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।। ३।।
नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ।। ४।।
तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ।। ५।।




### इन्द्रियनिग्रहः

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ।।६।।
धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ।।७।।
इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ।। ८।।
कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ।। ९।।
यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता । १०।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अन्वयः

१) (हे अर्जुन) ते (तव) अधिकारः कर्मणि एव । फलेषु (ते अधिकारः) कदाचन (अपि) मा (अस्तु)। (त्वं) कर्मफलहेतुः मा भूः । अकर्मणि ते सङ्गः मा अस्तु ।

२) हे धनञ्जय, सङ्गं त्यक्त्वा सिद्ध्यसिद्ध्योः समः भूत्वा योगस्थः (भूत्वा/सन्) (त्वं) कर्माणि कुरु। (यतः) समत्वं योगः उच्यते ।

३) श्रेष्ठः यत् यत् (कर्म) आचरति इतरः जनः तत् तत् एव (कर्म आचरति) । सः यत् प्रमाणं कुरुते, तत् लोकः अनुवर्तते ।

४) त्वं नियतं कर्म कुरु । अकर्मणः हि कर्म ज्यायः । अकर्मणः ते शरीरयात्रा अपि च न प्रसिद्ध्येत् ।

५) तस्मात् असक्तः (सन्) सततं कार्यं कर्म समाचर । असक्तः (सन्) कर्म आचरन् पूरुषः हि परम् आप्नोति ।

६) हे कौन्तेय, एतेन ज्ञानिनः नित्यवैरिणा दुष्पूरेण च कामरूपेण अनलेन ज्ञानम् आवृतम् ।

७) यथा धूमेन वह्निः मलेन आदर्शः च आव्रियते, यथा उल्बेन गर्भः आवृतः तथा तेन (कामेन) इदम् (ज्ञानम्) आवृतम् ।

८) इन्द्रियाणि, मनः, बुद्धिः च अस्य (कामस्य) अधिष्ठानम् उच्यते । एषः (कामः) एतै (इन्द्रियमनोबुद्धिभिः) ज्ञानम् आवृत्य देहिनं विमोहयति ।

९) यः कर्मेन्द्रियाणि संयम्य मनसा इन्द्रियार्थान् (एव) स्मरन् आस्ते सः विमूढात्मा मिथ्याचारः (इति बुधैः) उच्यते ।

१०) (यथा) कूर्मः सर्वशः अङ्गानि संहरते (तथा) इव यदा अयम् (पूरुषः) इन्द्रियार्थेभ्यः इन्द्रियाणि सर्वशः संहरते (तदा) तस्य प्रज्ञा प्रतिष्ठिता ।

## वाग्विशेषः ।

मा भूः - अत्र 'मा अभूः' इति मूलवाक्यम् । 'मा' इति निषेधवाचक-अव्यययोगेन 'अ' आगमस्य लोपः।

## शब्दार्थः ।

१) धनञ्जयः - अर्जुनः, कौन्तेयः ।
२) समत्वम् - सन्तुलनम् ।
३) ज्यायः - श्रेष्ठम् ।
४) परम् - मोक्षम् ।
५) उल्बः/उल्बम् - गर्भास्तरणम् ।
६) मिथ्याचारः - दाम्भिकः ।
७) इन्द्रियार्थः - इन्द्रियस्य विषयः । (यथा नेत्रस्य रूपम् , कर्णस्य शब्दः।)

## सन्धिविग्रहः ।

१) कर्मण्येवाधिकारस्ते - कर्मणि + एव + अधिकारः + ते ।
२) कर्मफलहेतुर्भूर्मा - कर्मफलहेतुः + भूः + मा ।
३) सङ्गोऽस्त्वकर्मणि - सङ्गः + अस्तु + अकर्मणि ।
४) श्रेष्ठस्तत्तदेवेतरो जनः - श्रेष्ठः + तत् + तत् + एव+ इतरः + जनः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५) यथोल्बेनावृतः - यथा + उल्बेन + आवृतः ।
६) बुद्धिरस्याधिष्ठानम् - बुद्धिः + अस्य + अधिष्ठानम् ।
७) एतैर्विमोहयत्येषः - एतैः + विमोहयति + एषः ।
८) कूर्मोऽङ्गानीव - कूर्मः + अङ्गानि + इव ।
९) प्रसिद्ध्येदकर्मणः - प्रसिद्ध्येत् + अकर्मणः ।

## समासविग्रहः ।

१) कर्मफलहेतुः - कर्मणः फलम् । षष्ठीतत्पुरुषः । कर्मफलं हेतुः यस्य सः । बहुव्रीहिः ।
२) अकर्मणि - न कर्म, तस्मिन् । नञ्तत्पुरुषः ।
३) योगस्थः - योगे तिष्ठति इति । उपपदतत्पुरुषः ।
४) सिद्ध्यसिद्ध्योः - सिद्धिः च असिद्धिः च । तयोः । इतरेतरद्वन्द्वः ।
५) असक्तः - न सक्तः । नञ्तत्पुरुषः ।
६) विमूढात्मा - विमूढः आत्मा यस्य सः । बहुव्रीहिः ।
७) मिथ्याचारः - मिथ्या आचारः यस्य सः । बहुव्रीहिः ।

## रूपपरिचयः ।

१) कर्मणि - कर्मन् , अन्नन्तम् , नपुंसकलिङ्गम् , सप्तमी, एकवचनम् ।
२) अस्तु - अस् (२ प.प.), लोट् , प्रथमपुरुषः, एकवचनम् ।
३) कुरु - कृ (८ उ.प. अत्र प.प.), लोट् , मध्यमपुरुषः, एकवचनम् ।
४) उच्यते - वच् (२ प.प.)/ ब्रू (२ उ.प.), कर्मवाच्यम् लट् , प्रथमपुरुषः, एकवचनम् ।
५) आप्नोति - आप् (५ प.प.), लट् , प्रथमपुरुषः, एकवचनम् ।
६) आव्रियते - आ+वृ (५ उ.प.), कर्मवाच्यम् लट् , प्रथमपुरुषः, एकवचनम् ।
७) आवृतम् - आ+वृ (५ उ.प.), क्त-प्रत्ययान्त-विशेषणम् , नपुंसकलिङ्गम् , प्रथमा, द्वितीया एकवचनम् ।
८) विमोहयति - वि+मुह् (४ प.प.), णिजन्तम् , लट् , प्रथमपुरुषः, एकवचनम् ।
९) संहरते - सम्+हृ (१ उ.प.अत्र आ.प.), लट् , प्रथमपुरुषः, एकवचनम् ।
१०) अयम् - इदम् , सर्वनाम, पुंल्लिङ्गम् , प्रथमा, एकवचनम् ।
११) आस्ते - आस् (२ आ.प.), लट् , प्रथमपुरुषः, एकवचनम् ।
१२) मनसा - मनस् , सकारान्तम् , नपुंसकलिङ्गम् , तृतीया, एकवचनम् ।
१३) स्मरन् - स्मृ (१ प.प.), शतृ-प्रत्ययान्त-विशेषणम् , पुंल्लिङ्गम् , प्रथमा, एकवचनम् ।
१४) ज्यायः - 'प्रशस्य' ईयस् प्रत्ययान्तम् , भाववाचकविशेषणम् , नपुंसकलिङ्गम् , प्रथमा, एकवचनम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## भाषाभ्यासः ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) तथा तेनेदमावृतम् । २) तस्य प्रज्ञा प्रतिष्ठिता ।
३) मिथ्याचारः स उच्यते । ४) यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
५) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
६) नियतं कुरु कर्म त्वम् । ७) समत्वं योग उच्यते ।
८) तस्मादसक्तः सततं कार्यं कर्म समाचर ।

**२. पूर्णवाक्येन उत्तरत ।**

१) मनुजस्य सङ्गः कस्मिन् मा अस्तु ? २) योगः नाम किम् ?
३) कीदृशः पूरुषः परम् आप्नोति ? ४) इतरः जनः किम् आचरति ?
५) लोकः किम् अनुवर्तते ? ६) वह्निः केन आव्रियते ?
७) मलेन कः आव्रियते ? ८) गर्भः केन आवृतः ?
९) ज्ञानं केन आवृतम् ? १०) कामः कं विमोहयति ?
११) निग्रही मनुजः केन सदृशम् इन्द्रियाणि संहरते ?
१२) कामस्य अधिष्ठानानि कानि ? १३) निग्रही मनुष्यः इन्द्रियाणि केभ्यः संहरते ?

**३. वाक्यं सत्यम्/असत्यं लिखत ।**

१) मनुजः क्षणमपि अकर्मकृत् न तिष्ठति । २) इतरः जनः श्रेष्ठम् अनुवर्तते ।
३) सक्तः पूरुषः परम् आप्नोति । ४) कामेन ज्ञानम् आवृतम् ।
५) कामः देहिनं न विमोहयति ।

**४. समानार्थकशब्दान् लिखत ।**

हेतुः, जनः, धूमः, वह्निः, मनः, बुद्धिः, कूर्मः, मिथ्याचारः, फलम् , धनञ्जयः, शरीरम् , ज्ञानम्

**५. विरुद्धार्थकशब्दान् लिखत ।**

सङ्गः, असक्तः, सिद्धिः, आवृतम् , प्रतिष्ठिता, मिथ्याचारः, श्रेष्ठः, ज्ञानम्

**६. विशेषण-विशेष्याणां मेलनं कुरुत ।**

| अ | ब |
|---|---|
| १) इतरः | अनलेन |
| २) असक्तः | जनः |
| ३) नित्यवैरिणा | पूरुषः |

**७. पाठ्यांशात् पूर्वकालवाचकं त्वान्तम् अव्ययं तथा पूर्वकालवाचकं ल्यबन्तम् अव्ययं चिनुत ।**

**८. सूचनानुसारं परिवर्तनं कुरुत ।**

१) लोकः श्रेष्ठम् अनुवर्तते । (बहुवचने परिवर्तयत ।)
२) कूर्मः अङ्गानि संहरते । ('कूर्माः' योजयत ।)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३) त्वं कर्मफलहेतुः मा भूः । (लोट्लकारे परिवर्तयत ।)
४) प्रज्ञावान् इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते । (विधिलिङ्लकारे परिवर्तयत ।)
५) त्वं सङ्गं त्यक्त्वा कर्माणि कुरु । ('त्वं' स्थाने 'भवान्' योजयत ।)
६) त्वं सततं कार्यं कर्म समाचर । ('त्वं' स्थाने 'भवान्' योजयत ।)
७) त्वं सङ्गं त्यक्त्वा कर्माणि कुरु । (पूर्वकालवाचकम् अव्ययं निष्कासयत ।)
८) उल्बेन गर्भः आवृतः । (वाच्यपरिवर्तनं कुरुत ।)
९) धूमेन आव्रियते वह्निः । (वाच्यपरिवर्तनं कुरुत ।)

**९. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।**

१) मनुजस्य अधिकारः कर्मणि एव । (तद्)
२) सः यत् प्रमाणं कुरुते तदेव इतरः जनः । (श्रेष्ठ)
३) अकर्मणः ते शरीरयात्रा न प्रसिद्ध्येत् । (तद्)
४) पूरुषः परम् आप्नोति । (तद्)
५) एतेन ज्ञानम् आवृतम् । (काम)
६) इन्द्रियाणि, मनः, बुद्धिः अस्य अधिष्ठानम् उच्यते । (काम)
७) कामः देहिनं विमोहयति । (तद्)
८) विमूढात्मा इन्द्रियार्थान् मनसा स्मरन् आस्ते । (तद्)
९) तस्य प्रज्ञा प्रतिष्ठिता । (मनुज)

**१०. पृथक्करणम् ।**

**स्तम्भं पूरयत ।**

१)

| केन आवृतम् | किम् आवृतम् |
|---|---|
| धूमेन | |
| मलेन | |
| उल्बेन | |
| तेन (कामेन) | |

२)

| | | |
|---|---|---|
| **कः संहरते** | **प्राज्ञः** | |
| **केभ्यः संहरते** | | **सर्वशः** |
| **कानि संहरते** | | |

***



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com


# पञ्चमः पाठः । अथातो रसजिज्ञासा ।

**भूमिका –** खाद्यसंस्कृतिप्रधाने अस्मिन् युगे सर्वे वयं खाद्यरससेवने आकण्ठं निमग्नाः । किन्तु योग्यतया सेवनेन रसानां के लाभाः, अयोग्यतया सेवनेन तेषां के च दुष्परिणामाः भवन्ति इति विषये जागृतिः न दृश्यते । एतद्विषये युववर्गे जागरूकता भवेत् इति हेतुना एषा 'रसजिज्ञासा' अत्र समाविष्टा ।

आयुर्वेदाचार्याणां चरकसुश्रुतवाग्भटानां ग्रन्थाः 'बृहत्त्रयी' इति नाम्ना ख्याताः । वाग्भटाचार्यः अष्टाङ्गसङ्ग्रहस्य तथा च अष्टाङ्गहृदयस्य रचनाकारः । अष्टाङ्गसङ्ग्रहे षट् स्थानानि (विभागाः) सन्ति । सूत्र-शारीर-निदान-चिकित्सा-कल्प-उत्तरस्थानानीति । एतेषु आयुर्वेदस्य अष्टौ अङ्गानि व्याख्यातानि ।


प्रथमे सूत्रस्थाने अष्टादशोऽध्यायः रसभेदीयोऽध्यायः । शरीरे रसानां के सुपरिणामाः विपरीताः परिणामाः च भवन्ति, रसानां कानि कार्याणि सन्ति इति विस्तरेण व्याख्यातम् ।

ग्रन्थ एषः रचनाकारस्य शास्त्रज्ञानं तथा च शास्त्ररचनाचातुर्यं प्रकटीकरोति ।



अथातः रसभेदीयमध्यायं व्याख्यास्यामः । षोढा पृथग्विपरिणमते मधुरादिभेदेन । तेषां स्वादुरास्वाद्यमानो मुखमुपलिम्पति । इन्द्रियाणि प्रसादयति, देहं प्रह्लादयति, षट्पदपिपीलिकानामिष्टतमः । अम्लस्तु जिह्वामुद्वेजयति, उरःकण्ठं विदहति, मुखं स्रावयति, अक्षिभ्रुवं सङ्कोचयति, दर्शनाद्धर्षयति रोमाणि च । लवणो मुखं विष्यन्दयति, कण्ठकपोलं विदहति, अन्नं प्ररोचयति । तिक्तो विशदयति वदनं, विशोधयति कण्ठं, प्रतिहन्ति रसनम् । कटुको भृशमुद्वेजयति जिह्वाग्रं, चिमचिमायति कण्ठकपोलं, स्रावयति मुखाक्षिनासिकं, विदहति देहम् । कषायस्तु जडयति जिह्वां, बध्नाति कण्ठं, पीडयति हृदयम् ।

तत्र मधुरः रसः बल-वर्ण-इन्द्रिय-त्वक्-केश-कण्ठहितः, प्रीणनः, मूर्च्छातृष्णाप्रशमनः, स्निग्धः, शीतो, मृदुर्गुरुश्च । एवंगुणोऽपि स अत्युपयुज्यमानः लोचनगदान् चावहेत् । अम्लः शीतस्पर्शो बोधयतीन्द्रियाणि, रोचनः, पाचनः, दीपनः, स्निग्धो, हृद्यश्च । जनयति शिथिलत्वं सेवितः सोऽति देहे कफ-पाण्डुता-रुग्विघातान् । लवणः सर्वरसप्रत्यनीको, दीपनो, रोचनः, पाचनः, हरति पवनं, विष्यन्दयति कफं, विशोधयति स्रोतांसि । क्षत-विष-मदवृद्धिं करोति, क्षपयति बलमोजः सोऽति वा सेवनेन । तिक्तः स्वयमरोचिष्णुः, अरुचि-विष-कण्डूहरः मेध्यश्च । खर-विशद-रौक्ष्यभावैः सोऽतिसमासेवितः मूर्च्छा-ग्लानि-भ्रम-वातरोगान् परुषत्वं च कुर्यात् । कटुकः स्थौल्य-कृमि-वक्त्ररोग-कण्डूप्रशमनः, शोषयत्यन्नं, स्फुटयतीन्द्रियाणि, भिनत्ति शोणितसङ्घातम् । कुरुतेऽतिनिषेवितः स तृष्णा-मद-मूर्च्छा-वमि-मोह-देहसादान् । कषायो बलासं सपित्तं सरक्तं निहन्त्याशु अतिरुक्षः । अत्यभ्यासात् सोऽपि तृष्णाऽऽध्मानपक्षाघातादींश्च कुर्यात् ।



## वाग्विशेषः ।

१. रसभेदीयः – अध्यायस्य शीर्षकं 'रसभेदीयः अध्यायः' इति अस्ति । यतः अत्र रसानां षट् प्रकाराः वर्णिताः । अतः सः रसभेदीयः ।

२. सर्वरसप्रत्यनीकः लवणः – लवणरसस्य स्वादः इतरेषां रसानां स्वादं नाशयति । अत एव सः 'सर्वरसप्रत्यनीकः' ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३. अथातो रसजिज्ञासा – भारतीय–पारम्परिक–शास्त्रग्रन्थानां रचनायाः एकः विशेषः अस्ति । सर्वे शास्त्रग्रन्थाः 'अथातो......जिज्ञासा' इत्येवं प्रकारेण विषयम् अनुसृत्य आरभन्ते ।
यथा – 'अथातो ब्रह्मजिज्ञासा', 'अथातो धर्मजिज्ञासा' ।
तद्वत् एव एतस्य पाठस्य शीर्षकम् अस्ति 'अथातो रसजिज्ञासा ।'

## शब्दार्थः ।

| | | | |
|---|---|---|---|
| १) स्वादुः | – मधुरः, मिष्टः । | २) षोढा | – षट्प्रकारेण । |
| ३) लोचनगदः | – नेत्ररोगः । | ४) मेध्यः | – बुद्धिविवर्धकः । |
| ५) दीपनः | – जठराग्निप्रदीपनः । | ६) बलासः | – श्लेष्मा । |
| ७) रुग्विघातः | – आघातेन उत्पन्नः व्रणः । | ८) आध्मानम् | – शोथः । |
| ९) पाण्डुता | – विवर्णता, तेजोहीनता । | १०) उद्वेजयति | – उद्वेगं जनयति । |
| ११) सर्वरसप्रत्यनीकः | – सर्वरसविरोधी । | १२) प्रोचयति | – रुचिं निर्माति । |
| १३) क्षतम् | – व्रणः । | १४) विशदयति | – स्वच्छीकरोति । |
| १५) अरोचिष्णुः | – अरुचिकरः । | १६) विशोधयति | – शुद्धिं करोति । |
| १७) शोणितम् | – रुधिरम्, रक्तम् । | १८) विष्यन्दयति | – विलयनं करोति । |
| १९) सङ्घातः | – घनीभूता अवस्था । | २०) स्फुटयति | – चैतन्यं जनयति । |
| २१) शोणितसङ्घातः | – घनीभूतं रुधिरम् । | २२) चिमचिमायति | – दाहम् उत्पादयति । |
| २३) वमिः | – वमनेच्छा । | २४) क्षपयति | – नष्टं करोति । |
| २५) अम्लः | – जिह्वा–दन्तोद्वेगकारी रसविशेषः । | | |

## सन्धिविग्रहः ।

| | | | |
|---|---|---|---|
| १) सोऽपि | – सः + अपि । | २) अम्लस्तु | – अम्लः + तु । |
| ३) दर्शनाद्धर्षयति | – दर्शनात् +हर्षयति । | ४) लवणो मुखम् | – लवणः + मुखम् । |
| ५) अत्युपयुज्यमानः | – अति + उपयुज्यमानः। | ६) निहन्त्याशु | – निहन्ति + आशु । |
| ७) कषायस्तु | – कषायः + तु । | ८) एवंगुणोऽपि | – एवंगुणः + अपि । |
| ९) शोषयत्यन्नम् | – शोषयति + अन्नम् । | १०) कुरुतेऽतिनिषेवितः | – कुरुते+अतिनिषेवितः। |
| ११) चावहेत् | – च + आवहेत् । | १२) स्फुटयतीन्द्रियाणि | – स्फुटयति+इन्द्रियाणि। |
| १३) सोऽतिसमासेवितः | – सः+अतिसमासेवितः। | १४) स्वादुरास्वाद्यमानः | – स्वादुः+आस्वाद्यमानः। |
| १५) स्निग्धो हृद्यश्च | – स्निग्धः + हृद्यः + च। | १६) शीतो मृदुर्गुरुश्च | – शीतः+मृदुः+गुरुः+च। |
| १७) शीतस्पर्शो बोधयतीन्द्रियाणि | –शीतस्पर्शः+बोधयति+इन्द्रियाणि । | | |

## समासविग्रहः ।

१) षट्पदपिपीलिकाः – षट्पदाः च पिपीलिकाः च । इतरेतरद्वन्द्वः ।
२) अक्षिभ्रुवम् – अक्षिणी च भ्रुवौ च एतेषां समाहारः । समाहारद्वन्द्वः ।
३) कण्ठकपोलम् – कण्ठः च कपोलौ च एतेषां समाहारः । समाहारद्वन्द्वः ।
४) जिह्वाग्रम् – जिह्वायाः अग्रम् । षष्ठीतत्पुरुषः ।
५) शीतस्पर्शः – शीतः स्पर्शः यस्य सः । बहुव्रीहिः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

६) अरोचिष्णुः – न रोचिष्णुः । नञ्तत्पुरुषः ।
७) शोणितसङ्घातः – शोणितस्य सङ्घातः । षष्ठीतत्पुरुषः ।
८) देहसादः – देहस्य सादः । षष्ठीतत्पुरुषः ।
९) सपित्तः – पित्तेन सह । सहबहुव्रीहिः ।
१०) सरक्तः – रक्तेन सह । सहबहुव्रीहिः ।

### रूपपरिचयः ।

१) व्याख्यास्यामः – वि + आ+ ख्या (२ प.प.), लृट् , उत्तमपुरुषः, बहुवचनम् ।
२) विपरिणमते – वि + परि + नम् (१ आ.प.), लट् , प्रथमपुरुषः, एकवचनम् ।
३) उद्वेजयति – उद् + विज् (३ उ.प.), णिजन्तम् , लट् , प्रथमपुरुषः, एकवचनम् ।
४) विष्यन्दयति – वि + स्यन्द् (१ प.प.), णिजन्तम्, लट् , प्रथमपुरुषः, एकवचनम् ।

### व्याकरणविशेषः / रचनाविशेषः ।

१) णिजन्तप्रयोगः – अस्मिन् पाठे णिजन्तरचना आधिक्येन दृश्यते ।
यथा – विष्यन्दयति, प्ररोचयति, विशोधयति, स्रावयति, जनयति ।

२) ण्यन्तप्रयोगः – नाम्नां धातुरूपं विधाय कृतः ण्यन्तप्रयोगः (नामधातवः) अपि संस्कृतस्य विशेषः । यथा 'चिमचिमायति'। 'चिमचिम' इति ध्वन्यनुकारिशब्दः 'दाहभावनां' दर्शयितुम् उपयुज्यते । चिमचिमम् उत्पादयति – चिमचिमायति ।

## भाषाभ्यासः ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) षोढा पृथग्विपरिणमते मधुरादिभेदेन ।
२) तिक्तो विशदयति वदनम् ।
३) कषायस्तु जडयति जिह्वाम् ।
४) अम्लः शीतस्पर्शो बोधयतीन्द्रियाणि रोचनः पाचनः दीपनः स्निग्धो हृद्यश्च ।

**२. पूर्णवाक्येन उत्तरत ।**

१) रसः कतिधा विपरिणमते?
२) मधुरः रसः केषाम्/कासाम् इष्टतमः?
३) मधुररसः कस्य प्रशमकः?
४) मधुररसः लोचनगदान् कदा आवहति?
५) सर्वरसविरोधी रसः कः?
६) लवणस्य अतिसेवनेन किं क्षीयते?
७) कः रसः अन्नं शोषयति?
८) कषायस्य अत्यभ्यासात् किं भवति?

**३. उचितं कारणं चित्वा वाक्यानि पुनर्लिखत।**

**१) रसः पृथग्विपरिणमते, यतः ...**

१) तस्य मधुरादिभेदाः सन्ति । २) सः आस्वाद्यमानः अस्ति ।

**२) तिक्तः अतिसमासेवितः परुषत्वं करोति, यतः ...**

१) तस्मिन् खरविशदरौक्ष्यभावाः सन्ति । २) सः वातरोगान् करोति ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३) मधुररसः मूर्च्छातृष्णाप्रशमनः, यतः ...

१) सः प्रीणनः अस्ति।

२) सः स्निग्धः शीतः च अस्ति।

४. वाक्यं सत्यं असत्यं वा लिखत ।

१) स्वादुः षट्पदपिपीलिकानामनिष्टतमः।

२) अम्लः उरःकण्ठं विदहति।

३) कटुकः प्रतिहन्ति रसनम् ।

४) कषायः हृदयपीडकः ।

५) मधुरस्य अभावः लोचनगदान् आवहति।

६) यदा लवणः अतिसेवितः तदा सः क्षत-विष-मदान् क्षपयति ।

७) कटुकः कण्डूवर्धकः ।

५. समानार्थकशब्दान् लिखत ।

मुखम् , जिह्वा, देहः, षट्पदः, अक्षि, मृदुः, स्वादुः, तृष्णा, गदः, बलासः, आध्मानम् , शोणितम् , विषम् , पवनः

६. विरुद्धार्थकशब्दान् लिखत ।

मृदुः, गुरुः, शिथिलत्वम् , विषम् , अरुचिः

७. विशेषण-विशेष्याणां मेलनं कुरुत ।

| अ | ब |
|---|---|
| १) आस्वाद्यमानः | लवणः |
| २) कण्ठहितः | तिक्तः |
| ३) सर्वरसप्रत्यनीकः | अम्लः |
| ४) अरोचिष्णुः | मधुरः |
| ५) अतिरुक्षः | कटुकः |
| ६) हृद्यः | स्वादुः |
| ७) वक्त्ररोगकण्डूप्रशमनः | कषायः |

८. सूचनानुसारं परिवर्तनं कुरुत ।

१) अम्लः उरः कण्ठं विदहति । (वाच्यपरिवर्तनं कुरुत ।)

२) तिक्तः रसनं प्रतिहन्ति । (वाच्यपरिवर्तनं कुरुत ।)

३) अथातः रसभेदीयमध्यायं व्याख्यास्यामः । (एकवचने परिवर्तयत ।)

९. लकारपरिवर्तनं कुरुत ।

१) अथातः रसभेदीयमध्यायं व्याख्यास्यामः। (लङ्-लकारे परिवर्तयत ।)

२) मधुररसः लोचनगदान् चावहेत् । (लृट्-लकारे परिवर्तयत ।)

३) तिक्तः शोणितसङ्घातं भिनत्ति । (विधिलिङ्-लकारे परिवर्तयत।)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com


४) कषाय: बलासं निहन्ति । (लृट्-लकारे परिवर्तयत।)
५) कषाय: अत्यभ्यासात् तृष्णाऽऽध्मानपक्षाघातादींश्च कुर्यात् । (लट्-लकारे परिवर्तयत ।)

**१०. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।**

१) स्वादुरस: इन्द्रियाणि प्रसादयति । (तद्)
२) कषाय: जिह्वां जडयति । (तद्)
३) लवण: स्रोतांसि विशोधयति । (तद्)
४) अतिसमासेवित: स: परुषत्वं कुर्यात् । (तिक्त)
५) अत्यभ्यासात् स: अपि पक्षाघातादीन् च कुर्यात् । (कषायरस)


**११. पृथक्करणं कुरुत ।**

**(अ) जालरेखाचित्रं पूरयत ।**




**(आ) वृक्षरेखाचित्रं पूरयत ।**

१)






Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२) **स्वादुः**

- मुखम् – [ ]
- [ ] – प्रसादयति
- [ ] – प्रह्लादयति
- षट्पदपीपिलिकानाम् – [ ]

३) **कटुकः**

- जिह्वाग्रं – [ ]
- कण्ठकपोलं – [ ]
- मुखाक्षिनासिकं – [ ]
- देहम् – [ ]

**उपक्रमः** – स्वस्य सन्तुलित आहार-नियोजन-कोष्टकं कृत्वा तत्र के रसाः न्यूनाः इति लिखत ।

***

**कथारञ्जनी**

एकः धनिकः । तस्य विशालं गृहम् । अपारम् ऐश्वर्यम् किन्तु सुखं नास्ति । सर्वदा चिन्ता । तस्य गृहस्य पार्श्वे एकस्य निर्धनस्य कुटीरम् । तत् जीर्णम् । निर्धनस्य गृहे धनं नास्ति । प्रतिदिनं भोजनं नास्ति ।

एकः मध्याह्नः । निर्धनस्य भोजनं नास्ति । तथापि सः सन्तोषेण गायति । एतत् धनिकः शृणोति । सः पृच्छति – ''भवतः धनं नास्ति । भोजनं नास्ति । तथापि सन्तोषः अस्ति । मम धनम् अस्ति । ऐश्वर्यम् अस्ति। तथापि सन्तोषः नास्ति । एतत् किमर्थम् ?'' इति ।

तदा निर्धनः वदति – '' महोदय ! एषः वसन्तकालः । सर्वत्र सौन्दर्यम् । अहं तत् पश्यामि । गायामि। यत् 'अस्ति' तत् अहं पश्यामि । अतः सन्तोषेण गायामि । भवान् यत् 'नास्ति' तत् पश्यति ।'' एवं निर्धनस्य वचः श्रुत्वा धनिकः प्राकृतिकं सौन्दर्यम् अनुभवन् चिन्तां त्यक्तवान् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

द्वितीयमण्डलम् ।

# सङ्कलितभाषाभ्यासः -२

१. **गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**क) अवबोधनम् ।**

**१) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

भारतीयजनसञ्चारसंस्थाद्वारा संस्कृतपत्रकारिता-अभ्यासक्रमः आरब्धः । यतः ...

प) युवकाः वृत्तिरूपेण संस्कृत-पत्रकारितां स्वीकुर्वन्तु ।

फ) 'संस्कृतम्' प्राचीनभाषा अस्ति ।

**२) पूर्णवाक्येन उत्तरत ।**

'वार्तावलिः' इत्येतस्य कार्यक्रमस्य के द्वे वैशिष्ट्ये?

**३) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।**

आधुनिकसमाजमाध्यमेषु संस्कृतस्य उपयोजनं नास्ति ।

**४) एषः गद्यांशः कस्मात् पाठात् उद्धृतः?**

संस्कृतमाध्यमेन पत्रकारिता शनैः शनैः प्रगतिपथम् अगच्छत् । ऑगस्टमासस्य एकविंशतितमे दिने चतुर्नवनवैकतमे ख्रिस्ताब्दे (२१ ऑगस्ट १९९४) दूरदर्शनेन साप्ताहिकं संस्कृतवार्तापत्रं प्रसारितम्। साम्प्रतं दूरदर्शनद्वारा प्रतिसप्ताहं प्रसार्यमाणः 'वार्तावलिः' इति कार्यक्रमः विशेषोल्लेखनीयः। तस्य आशयवैविध्यं रोचकं प्रस्तुतीकरणं च प्रेक्षकान् रञ्जयतः ।

एवं संस्कृतमाध्यमेन पत्रकारितायाः मार्गक्रमणं लक्षणीयम् । संस्कृतभाषा न केवलं पुराणकथाविषये सीमिता अपि तु आधुनिककाले प्रचलिताः सर्वे विषयाः संस्कृतभाषया वर्णयितुं शक्याः। अतः नैके जनाः संस्कृतपत्रकारितया संस्कृतं प्रति आकृष्टाः । संस्कृतेन पत्रकारितां युवकाः वृत्तिरूपेण अपि स्वीकर्तुं शक्नुवन्ति इति विचारेण भारतीय-जनसञ्चार-संस्था (IIMC) द्वारा संस्कृत-पत्रकारिता-अभ्यासक्रमः अपि आरब्धः। आधुनिकसमाजमाध्यमेषु अपि संस्कृतस्य उपयोजनं बहुशः दृश्यते । तत्कृते संस्कृतज्ञानाम् आवश्यकता वर्तते। अतः संस्कृतज्ञानां युवकानां कृते विस्तृतं कार्यक्षेत्रम् उपलब्धम् ।

**ख) शब्दज्ञानम् ।**

**१) अधोरेखितशब्दस्य कृते प्रश्ननिर्माणं कुरुत ।**

<u>संस्कृतज्ञानां</u> युवकानां कृते विस्तृतं कार्यक्षेत्रम् उपलब्धम् ।

**२) विशेषणे लिखत ।**

.............. , .............. विषयाः ।

**३) गद्यांशे आगते हेत्वर्थक-धातुसाधित-अव्यये लिखत ।**

२. **माध्यमभाषया वाक्यं ससन्दर्भं स्पष्टीकुरुत ।**

१) तिक्तो विशदयति वदनम् । २) संस्कृतभाषायाः प्रसारः इत्यपि एतासां पत्रिकाणाम् उद्दिष्टम् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३. **पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**क) अवबोधनम् ।**

१. पूर्णवाक्येन उत्तरत । गर्भः केन आवृतः ?

२. एतेन ज्ञानम् आवृतम् । (सर्वनामस्थाने 'काम' प्रयुज्य वाक्यं पुनर्लिखत ।)

३. एषः पद्यांशः कस्मात् पाठात् उद्धृतः ?

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा । कामरूपेण कौन्तेय दुष्पूरेणानलेन च ।।
धूमेनाव्रियते वह्निर्यथादर्शो मलेन च । यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ।।
इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते । एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ।।
कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् । इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ।।

**ख) शब्दज्ञानम् ।**


१. विशेषणद्वयं लिखत । ........., ........ अनलेन

२. द्वे पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्यये चिनुत ।

३. पद्यांशतः द्वौ समानार्थकौ शब्दौ चिनुत । अग्निः- ............... , ............... ।


४. **पृथक्करणम्-वृक्षरेखाचित्रं पूरयत ।**

कुलित्थ-माष-निष्पाव-तुवरी-चणकादयः । शूर्पेण शोधयेत् सम्यक् मुद्गादीन्वितुषीकृतान् ।।




५. **पृथक्करणम्-जालरेखाचित्रं पूरयत ।**

अयं रुचिकरात्सूपः रुच्यः पित्तविनाशकः ।
सर्वैर्गुणैस्समाविष्टो लघुरूपो निरामयः ।।




६. **अन्वयपूर्तिं कुरुत ।**

कर्मेन्द्रियाणि संयम्य ............... मिथ्याचारः स उच्यते ।

**अन्वयः** : - यः ............ संयम्य ............ इन्द्रियार्थान् (एव) स्मरन् ....... , सः विमूढात्मा ........... (इति बुधैः) उच्यते ।

७. **माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) वस्त्रगर्भाभिरन्याभिः पिधाय परिपाचयेत् । २) मूढः परप्रत्ययनेयबुद्धिः ।

८. **माध्यमभाषया सरलार्थं लिखत ।**

उपकारान् स्मरेन्नित्यम् अपकारांश्च विस्मरेत् । शुभे शैघ्र्यं प्रकुर्वीत अशुभे दीर्घसूत्रता ।।
सुखं शेते सत्यवक्ता सुखं शेते मितव्ययी । हितभुक् मितभुक् चैव तथैव विजितेन्द्रियः ।।
सम्भ्रमः स्नेहमाख्याति वपुराख्याति भोजनम् । विनयो वंशमाख्याति देशमाख्याति भाषितम् ।।
षट्पदः पुष्पमध्यस्थो यथा सारं समुद्धरेत् । तथा सर्वेषु शास्त्रेषु सारं गृह्णन्ति पण्डिताः ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



# साहित्यपरिचयः ।

## संस्कृतवाङ्मयम्–

संस्कृतभाषायां विपुलं वाङ्मयं प्रसिद्धम् । तद् अस्माकं राष्ट्रस्य अमूल्यं सञ्चितम् । वाङ्मयं द्विप्रकारकम् – वैदिकवाङ्मयं तथा लौकिकवाङ्मयम् ।

### वैदिकवाङ्मयम् ।

'विद् ज्ञाने' इति धातोः जातस्य वेदशब्दस्य अर्थः 'ज्ञानस्य सङ्ग्रहः' । वैदिकवाङ्मयम् अतीव पुरातनम्। तस्मिन् प्राचीनभारतस्य इतिहासः, जीवनपद्धतिः, समाजव्यवस्था, संस्कृतिः तथा तत्त्वज्ञानम् एतत् सर्वं प्रतिबिम्बितं दृश्यते । लेखनकलायाः उद्गमात् प्राक् मौखिकपरम्परया एतद् वाङ्मयं प्रचलितं संरक्षितं च। वैदिकवाङ्मयस्य चत्वारः विभागाः संहिता, ब्राह्मणम्, आरण्यकं तथा उपनिषद् इति ।

१. **संहिता –** संहिता नाम मन्त्राणां सङ्ग्रहः । संहिताः चतस्रः – ऋग्वेदः, यजुर्वेदः, सामवेदः तथा अथर्ववेदः इति ।

अ. **ऋग्वेदः –** ऋचां वेदः ऋग्वेदः । ऋक् नाम छन्दोबद्धा रचना । ऋक् इति ऋग्वेदस्य लघुतमम् एककम्। ऋग्वेदे १०५८० ऋचः सन्ति । नैकासाम् ऋचां समुच्चयः सूक्तम् । ऋग्वेदे १०२८ सूक्तानि दशसु मण्डलेषु (विभागेषु) विभाजितानि । ऋषिभिः तथैव ऋषिकाभिः विरचितेषु सूक्तेषु अग्निः, वायुः, उषस्, पर्जन्यः, द्यावापृथिवी इत्यादिरूपेण मुख्यतया निसर्गशक्तयः स्तुताः । तत्र बहूनि सूक्तानि देवतास्तुतिपराणि सन्ति। कानिचन कथासूक्तानि, संवादसूक्तानि, तत्त्वज्ञानसूक्तानि अपि सन्ति । मण्डूकसूक्तं, पर्जन्यसूक्तम्, अक्षसूक्तम् इत्यादीनि सूक्तानि रुचिरकाव्यरूपाणि सन्ति । ऋग्वेदे नैकानि सुभाषितानि अपि दृश्यन्ते । यथा – 'एकं सद् विप्रा बहुधा वदन्ति', 'अक्षैर्मा दीव्यः कृषिमित् कृषस्व', 'न स सखा यो न ददाति सख्ये', 'न ऋते श्रान्तस्य सख्याय देवाः' इति । ऋग्वेदस्य केवलं 'शाकल' इति एका एव शाखा उपलभ्यते।

आ. **यजुर्वेदः –** 'यजुस्' नाम यज्ञविषयकाः गद्यमन्त्राः। तेषां सङ्ग्रहः यजुर्वेदः । यजुर्वेदस्य द्वे शाखे कृष्णयजुर्वेदः शुक्लयजुर्वेदः च । यजुर्वेदे यज्ञस्य महत्त्वं वर्णितम् । यज्ञः नाम कृतज्ञभावेन देवतानां कृते अग्नौ आहुतिसमर्पणम्। यज्ञस्य प्रकाराः, तेषु करणीयाः क्रियाः, तेषु पठनीयाः मन्त्राः एतत् सर्वं यजुर्वेदे कथितम्। तत्र वनस्पतिविशेषाः, प्राणिविशेषाः, खगविशेषाः एतेषां नामानि उपलभ्यन्ते । सुवर्णकार कुम्भकार–रथकार–व्याध–आदीनां विभिन्नकर्मकराणाम् अपि उल्लेखाः सन्ति । कानिचन प्रश्नोत्तराणि, कूटानि अपि दृश्यन्ते ।

इ. **सामवेदः –** ऋग्वेदमन्त्रस्य सङ्गीतमयम् उच्चारणं नाम साम । विभिन्नयागेषु उपयुज्जानानां साम्नां समुच्चयः नाम सामवेदः । सर्वासु संहितासु सामवेदसंहिता लघुतमा । सामवेदस्य तिस्रः शाखाः उपलब्धाः – जैमिनीयशाखा, कौथुमशाखा तथा राणायनीयशाखा इति । भारतीयसङ्गीतस्य मूलस्रोतः सामवेदः ।

ई. **अथर्ववेदः –** अथर्ववेदः सामान्यजनानां वेदः । जनाः ऐहिकजीवने विविधानां कामनानां पूर्तिम् इच्छन्ति। तत्कृते योजिताः मन्त्राः अथर्ववेदे सङ्कलिताः । आरोग्य–शान्ति–सामञ्जस्य–समृद्धि–आदीनां प्राप्त्यर्थम् अत्र सूक्तानि सन्ति । 'भैषज्यानि' इति आरोग्यविषयकसूक्तानां विभागः वर्तते । सः आयुर्वेदस्य मूलस्रोतः। विवाहः, कुटुम्बस्य सुखं, व्याधिनिवारणं, प्रायश्चित्तं, शत्रुविनाशः, कृषिपशुपालनादिषु यशः, राजधर्मः, यातुविधानं (magic/जादूटोणा), तत्त्वज्ञानम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

इति विभिन्नाः विषयाः अथर्ववेदे दृश्यन्ते। तत्र मातृभूमिसूक्तम् अतीव प्रसिद्धम्। अथर्ववेदस्य द्वे शाखे-शौनकशाखा तथा पैप्पलादशाखा। तत्र विंशतिकाण्डेषु ७३१ सूक्तानि वर्तन्ते।

२. **ब्राह्मणग्रन्थाः –** ब्रह्म नाम यज्ञः वा पुरोहितः वा। पुरोहितैः यज्ञविषये याः चर्चाः कृताः ताः ब्राह्मणग्रन्थेषु सङ्गृहीताः। यज्ञेषु याः क्रियाः, ये मन्त्राः आवश्यकाः, तेषां स्पष्टीकरणं ब्राह्मणग्रन्थेषु वर्तते। तत्र विविधाः कथाः विभिन्नानि आख्यानानि च वर्तन्ते। 'ब्राह्मणग्रन्थाः नाम यज्ञस्य ज्ञानकोषः' इति वक्तुं शक्यम्।

३. **आरण्यकम् –** अरण्येषु स्थितैः तत्त्वचिन्तकैः यज्ञस्य तत्त्वार्थविषये यत् चिन्तनं कृतं, तत् सर्वं आरण्यकग्रन्थेषु सङ्कलितम्। एषु ग्रन्थेषु कर्म तथा ज्ञानम् एतयोः संयोगः दृश्यते। सृष्टिनिर्मितिः, प्राणविद्या, ओङ्कारसाधना इत्यादयः विषयाः अत्र चर्चिताः।

४. **उपनिषद् –**

'उपनिषद्' (उप+नि+सद्) इति शब्दस्य अर्थः समीपे उपवेशनम्। शिष्येण गुरोः समीपं गत्वा यद् गुह्यं ज्ञानं प्राप्तव्यं, तद् उपनिषत्सु सङ्गृहीतम्। यज्ञीयकर्मकाण्डात् परं गत्वा सृष्टेः मूलतत्त्वम् अवगन्तुं कृताः प्रयासाः अत्र दृश्यन्ते। सृष्टिः कथम् उत्पन्ना, सृष्टेः कार्यं कथं प्रचलति, सृष्टौ मनुष्यस्य कीदृशं स्थानं, जन्ममृत्यू कीदृशौ, मृत्योः अनन्तरं मनुष्यस्य का गतिः, कथं मृत्योः परं गन्तव्यम् इत्यादीनां प्रश्नानाम् उत्तराणि अन्वेष्टुं कृताः प्रयत्नाः अत्र दृश्यन्ते। 'एकः एव आत्मा सर्वेषु भूतेषु वर्तते' इति उपनिषदः उपदिशन्ति। उपनिषद् नाम भारतीयतत्त्वज्ञानस्य मूलं 'वेदान्त' इति नाम्ना अपि प्रसिद्धम्। प्रमुखाः दश उपनिषदः सन्ति-

**ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः।**
**छान्दोग्यम् ऐतरेयं च बृहदारण्यकं तथा ॥**

ब्राह्मणं कर्मकाण्डम् इति स्मृतम्, आरण्यकम् उपासनाकाण्डं तथा उपनिषद् ज्ञानकाण्डम् इति नाम्ना प्रसिद्धम्।

**वेदसंहिताः तथा तत्सम्बद्धाः ब्राह्मण-आरण्यक-उपनिषदः एतेषां तालिका अत्र विद्यते –**

| अ.क्र. | संहिता | ब्राह्मणम् | आरण्यकम् | उपनिषद् |
|---|---|---|---|---|
| १ | ऋग्वेदः | ऐतरेयम्, शाङ्खायनम् | ऐतरेयम्, शाङ्खायनम् | ऐतरेयम्, कौषीतकी |
| २ | शुक्लयजुर्वेदः | शतपथम् | बृहदारण्यकम् | बृहदारण्यकम्, ईशः इ. |
| ३ | कृष्णयजुर्वेदः | तैत्तिरीयम् | तैत्तिरीयम्, मैत्रायणी | तैत्तिरीयम्, मैत्रायणी, कठः इ. |
| ४ | सामवेदः | ताण्ड्यम्, षड्विंशम् तवल्कारः | छान्दोग्यम् तवल्कारः | छान्दोग्यम्, केन इ. |
| ५ | अथर्ववेदः | गोपथम् | – | मुण्डकम्, माण्डूक्यम्, प्रश्नः इ. |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### ५. वेदाङ्गानि –

वेदवाङ्मयस्य षड् अङ्गानि नाम वेदाङ्गानि । वेदानां संपूर्णज्ञानार्थं रचितानि । तद्विषयकं प्रसिद्धं सुभाषितम् –

**छन्दः पादौ तु वेदस्य हस्तौ कल्पान् प्रचक्षते ।**
**ज्योतिषं चक्षुर्वेदस्य निरुक्तं श्रोत्रमुच्यते ।।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।**

१. **शिक्षा** – शिक्षा नाम उच्चारणशास्त्रम् । स्वरवर्णादिकानां यथायोग्यम् उच्चारणं यत्र शिक्ष्यते उपदिश्यते सा शिक्षा । उच्चारणविषये वैज्ञानिकी विचारपद्धतिः अत्र दृश्यते । भारतीयभाषाविज्ञानस्य मूलम् अत्र दृश्यते । नारदीयशिक्षा, पाणिनीयशिक्षा इत्यादयः शिक्षाग्रन्थाः प्रसिद्धाः ।

२. **कल्पः** – कल्पः नाम विधिः, कर्म अथवा नियमः । कल्पस्य चत्वारः विभागाः तथा तेषां मुख्यविषयाः ईदृशाः –
श्रौतसूत्रम् → वेदेषु प्रसिद्धाः यज्ञयागाः
गृह्यसूत्रम्→ संस्काराः, पञ्च महायज्ञाः
धर्मसूत्रम्→ सामाजिकव्यवहारः, नीतिशास्त्रम्, राज्यव्यवस्था
शुल्बसूत्रम् → भूमितिशास्त्रम्, गणितशास्त्रम्

३. **निरुक्तम्** – निरुक्तं नाम व्युत्पत्तिशास्त्रम् । तद् यास्काचार्येण विरचितम् । वैदिकशब्दानां व्युत्पत्तयः यदा अवगम्यन्ते तदा तेषाम् अर्थः सुलभतया ज्ञायते । वैदिकशब्दानां सङ्ग्रहः 'निघण्टु' इति नाम्नि शब्दकोषे वर्तते । तेषां शब्दानां स्पष्टीकरणं निरुक्तग्रन्थे प्राप्यते ।
उदा. प्रथनात् पृथिवी .......... ।

४. **व्याकरणम्**– येन शब्दः व्याक्रियते तद् व्याकरणम् । वर्णपरिचयः, शब्दानां रूपसिद्धिः, वाक्यसंरचना इत्यादयः अत्र प्रमुखाः विषयाः । अष्टाध्यायी इति व्याकरणस्य परिपूर्णः ग्रन्थः, पाणिनिः तस्य रचयिता ।

५. **छन्दः** – वेदः नाम छन्दोमयी वाणी इति उच्यते । वैदिकपद्ये मन्त्राः विविधच्छन्दस्सु रचिताः, तद्विषयकं शास्त्रं छन्दःशास्त्रम् । पिङ्गलाचार्यः तस्य रचयिता ।

६. **ज्यौतिषम्** – ज्योतिः नाम आकाशस्थाः तारकाः । तद्विषयकम् एतत् शास्त्रं खगोलशास्त्रम् इति प्रसिद्धम् । ग्रहाणां स्थानानि, ग्रहणं, पृथिव्याः परिभ्रमणम्, कालज्ञानं, ग्रहतारकाणां स्थितिः, एते तस्य प्रमुखविषयाः । लगधाचार्यः तस्य रचयिता ।

## पुराणानि

'पुरा अपि नवं भवति' नाम प्राचीनं भूत्वा अपि नित्यनूतनं भासते तद् पुराणम् । पुराणानि सामान्यजनान् प्रति वेदानां सारं वर्णयन्ति । सुहृद्वत् उपदिशन्ति । सृष्टिनिर्मितिः, सृष्टिविनाशः, प्राचीनानि आख्यानानि, उपदेशपराणि वर्णनानि, नृपाणां वंशावलिः, कालपरिगणना एते पुराणानां प्रमुखविषयाः । कथारूपेण भक्तिमार्गस्य उपदेशः अत्र दृश्यते । पुराणानां रचयिता व्यासः इति परम्परा कथयति । अष्टादश प्रमुखानि पुराणानि सन्ति –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**म–द्वयं भ–द्वयं चैव ब्र–त्रयं व–चतुष्टयम् ।**
**अ–ना–प–लिं–ग–कू–स्कानि पुराणानि प्रचक्षते ।।**

**म–द्वयम्** – **मत्स्यपुराणम्, मार्कण्डेयपुराणम्**

**भ–द्वयम्**–**भविष्यपुराणम्, भागवतपुराणम्**

**ब्र–त्रयम्**–**ब्रह्मपुराणम्, ब्रह्मवैवर्तपुराणम्, ब्रह्माण्डपुराणम्**

**व–चतुष्टयम्**–**वराहपुराणम्, वामनपुराणम्, वायुपुराणम्, विष्णुपुराणम्,**

**अ– अग्निपुराणम्**

**ना – नारदपुराणम्**

**प – पद्मपुराणम्**

**लि – लिङ्गपुराणम्**

**ग – गरुडपुराणम्**

**कू – कूर्मपुराणम्**

**स्क – स्कन्दपुराणम्**

## आर्षमहाकाव्ये


ऋषिणा रचितं महाकाव्यं नाम आर्षमहाकाव्यम् । ते द्वे–रामायणं महाभारतं च । रामायणस्य कर्ता आदिकविः वाल्मीकिः । रामायणं नाम रामस्य अयनं, जीवनक्रमः । तत्र सप्त काण्डानि (विभागाः), तेषु २४००० पद्यानि सन्ति ।

भरतवंशीयाः राजानः यत् परस्परम् अयुध्यन्त, तस्य युद्धस्य महती गाथा नाम महाभारतम् । महर्षिः व्यासः तस्य रचयिता । अयं ग्रन्थः पूर्वं जयः नाम इतिहासः इति प्रसिद्धः आसीत् । तत्र अष्टादश पर्वाणि (विभागाः) सन्ति, तेषु **एकलक्ष**श्लोकाः वर्तन्ते । महाभारते एव भीष्मपर्वणि भगवद्गीता विद्यते ।

रामायणमहाभारताधारितानि बहूनि काव्यनाटकानि संस्कृतभाषायां तथा अन्यासु भारतीयभाषासु अपि वर्तन्ते। भारताद् बहिः अपि रामायणकथाः तथा महाभारतकथाः प्रचलिताः ।

## लौकिकसाहित्यम्

लौकिकसाहित्यं द्विप्रकारकम्–श्रव्यसाहित्यं तथा दृक्श्रव्यसाहित्यम् । दृक्श्रव्यं साहित्यं नाम नाटकम् । तद्विषयकं विवरणम् अग्रिमे वर्षे भविष्यति ।






Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**गद्यवाङ्मयम् –** गद्यलेखनं नाम कवीनां निकषम् इति उच्यते । गद्यकाव्यस्य आख्यायिका कथा च इति विभागद्वयम् । तत्र आख्यायिका इतिहासपुराणाधारिता । यथा बाणभट्टस्य हर्षचरितम् । कथा तु कविकल्पनाधारिता । कथासाहित्यस्य मूलं वैदिकसाहित्ये एव वर्तते । कथासाहित्यस्य विभागाः तथा तेषाम् उदाहरणानि तालिकायां दर्शितानि ।

**कथासाहित्यम्**

- **धार्मिककथा**
  - जातककथा
  - अवदानकथा
  - जैनकथा
- **नीतिकथा**
  - पञ्चतन्त्रम् (विष्णुशर्मा)
  - हितोपदेशः (नारायणः)
- **अद्भुतकथा**
  - बृहत्कथा (गुणाढ्यः)
  - शुकसप्ततिः
  - सिंहासनद्वात्रिंशिका
  - वेतालपञ्चविंशतिः
- **विदग्धगद्यकाव्यम्**
  - दशकुमारचरितम् (दण्डी)
  - वासवदत्ता (सुबन्धुः)
  - कादम्बरी (बाणभट्टः)

**पद्यवाङ्मयम् –** पद्यं नाम गेयतायुक्तं वृत्तबद्धं काव्यम् । पद्यकाव्यस्य बहुप्रकाराः सन्ति । तत्र सर्गबन्धः (सर्गेषु विभागेषु सुविभक्तं) महाकाव्यम् । खण्डकाव्यं न अतिदीर्घम् । मुक्तककाव्यं द्विप्रकारकम्– शतककाव्यं शतश्लोकयुक्तम् । सुभाषितकाव्यं नाम अल्पाक्षरं स्वयंपूर्णं सुबोधं काव्यम् । तत्र चित्रकाव्यं, समस्यापूर्तिः, प्रहेलिकाः इत्यादयः प्रकाराः । स्तोत्रकाव्यं नाम 'स्तूयते देवता अनेन' इति । इतिहासाधारितम् ऐतिहासिककाव्यम् । पद्यप्रकाराः तेषाम् उदाहणानि च तालिकायां दर्शितानि –

**पद्यकाव्यम्**

- **महाकाव्यम्**
  - बुद्धचरितम्, सौन्दरानन्दम् – अश्वघोषः
  - रघुवंशम्, कुमारसंभवम् – कालिदासः
  - किरातार्जुनीयम् – भारविः
  - शिशुपालवधम् – माघः
  - नैषधीयचरितम् – श्रीहर्षः
- **खण्डकाव्यम्**
  - ऋतुसंहारः, मेघदूतम् – कालिदासः
  - गीतगोविन्दम् (जयदेवः)
- **शतककाव्यम्**
  - नीतिशतकम् (भर्तृहरिः)
  - अमरुशतकम् (अमरुकविः)
  - गङ्गालहरी (जगन्नाथपण्डितः)
  - सूर्यशतकम् (मयूरः)
- **स्तोत्रकाव्यम्**
  - मधुराष्टकम् (वल्लभः)
  - आत्मषट्कम्
  - अन्नपूर्णास्तोत्रम्
  - नर्मदाष्टकम् (शङ्कराचार्यः)
- **ऐतिहासिककाव्यम्**
  - विक्रमाङ्कदेवचरितम् (बिल्हणः)
  - राजतरङ्गिणी (कल्हणः)

**चम्पूकाव्यम् –** 'गद्यपद्यमयं काव्यं चम्पूः' । तत्र पद्यस्य अपेक्षया गद्यस्य प्राधान्यं वर्तते । ख्रिस्ताब्दस्य दशमशतकानन्तरं रचितानि चम्पूकाव्यानि उपलब्धानि । तेषु भोजस्य रामायणचम्पूः, अनन्तभट्टस्य भारतचम्पूः, वेङ्कटाध्वरिकवेः विश्वगुणादर्शचम्पूः, त्रिविक्रमभट्टस्य नलचम्पूः इत्यादीनि चम्पूकाव्यानि प्रसिद्धानि ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# कथाविशेषः ।

कथा कस्मै न रोचते? वाङ्मयेन सह अस्माकं परिचयः प्रायः कथाश्रवणेन एव भवति, सोऽपि बाल्ये एव वयसि । बाल्ये मनोरञ्जनार्थं, यौवने उपदेशार्थं, वार्धक्ये च सुखेन कालयापनार्थं कथाकथनं श्रवणं च मनुजाः कुर्वन्ति। सर्वासु एव भाषासु विपुलं कथासाहित्यं वर्तते । गीर्वाणवाणी अपि विविधैः कथाप्रकारैः प्रफुल्लिता । ऋग्वेदे विविधेषु सूक्तेषु कथानां बीजं दृश्यते। अक्षसूक्ते अक्षासक्तकितवस्य जीवनयात्रा वर्णिता । विश्वामित्रनदीसंवादसूक्ते विश्वामित्रऋषेः विपाट् तथा शुतुद्री एताभ्यां नदीभ्यां सह संवादस्य प्रसङ्गः चित्रितः। अन्येषु सूक्तेषु विश्पला इति वीराङ्गना, पृथुवैन्यः नाम नृपः इत्यादीनां कथाः कथिताः। यथाकालं ब्राह्मणवाङ्मये एते प्रसङ्गाः संवादाः च गद्यकथारूपं प्राप्नुवन्। ब्राह्मणग्रन्थेषु सरमापणिकथा, शुनःशेपकथा इत्यादयः नैकाः कथाः उपलभ्यन्ते। एवं ब्राह्मणवाङ्मये संस्कृतगद्यसाहित्यस्य कथावाङ्मयस्य च उद्गमः ।

अयं कथावाङ्मयप्रवाहः शनैः शनैः प्रसृतः विस्तीर्णः विविधैः रूपैः च समृद्धः । गद्यवाङ्मये 'कथा' तथा 'आख्यायिका' इति प्रकारद्वयम् । ''प्रबन्धकल्पना स्तोकसत्या'' इति कथा । कथा सर्वथा कविकल्पिता, तत्र सत्यांशः स्वल्पः, यथा बाणभट्टस्य 'कादम्बरी' । 'आख्यायिका उपलब्धार्था'। पूर्वघटिते वृत्ते संस्कारं कृत्वा, सत्यांशं तथैव रक्षयित्वा, कविकल्पनया तस्य विस्तरः यत्र भवति सा आख्यायिका यथा बाणभट्टस्य 'हर्षचरितम्' । सुबन्धुः, बाणभट्टः तथा दण्डी एते कवयः गद्यकथावाङ्मये अग्रेसराः । सुबन्धोः 'वासवदत्ता' इति प्रेमकथा प्रसिद्धा । दण्डिना दशकुमारचरितम् इति धूर्ताख्यानं लिखितम् । बाणभट्टेन कादम्बरी इति दीर्घकथां लिखित्वा साहित्ये कथाविशेषः एव निर्मितः, गद्यकथावाङ्मयस्य सौष्ठवम् उत्कर्षं नीतं च ।

नैकाः कथाः पद्यरूपेण अपि रचिताः । संस्कृतभाषा लोककथाभिः समृद्धा । लोककथानां खनिः नाम गुणाढ्येन लिखिता 'बृहत्कथा' । सप्तलक्षश्लोकान्वितः अयं कथासङ्ग्रहः मूलतः 'पैशाची' इति प्राकृतभाषया लिखितः आसीत् । स मूलग्रन्थः लुप्तः । परं तस्य द्विविधे संस्कृतसंस्करणे प्राप्येते । तेषु एकं संस्करणं नाम क्षेमेन्द्रस्य 'बृहत्कथामञ्जरी', तथा अन्यदस्ति सोमदेवस्य 'कथासरित्सागरः'। अद्भुतरसः अत्र प्रधानः। बृहत्कथामनुसृत्य अद्भुतरसेण परिपूर्णाः 'सिंहासनद्वात्रिंशिका' (विक्रमाङ्कचरितम्), 'शुकसप्ततिः', 'वेतालपञ्चविंशतिः' आदयः गद्यकथासङ्ग्रहाः उत्तरकाले श्रोतॄणां मनांसि आमोदयन् ।

कथावाङ्मयस्य अन्यतमः प्रवाहः प्राणिकथानां नीतिकथानां वा । 'पञ्चतन्त्रम्', 'हितोपदेशः' च इति ग्रन्थद्वये विद्यमानाः कतिपयाः कथाः प्रतिपदं वयं स्मरामः । पञ्चतन्त्रम् इति विष्णुशर्मणा संस्कृतभाषया निर्मितः, अग्रतो गत्वा नैकासु भाषासु अनूदितः प्राणिकथासङ्ग्रहः । अत्र पशुखगादयः मनुष्यवत् व्यवहरन्ति, मनुष्यस्वभावविशेषान् एव दर्शयन्ति । अस्य कथासङ्ग्रहस्य रचना विशिष्टा खलु । प्रत्येकं विभागे आरम्भे एका मुख्या कथा वर्तते । सा कथा नाम तस्य विभागस्य कथामुखम् । तस्याः कथायाः द्वितीया कथा प्रारभ्यते, तस्याः तृतीया कथा इति पेटिकावत् रचना अत्र दृश्यते । गद्यपद्यमयः अयं ग्रन्थः शर्करावगुण्ठितगुटिमिव आबालवृद्धान् रञ्जयति, व्यावहारिकोपदेशं च करोति ।

संस्कृतकथावाङ्मयस्य अन्यतमः विशेषः अस्ति बौद्धजैनधर्मयोः साहित्यम्। बौद्धवाङ्मये 'जातककथाः' 'अवदानकथाः' वा प्रख्याताः । भगवतः बुद्धस्य पूर्वजन्मनाम् एताः कथाः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पञ्चतन्त्रमिव अत्रापि पञ्च विभागाः, अत्रापि पशुपक्षिणां रूपेण पात्राणि क्वचित् दृश्यन्ते । सुगमतया अहिंसा, सत्यम्, कृतज्ञता इत्यादीनां मूल्यानाम् अवगमनम् जातककथाभिः भवति । जैनमुनिभिश्च ये नीतिकथासङ्ग्रहाः सङ्कलिताः लिखिताः वा तेषु 'उपमितभवप्रपञ्चकथा', 'बृहत्कथाकोषः' इत्यादयः सङ्ग्रहाः परिचिताः ।

एषा कथावाङ्मयसरित् अद्यापि पुरःसरा। नूतनविषयाधारितं वैविध्यपूर्णं कथालेखनं तथा, अन्यभाषाभ्यः प्रथितकथासाहित्यस्य संस्कृतानुवादः च इत्येतौ कथाप्रवाहौ अत्र दृश्येते । पण्डिता क्षमा रावमहोदयायाः 'कथामुक्तावली', नलिनी शुक्लामहोदयया रचितं 'कथासप्तकम्', 'कथासुमनस्सौरभम्' इति दुर्गा पारखीमहोदयायाः निर्मितिः, डॉ. शारदा गाडगेमहोदयया लिखिताः 'कथामृतम्', 'बालकथातरङ्गिणी', 'कथापुष्पमाला' इत्यादयः कथासङ्ग्रहाः सुपरिचिताः । 'चन्दमामा', 'सम्भाषणसन्देशः', 'समर्पणम्', 'संस्कृतभवितव्यम्', 'गीर्वाणसुधा' च इत्यादिषु नियतकालिकेषु अद्यतनीयविषयान् अनुसृत्य नूतनकथाः प्रकाश्यन्ते । सुधा मूर्ति-महोदयया लिखितानां पुस्तकानां 'सुज्ञा उताहो अज्ञाः', 'वदामि किञ्चिद्' इत्यादयः संस्कृतानुवादाः अपि विख्याताः । मराठीभाषायाः 'श्यामची आई' तथा प्रकाश आमटे महोदयस्य 'प्रकाशवाटा' एतयोः आत्मकथयोः अनुवादौ अपि डॉ. मञ्जूषा कुलकर्णी महोदयया कृतौ । एवं विविधैः नूतनप्रवाहैः संस्कृतकथावाङ्मयम् अविरतं नवताम् उपैति रमणीयं च भाति ।

## भाषाभ्यासः ।

**१. अ) माध्यमभाषया उत्तरं लिखत ।**

१. वेदेषु कथावाङ्मयस्य बीजं निरूपयत ।
२. कथा च आख्यायिका च अनयोः भेदं वर्णयत ।
३. संस्कृतवाङ्मये रचितानां लोककथानां निरूपणं कुरुत ।
४. संस्कृतसाहित्ये बौद्धजैनकथानां सम्यक् अवलोकनं कुरुत ।
५. संस्कृतभाषायाम् आधुनिककथावाङ्मयं कथं पुरःसरम् ?

**आ) युष्मत्पठितायाः कस्याः अपि आधुनिकसंस्कृतकथायाः रसग्रहणं अधोनिर्दिष्टान् घटकान् उद्दिश्य कुरुत ।**

१. स्रोतः २. शीर्षकम् ३. कथाविषयः ४. पात्रचित्रणम् ५. भाषावैशिष्ट्यानि ६. तात्पर्यम्

**२. माध्यमभाषया टिप्पणीं लिखत । (संस्कृतसाहित्याधारितम्)**

| | |
|---|---|
| १. ऋग्वेदः | २. यजुर्वेदः |
| ३. अथर्ववेदः | ४. उपनिषद् |
| ५. पुराणानि | ६. आर्षमहाकाव्ये |
| ७. लौकिकसाहित्यम् | ८. वेदाङ्गानि |

***



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

तृतीयमण्डलम् ।

# सङ्कलितभाषाभ्यासः - ३

## अभ्यासः-१

**१. माध्यमभाषया टिप्पणीं लिखत ।**

१) आर्षमहाकाव्ये　　२) यजुर्वेदः

**२. मेलनं कुरुत ।**

| 'अ' गणः | 'आ' गणः |
| --- | --- |
| १) रामायणचम्पूः | उच्चारणशास्त्रम् |
| २) नीतिशतकम् | महाकाव्यम् |
| ३) अष्टाध्यायी | वेदान्तः |
| ४) संहिताः | शौनकशाखा |
| ५) नैषधीयचरितम् | भोजः |
| ६) शिक्षा | पाणिनिः |
| ७) उपनिषद् | शाकलशाखा |
| ८) अथर्ववेदः | भर्तृहरिः |
| | चतस्रः |

**३. योग्यपर्यायं चित्वा वाक्यं पुनर्लिखत ।**

१) विश्वामित्रनदीसंवादे विश्वामित्रऋषेः ....... तथा ........ एताभ्यां नदीभ्यां सह संवादप्रसङ्गः चित्रितः।
(विपाट् तथा शुतुद्री, विपाट् तथा गङ्गा, गङ्गा तथा शुतुद्री)

२) उपमितभवप्रपञ्चकथादयः नीतिकथासङ्ग्रहाः ....... मुनिभिः सङ्कलिताः लिखिताः वा।
(जैन, बौद्ध, ऋषि)

३) 'बृहत्कथामञ्जरी' ग्रन्थः........रचितः ।
(गुणाढयेन, क्षेमेन्द्रेण, महावीरेण)

४) ...........सर्वथा कल्पिता ।
(ऋक्, कथा, आख्यायिका)

**४. माध्यमभाषया उत्तरत ।**

अ) वेदेषु कथावाङ्मयस्य बीजं निरूपयत ।

आ) युष्मत्पठितायाः कस्याः अपि आधुनिकसंस्कृतकथायाः रसग्रहणं अधोनिर्दिष्टान् घटकान् उद्दिश्य कुरुत।

| | |
| --- | --- |
| १. स्रोतः | ४. पात्रचित्रणम् |
| २. शीर्षकम् | ५. भाषावैशिष्ट्यानि |
| ३. कथाविषयः | ६. तात्पर्यम् |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः–२

### १. माध्यमभाषया टिप्पणीं लिखत ।

१) लौकिकसाहित्यम्  २) उपनिषद्

### २. मेलनं कुरुत ।

| 'अ' गणः | 'आ' गणः |
|---|---|
| दृक्‌श्रव्यसाहित्यम् | बाणभट्टः |
| कादम्बरी | यज्ञस्य ज्ञानकोषः |
| महाभारतम् | षट् |
| पुराणानि | दश |
| कथा | जयः |
| चम्पूकाव्यम् | नाटकम् |
| वेदाङ्गानि | अष्टादश |
| ब्राह्मणग्रन्थाः | कविकल्पनाधारिता |
| | गद्यपद्यमयम् |

### ३. योग्यपर्यायं चित्वा वाक्यं पुनर्लिखत ।

१) ........ ग्रन्थेषु सरमापणिकथा उपलभ्यते ।
(ब्राह्मण, उपनिषद्, पञ्चतन्त्र)

२) लोककथासु प्रधानः रसः ......।
(रौद्रः, अद्भुतः, हास्यः)

३) भगवतः बुद्धस्य पूर्वजन्मनां कथाः ....... ग्रन्थे आगताः ।
(कथासरित्सागरनाम्नि, दशकुमारचरितनाम्नि, कादम्बरीनाम्नि)

४) पेटिकावत् रचना ......... वैशिष्ट्यम् ।
(ऋक्कथानां, पञ्चतन्त्रस्य, हर्षचरितस्य)

### ४. माध्यमभाषया उत्तरत ।

अ) कथा च आख्यायिका च अनयोः भेदं वर्णयत ।

आ) युष्मत्पठितायाः कस्याः अपि आधुनिकसंस्कृतकथायाः रसग्रहणं अधोनिर्दिष्टान् घटकान् उद्दिश्य कुरुत।

१. स्रोतः  ४. पात्रचित्रणम्
२. शीर्षकम्  ५. भाषावैशिष्ट्यानि
३. कथाविषयः  ६. तात्पर्यम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः–३

### १. माध्यमभाषया टिप्पणीं लिखत ।

१) वेदाङ्गानि  २) पुराणानि

### २. मेलनं कुरुत ।

| 'अ' गणः | 'आ' गणः |
|---|---|
| बुद्धचरितम् | विष्णुशर्मा |
| गीतगोविन्दम् | अश्वघोषः |
| पञ्चतन्त्रम् | उपनिषद् |
| छान्दोग्यम् | ऋग्वेदः |
| निसर्गस्तुतिः | जयदेवः |
| राजतरङ्गिणी | दण्डी |
| दशकुमारचरितम् | ऐतिहासिककाव्यम् |
| वेतालपञ्चविंशतिः | अद्भुतकथा |
| | धार्मिककथा |

### ३. योग्यपर्यायं चित्वा वाक्यं पुनर्लिखत ।

१) बाल्ये ........ कथाकथनं श्रवणं च मनुजाः कुर्वन्ति ।
(उपदेशार्थं, मनोरञ्जनार्थं, सुखेन कालयापनार्थं)

२) लोककथानां खनिः नाम गुणाढ्यलिखिता ......।
(बृहत्कथा, जातककथा, जैनकथा)

३) 'सुज्ञाः उताहो अज्ञाः' अनूदितपुस्तकस्य मूललेखिका ..... महोदया ।
(सुधा मूर्ति, डॉ. मञ्जूषा कुलकर्णी, पण्डिता क्षमा राव)

४) ........ गद्यकथावाङ्मयस्य उद्गमः ।
(ब्राह्मणवाङ्मये, उपनिषद्वाङ्मये, पुराणवाङ्मये)

### ४. माध्यमभाषया उत्तरत ।

अ) संस्कृतभाषायाम् आधुनिककथावाङ्मयं कथं पुरःसरम्?

आ) युष्मत्पठितायाः कस्याः अपि आधुनिकसंस्कृतकथायाः रसग्रहणं अधोनिर्दिष्टान् घटकान् उद्दिश्य कुरुत ।

१. स्रोतः  ४. पात्रचित्रणम्
२. शीर्षकम्  ५. भाषावैशिष्ट्यानि
३. कथाविषयः  ६. तात्पर्यम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**भूमिका –** केवलं धनप्राप्तिः एव मानवजीवनस्य लक्ष्यं न भवेत् । 'धनमेव सर्वस्वम्' इति कदापि न चिन्तनीयम्। धनार्जनसमये अपि नीतिः रक्षणीया । 'शीलं परं भूषणम्' इति मनसि निधाय मानवाः धनार्जनं कुर्युः इति संदेशदात्री एषा कथा । गतषष्टिवर्षेभ्यः बालकानां मनस्सु अधिराज्यं करोति 'चन्दमामा' नाम मासिकपत्रम् । चेन्नईनगरात् त्रयोदशसु भाषासु प्रकाशितम् एतत् मासिकपत्रम् । विंशतिवर्षाणि यावत् तस्य संस्कृत-आवृत्तिः प्रकाशिता । अधुना अपि एतेषु मासिकपत्रेषु प्रकाशिताः विविधाः जीवनमूल्यप्रदर्शिकाः कथाः बालकान् तथा ज्येष्ठान् अपि रञ्जयन्ति । पञ्चाधिकद्विसहस्रतमे वर्षे जानेवारीमासस्य अङ्के (जानेवारी २००५) प्रकाशितकथायाम् अस्य पाठस्य बीजम् अस्ति ।

एषा कथा अस्मान् शिक्षयति यत् 'अधिकधनलोभेन कदापि कस्यापि च वञ्चना न करणीया । आत्मसम्मानः च रक्षणीयः' । विशेषतः वाणिज्य-व्यवस्थापनक्षेत्रे एतत् सुष्ठु अवधेयम् ।

दुर्गापुरनगरे रामपालः शिवदासश्च द्वौ प्रमुखौ वणिजौ । प्रबलयोः तयोः वाणिज्ये महती स्पर्धा आसीत्। कदाचित् कश्चन युवा शिवदासमागतः ।



कार्यमग्नः शिवदासः किञ्चित् समयानन्तरं तं युवानं पृष्टवान् 'को भवान् ? किमागमनकारणम् ?' इति। तदा सः तरुणः उक्तवान् – 'महोदय, मम नाम सौरभः । रामपालस्य कार्यालये कार्यं करोमि स्म । तत्र दीयमानं वेतनं न्यूनम् अपर्याप्तं वर्तते । तद् मया वारं वारं सूचितं, दर्शितं याचितमपि । परं ..... । हं ...... न कोऽपि लाभः । अतः भवतः कार्यालये वृत्तिः लभ्येत इति मत्वा तत् कार्यं त्यक्त्वा अत्रागतोऽस्मि ।'

'हं ...... तर्हि भवतु, अत्र अधिकवेतनेच्छया आगतः भवान् खलु। परम् अत्रापि भविष्यत्काले यदि वेतनं न्यूनं भासेत तर्हि अधिकवेतनं याचिष्यते एव खलु भवान्' इति शिवदासः उक्तवान्। तदा सौरभः सविनयं प्रत्यवदत्–'योग्यतायां सत्यामपि यदि वेतनम् अपर्याप्तं तर्हि विनैव याचनया वेतनाधिक्यं दातव्यम् इति तु स्वामिधर्मः एव । एतादृशं यदि न भवति तर्हि याचनायां को दोषः ?'

किञ्चित् विचिन्त्य शिवदासः प्रतिप्रश्नं कृतवान्–'अस्तु, यदि भवते वृत्तिं दास्यामि तर्हि मम को लाभः ?' सम्भ्रान्तः सौरभः अवदत् 'न अधिगच्छामि भवतः प्रश्नस्य लक्ष्यम् इङ्गितं वा ।' 'अहं ज्ञातुकामोऽस्मि यत् भवान् कस्मिन् विभागे कार्यरतः ? व्यवस्थापनविभागे, विक्रयविभागे, वित्तविभागे अन्यत्र वा ? तत्र कीदृशं कार्यम् अतीवाभिमतं भवत्कृते ?' – शिवदासः अपृच्छत् । सौरभः प्रत्युत्तरं दत्तवान्, ''प्रतिविभागं किञ्चित्कालः मया व्यतीतः। सर्वत्र अहं तथैव दत्तचित्तः। परं मानवसंसाधनविभागे अहमतीव रममाणः आसम्।'' 'तत् कार्यं भवत्कृते अतीव रुचिकरं वर्तते खलु । परं केन कारणेन ?'– शिवदासः अपृच्छत् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सौरभः अकथयत्, 'तत्र मया चरित्रबन्धनस्य तथैव स्वप्रगत्याः अवसरः लब्धः इति अहं मन्ये ।' 'भवतु। भवतु। तत्र कया प्रणाल्या भवता कार्यं कृतम् ?' शिवदासेन पृष्टम् । 'अनेन प्रश्नेन एव तस्मिन् कार्यालये कया प्रणाल्या कार्यं क्रियते एतद् ज्ञातुमिच्छति भवान् इति स्पष्टं भवति । परं तत् तु पण्यस्य गूढरहस्यं गूढमन्त्रः वा । तादृशं रहस्यभेदं प्रतारणां वा अहं न करोमि । परं कया पद्धत्या अहं कार्यं कर्तुमिच्छामि तत् कथयितुं शक्यते', सौरभः अवदत् । 'कथयतु भवान्' शिवदासेन अनुमतम् ।

सौरभः निवेदितवान् – 'प्रथमतः अहम् अतीव निर्बन्धेन सुस्पष्टं करोमि यत् यत्र मत्कृते कार्यसंतोषः तथैव आवश्यकतानुसारेण पर्याप्तं वेतनं स्यात्, कार्यानुकूलं स्वस्थं वातावरणम् अमला स्पर्धा वा स्यात् तर्हि तत्र कदापि कार्यत्यागः मन्मनः न स्पृशेत् । अपरं च मम कार्यपद्धतिः तु एका एव । 'भिन्नरुचिर्हि लोकः' तथैव 'दृष्टं किमपि लोकेऽस्मिन् न निर्दुष्टं न निर्गुणम्' इति मे दृढविश्वासः । अतः रुच्यनुसारम् अर्हतानुसारं च दीयमानं कार्यं सर्वोत्तमतां याति । एषः एव उत्कृष्टतायाः मूलमन्त्रः । परं तदर्थं प्रत्येकं वर्तमानं रुचिभिन्नत्वं योग्यताभिन्नत्वं मयैव अन्वेषणीयम्' ।

एतत् श्रुत्वा शिवदासः तूष्णीं स्थितः । किञ्चित् कालं स्थित्वा विषण्णः सौरभः अवदत्, 'भृशं निराशोऽहम्। यदि एवं तर्हि अन्यत्र गत्वा वृत्तिम् अन्विष्यामि । भवत्कृते योग्यतायाः अपेक्षया उद्योगरहस्यभेदः एव महत्त्वपूर्णः इति मे प्रतिभाति । तत्तु मम परिश्रमशीलतायाः नीत्याः च सर्वथा विरुद्धमेव । मम भृत्यधर्मः तत् कर्तुं मां न अनुजानाति । क्षम्यताम्, न पारयामि तस्य कार्यप्रणालीविषये भवते कथयितुम् ।' इत्युक्त्वा सः परिवर्त्य प्रस्थितः । तत्क्षणम् एव उच्चैः हसन् सन्तुष्टः शिवदासः अभाषत, 'तिष्ठतु! भवता दत्तम् उत्तरमेव भवतः योग्यतां कार्यनिष्ठां स्वामिनिष्ठां च सूचयति । यः एकस्य रहस्यं रक्षति सः कस्यापि रहस्यभेदं निश्चयेन हि न कुर्यात् । सः तु अतीव विश्वासार्हः । भवतः स्वागतमस्ति मम कार्यालये । एताः लेखापुस्तिकाः स्वीकरोतु। अद्यैव कार्यारम्भं करोतु' इति ।

## शब्दार्थः ।

१) वृत्तिः – उपजीविका, आजीविका ।
२) प्रतारणा – वञ्चना ।
३) निर्दुष्टम् – दोषरहितम् ।
४) पण्यम् – व्यापारः ।

## सन्धिविग्रहः ।

१) अत्रागतोऽस्मि – अत्र + आगतः+अस्मि ।
२) निराशोऽहम् – निराशः + अहम् ।
३) ज्ञातुकामोऽस्मि – ज्ञातुकामः + अस्मि ।
४) लोकेऽस्मिन् – लोके + अस्मिन् ।
५) भिन्नरुचिर्हि – भिन्नरुचिः + हि ।

## समासविग्रहः ।

१) नीतिपरीक्षा – नीतेः परीक्षा । षष्ठीतत्पुरुषः ।
२) दुर्गापुरनगरे – दुर्गापुरं नगरम् । तस्मिन् । कर्मधारयः ।
३) सविनयम् – विनयेन सह यथा स्यात् तथा । अव्ययीभावः ।
४) अपर्याप्तम् – न पर्याप्तम् । नञ्तत्पुरुषः ।
५) प्रतिविभागम् – विभागं विभागं प्रति । अव्ययीभावः ।
६) दत्तचित्तः – दत्तं चित्तं येन सः । बहुव्रीहिः ।
७) ज्ञातुकामः – ज्ञातुं कामः यस्य सः । बहुव्रीहिः ।
८) भिन्नरुचिः – भिन्ना रुचिः यस्य सः । बहुव्रीहिः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

९) दृढविश्वासः – दृढः विश्वासः । कर्मधारयः ।
१०) कार्यमग्नः – कार्ये मग्नः । सप्तमीतत्पुरुषः ।

### रूपपरिचयः ।

१) द्वौ – 'द्वि', संख्यावाचकम् , पुंल्लिङ्गम् , प्रथमा, द्विवचनम् ।
२) याचिष्यते – याच् (१ आ.प.), लृट् , प्रथमपुरुषः, एकवचनम् ।
३) दास्यामि – दा-यच्छ् (१ प.प.), दा (३ उ.प. अत्र प.प.), लृट् , उत्तमपुरुषः, एकवचनम्।
४) रममाणः – रम् (१ आ.प.), शानच्-प्रत्ययान्त-विशेषणम् , पुंल्लिङ्गम्, प्रथमा, एकवचनम् ।
५) अन्विष्यामि – अनु+इष् (४ प.प.), लट् , उत्तमपुरुषः, एकवचनम् ।
६) प्रतिभाति – प्रति+भा (२ प.प.), लट् , प्रथमपुरुषः, एकवचनम् ।
७) अनुजानाति – अनु+ज्ञा (९ उ.प. अत्र प.प.), लट् , प्रथमपुरुषः, एकवचनम् ।
८) हसन् – हस् (१ प.प.), शतृ-प्रत्ययान्त-विशेषणम् , पुंल्लिङ्गम् , प्रथमा, एकवचनम् ।

## भाषाभ्यासः ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) एतादृशं यदि न भवति तर्हि याचनायां कः दोषः ?
२) तादृशं रहस्यभेदं प्रतारणां वा अहं न करोमि ।
३) एषः उत्कृष्टतायाः मूलमन्त्रः ।
४) न पारयामि तस्य कार्यप्रणालीविषये भवते कथयितुम् ।

**२. पूर्णवाक्येन उत्तरत ।**

१) कस्मिन् विभागे सौरभः अतीव रममाणः ?
२) वृत्त्यर्थं सौरभः कं प्रति अगच्छत् ?
३) सौरभस्य मतानुसारेण कः स्वामिधर्मः ?
४) दुर्गापुरनगरे कौ प्रमुखौ वणिजौ ?
५) सौरभमतेन शिवदासः किं ज्ञातुम् इच्छति ?
६) कीदृशं कार्यं सर्वोत्तमतां याति ?
७) सौरभः कस्मिन् जीवनसूत्रे विश्वसिति ?
८) उत्कृष्टतायाः मूलमन्त्रः कः ?
९) सौरभदृष्ट्या शिवदासस्य कृते किं महत्त्वपूर्णम् ?
१०) कीदृशः मनुजः विश्वासार्हः ?
११) मानवसंसाधनविभागे कस्य अवसरः लब्धः सौरभेण ?

**३. उचितं कारणं चित्वा पूर्णवाक्येन उत्तरत ।**

**१) सौरभः रामपालं त्यक्त्वा शिवदासं प्रति अगच्छत् । यतः .........................**
१) रामपालः अपर्याप्तं न्यूनं वेतनं यच्छति स्म ।
२) रामपालः दरिद्रः जातः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**२) सौरभः शिवदासं प्रति अगच्छत् । यतः .................**

१) शिवदासः अधिकं वेतनं दद्यात् इति सौरभस्य विचारः ।

२) शिवदासः सौरभस्य सखा ।

**३) सौरभः रहस्यभेदं कर्तुं न सज्जः । यतः ...........**

१) रहस्यभेदः न भृत्यधर्मः ।

२) सौरभः कार्ये अकुशलः ।

**४) शिवदासेन सौरभः नियुक्तः । यतः .......................**

१) सौरभः अतीव मृदुलः, वाचालः च ।

२) सौरभः स्वामिनिष्ठः कार्यनिष्ठः च ।

**४. समानार्थकशब्दान् लिखत ।**

वणिक् , युवा, सत्यम् , याचना, गूढम् , संतोषः, अर्हता

**५. विरुद्धार्थकशब्दान् लिखत ।**

महती, युवा, लाभः, न्यूनम् , सत्यम् , अपर्याप्तम् , उच्चैः

**६. विशेषण–विशेष्यसम्बन्धः ।**

१) वेतनम् – ............... , ................ ।

२) वातावरणम् – ............... , ................ ।

३) दीयमानं कार्यम् – ............... , ................ ।

**७. सूचनानुसारं परिवर्तनं कुरुत ।**

अ) वचनपरिवर्तनं कुरुत ।

१) सः तरुणः उक्तवान् ।

२) अहम् अतीव रममाणः आसम् ।

३) अहं रहस्यभेदं न करोमि ।

आ) लकारपरिवर्तनं कुरुत ।

१) सौरभः सविनयं प्रत्यवदत् । (लोट्लकारे परिवर्तयत ।)

२) भवतः प्रश्नस्य लक्ष्यम् इङ्गितं वा न अधिगच्छामि । (लङ्लकारे परिवर्तयत ।)

३) तादृशं रहस्यभेदं प्रतारणां वा अहं न करोमि । (लृट्लकारे परिवर्तयत ।)

४) सः कस्यापि रहस्यभेदं न कुर्यात् । (लट्लकारे परिवर्तयत ।)

इ) वाच्यपरिवर्तनं कुरुत ।

१) मया भवतः कार्यालये वृत्तिः लभ्येत ।

२) शिवदासः प्रतिप्रश्नं कृतवान् ।

३) प्रतिविभागं मया किञ्चित्कालः व्यतीतः ।

४) विना याचनया मया एव वेतनाधिक्यं दातव्यम् ।

५) मया चरित्रबन्धनस्य तथैव स्वप्रगत्याः अवसरः लब्धः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

ई) पूर्वकालवाचकं निष्कासयत ।

१) किञ्चित् विचिन्त्य शिवदासः प्रतिप्रश्नं कृतवान् ।

२) सः परिवर्त्य प्रस्थितः ।

३) अहम् अन्यत्र गत्वा वृत्तिम् अन्विष्यामि ।

उ) 'स्म' निष्कासयत/योजयत ।

१) अहं रामपालस्य कार्यालये कार्यं करोमि स्म । ('स्म' निष्कासयत ।)

२) सौरभः शिवदासाय अकथयत् । ('स्म' योजयत ।)

ऊ) सति-सप्तमीरचनां निष्कासयत ।

योग्यतायां सत्याम् अपि यदि वेतनम् अपर्याप्तं तर्हि विनैव याचनया वेतनाधिक्यं दातव्यम् ।

ए) वाक्यं शुद्धं कुरुत ।

१) यदि भवन्तं वृत्तिं दास्यामि तर्हि मम को लाभः ?

२) तत्र कया प्रणाल्या भवान् कार्यं कृतम् ?

३) न पारयामि तस्य कार्यप्रणालीविषये भवतः कथयितुम् ।

## ८. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

१) रामपालस्य कार्यालये कार्यं करोमि स्म । (तद्)

२) मया वारं वारं सूचितं दर्शितं याचितमपि । (सौरभ)

३) याचनायां कः दोषः? (तद्)

४) प्रतिविभागं किञ्चित्कालः मया व्यतीतः । (सौरभ)

५) शिवदासेन अनुमतम् । (तद्)

६) एषः एव उत्कृष्टतायाः मूलमन्त्रः (तद्)

७) शिवदासः तूष्णीं स्थितः । (तद्)

८) न पारयामि तस्य कार्यप्रणालीविषये भवते कथयितुम् । (रामपाल)

## ९. पृथक्करणं कुरुत ।

**अ) घटनाक्रमानुसारेण वाक्यानि पुनर्लिखत ।**

१) अ) शिवदासः सौरभस्य कार्यक्षेत्रं ज्ञातुम् ऐच्छत् ।

ब) रामपालस्य कार्यालये सौरभः कार्यम् अकरोत् ।

क) अधिकवेतनेच्छया शिवदासं प्रति सौरभः अगच्छत् ।

ड) तत्र अपर्याप्तं वेतनं प्राप्नोत् सः ।

२) अ) सौरभः रहस्यभेदं कर्तुं न सज्जः ।

ब) केवलं स्वकार्यपद्धतिम् उक्तवान् सौरभः ।

क) शिवदासः सौरभं नियुक्तवान् ।

ड) शिवदासः रामपालस्य प्रणालीं ज्ञातुम् ऐच्छत् ।




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com


३) अ) सौरभः 'मानवसंसाधनविभागः अभिमतः' इति अकथयत् ।
   ब) सौरभः रामपालस्य यशोरहस्यं भेत्तुं न सिद्धः ।
   क) शिवदासः रामपालस्य प्रणालीं ज्ञातुम् ऐच्छत् ।
   ड) शिवदासः सौरभस्य अभिमतक्षेत्रं ज्ञातुम् ऐच्छत् ।

**ब) जालरेखाचित्रं पूरयत ।**

१)




२)




**उपक्रमः –** १) विविधकथाद्वारा मानवगुणानां सङ्कलनं कुरुत ।

***

**कथारञ्जनी**

धौम्यमहर्षेः आश्रमः । महती वृष्टिः । 'कृषिक्षेत्रे अधिकं जलम् आगच्छति, तत् निवारयतु' इति शिष्यं वदति धौम्यः । शिष्यः मृत्तिकया जलप्रवाहं निवारयितुं प्रयत्नं करोति । सः न शक्तः । अन्ते स्वयम्! एव शयनं कृत्वा जलप्रवाहं निवारयति । बहुकालानन्तरम् अपि शिष्यः न प्रत्यागतः इत्यतः धौम्यः कृषिक्षेत्रं गच्छति । शिष्यस्य साहसं दृष्ट्वा सन्तुष्टः गुरुः तस्मै ज्ञानं ददाति । तस्य शिष्यस्य नाम आरुणिः । उद्दालकः इति अपि तस्य अपरं नाम ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# द्वितीयः पाठः । बुद्धिर्बलवती ।

**भूमिका –** संस्कृतसाहित्ये नैकाः मनोरञ्जकाः नीतिप्रदाः च कथाः सन्ति । तासामध्ययनेन नीतिनैपुण्यं तथा बोधः जायते । जनाः विपत्तिषु न केवलं शरीरसामर्थ्येन अपि तु बुद्धिचातुर्येण तरन्ति । अतः प्रत्युत्पन्नमतिना सङ्कटनिराकरणाय उपयोज्यं साधनम् एव बुद्धिचातुर्यम् । बुद्धिः शक्तितः बलीयसी इति अस्याः कथायाः तात्पर्यम्। एषा कथा स्त्रीणां बुद्धिचातुर्यं दर्शयति ।

प्रस्तुतपाठः 'शुकसप्ततिः' इति कथासङ्ग्रहात् स्वीकृतः । एषः ग्रन्थः संस्कृतभाषया लिखितानां कथानां सङ्ग्रहः। शुकेन स्वामिन्यै कथिताः सप्ततिः कथाः अस्मिन् ग्रन्थे सङ्कलिताः । अस्य ग्रन्थस्य रचयिता अज्ञातः। ग्रन्थस्य कालविषये मतभिन्नता दृश्यते, तथापि एकसहस्रख्रिस्ताब्दात् चतुर्दशशतख्रिस्ताब्दपर्यन्तं (१००० इ.स. तः १४०० इ.स. पर्यन्तं) कदाचित् एषः ग्रन्थः रचितः इति मन्यन्ते ।

अयं कथाग्रन्थोऽतीव मनोरञ्जकः । मदनविनोदः नाम वणिक् व्यापारार्थं देशान्तरं गतः । तदा तस्य पालितः शुकः कथामाध्यमेन पद्मावतीं वणिक्पत्नीम् उपदिशति अनुरञ्जनं च करोति । शुकेन प्रतिरात्रि एका कथा कथिता । वणिजः प्रत्यागमनपर्यन्तं शुकेन सप्ततिः कथाः कथिताः । कथाप्रसङ्गे बोधपराणि सुभाषितानि अपि योजितानि । वनमार्गेण पितृगृहगामिनी बुद्धिमती कथं बुद्धिचातुर्येण स्वस्य तथा निजपुत्रयोः रक्षणमकरोत् इति वर्णितमस्यां कथायाम् ।

अस्ति देऊलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म । एकदा केनापि कार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितृगृहं प्रति प्रस्थिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्यचातुर्यमाश्रित्य पुत्रौ चपेटया प्रहृत्य जगाद– " कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम् । पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते", इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो पलायितः। भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः जम्बुकः हसन्नाह – "भवान् कुतः भयात् पलायितः ?"

**व्याघ्रः –** गच्छ, गच्छ जम्बुक, त्वमपि किञ्चिद् गूढप्रदेशम् । यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्धः । परं गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः ।

**जम्बुकः –** व्याघ्र, त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि ?

**व्याघ्रः –** प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा ।

**जम्बुकः –** स्वामिन्, यत्रास्ते सा धूर्ता तत्र गम्यताम् । व्याघ्र, तव पुनः तत्र गतस्य सा सम्मुखमपीक्षते यदि, तर्हि त्वया अहं हन्तव्यः ।

**व्याघ्रः –** जम्बुक, यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात् ।

**जम्बुकः –** यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम् ।

स व्याघ्रः तथा कृत्वा काननं ययौ । जम्बुकेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती – जम्बुककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम् ? परं प्रत्युत्पन्नमतिः सा जम्बुकम् आक्षिपन्त्यङ्गुल्या तर्जयन्त्युवाच –

**रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा ।**
**विश्वास्याद्यैकमानीय कथं यासि वदाधुना ।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



एतत् श्रुत्वा भयभीतः व्याघ्रः अचिन्तयत् । ''अयं धूर्तः खलु जम्बुकः मां वञ्चयति । वरम् अधुना पलायनम्'' । व्याघ्रः दूरं पलायितः । तदा जम्बुकोऽपि पलायितः ।

अहो प्रत्युत्पन्नमतित्वं बुद्धिमत्याः ! अत एव उच्यते खलु – '' सर्वकार्येषु हे तन्वि! बुद्धिर्बलवती सदा ।''

## शब्दार्थः ।

१) पुत्रद्वयोपेता – पुत्रद्वयेन सहिता ।
२) धाष्टर्यम् – धैर्यम् ।
३) चपेटया – करप्रहारेण ।
४) प्रहृत्य – प्रहारं कृत्वा ।
५) विभज्य – विभागं कृत्वा ।
६) गृहीतकरजीवितः – हस्ते प्राणान् गृहीत्वा ।
७) अत्तुम् – भक्षयितुम् ।
८) वेला – समयः, निर्बन्धः ।
९) जम्बुकः – शृगालः ।

## सन्धिविग्रहः ।

१) कथमेकैकशः – कथम् + एकैकशः ।
२) तर्जयन्त्युवाच – तर्जयन्ती + उवाच ।
३) कश्चिल्लक्ष्यते – कश्चित् + लक्ष्यते ।
४) यन्मानुषादपि – यत् + मानुषात् + अपि ।
५) हसन्नाह – हसन् + आह ।
६) मामत्तुम् – माम् + अत्तुम् ।
७) वेलाप्यवेला – वेला + अपि + अवेला ।
८) सम्मुखमपीक्षते – सम्मुखम्+अपि+ईक्षते ।
९) सात्मपुत्रावेकैकशः – सा+आत्मपुत्रौ+एकैकशः ।
१०) आक्षिपन्त्यङ्गुल्या – आक्षिपन्ती + अङ्गुल्या ।
११) अयमेकस्तावद्विभज्य – अयम् + एकः + तावत् + विभज्य ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## समासविग्रहः ।

१) पुत्रद्वयोपेता – पुत्रद्वयेन उपेता । तृतीयातत्पुरुषः ।
२) पितृगृहम् – पितुः गृहम् । षष्ठीतत्पुरुषः ।
३) गहनकानने – गहनं काननम्, तस्मिन् । कर्मधारयः ।
४) भयाकुलचित्तः – भयेन आकुलम् । तृतीयातत्पुरुषः ।
भयाकुलं चित्तं यस्य सः। बहुव्रीहिः ।
५) व्याघ्रमारी – व्याघ्रं मारयति इति । उपपदतत्पुरुषः ।
६) जम्बुककृतोत्साहात् – जम्बुकेन कृतः, जम्बुककृतः । तृतीयातत्पुरुषः।
जम्बुककृतः उत्साहः, जम्बुककृतोत्साहः, तस्मात्। कर्मधारयः ।
७) प्रत्युत्पन्नमतिः – प्रत्यत्पुन्ना मतिः यस्याः सा । बहुव्रीहिः ।

## रूपपरिचयः ।

१) ददर्श – दृश् (१ प.प), लिट् , प्रथमपुरुषः, एकवचनम् ।
२) जगाद – गद् (१ प.प.), लिट् , प्रथमपुरुषः, एकवचनम् ।
३) भुज्यताम् – भुज् (७ उ.प.), कर्मणि लोट् , प्रथमपुरुषः, एकवचनम् ।
४) लक्ष्यते – लक्ष् (१० प.प.), कर्मणि लट् , प्रथमपुरुषः, एकवचनम् ।
५) श्रूयते – श्रु (५ प.प.), कर्मणि लट् , प्रथमपुरुषः, एकवचनम् ।
६) बिभेषि – भी (३ प.प.), लट् , मध्यमपुरुषः, एकवचनम् ।
७) अत्तुम् – अद् (२ प.प.), हेत्वर्थक-तुमन्त-अव्ययम् ।
८) प्रहरन्ती – प्र + हृ (१ प.प.), शतृप्रत्ययान्त विशेषणम्, स्त्रीलिङ्गम्, प्रथमा, एकवचनम् ।
९) गम्यताम् – गम् (१ प.प.), कर्मणि लोट् , प्रथमपुरुषः, एकवचनम् ।
१०) ईक्षते – ईक्ष् (१ आ.प.), लट् , प्रथमपुरुषः, एकवचनम् ।
११) ययौ – या (२ प.प.), लिट् , प्रथमपुरुषः, एकवचनम् ।
१२) हन्तव्यः – हन् (२ प.प.), तव्य-प्रत्ययान्त-विशेषणम् , पुंल्लिङ्गम् , प्रथमा, एकवचनम् ।
१३) मुक्त्वा – मुच् (६ प.प.), पूर्वकालवाचक-त्वान्त-अव्ययम् ।

## भाषाभ्यासः ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) व्याघ्रो भयाकुलचित्तो पलायितः ।
२) तर्हि त्वया अहं हन्तव्यः इति ।
३) जम्बुककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम् ?
४) सर्वकार्येषु हे तन्वि ! बुद्धिर्बलवती सदा ।

**२. पूर्णवाक्येन उत्तरत ।**

१) बुद्धिमती केन उपेता पितृगृहं प्रति प्रस्थिता ?
२) व्याघ्रः किं विचार्य पलायितः ?
३) जम्बुकः किं वदन् व्याघ्रस्य उपहासं करोति ?
४) बुद्धिमती जम्बुकं किम् उक्तवती ?
५) पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती किं चिन्तितवती ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### ३. प्रश्ननिर्माणं कुरुत ।

१) तत्र राजसिंहः नाम राजपुत्रः वसति स्म ।
२) गहनकानने सा एकं व्याघ्रं ददर्श ।
३) बुद्धिमती चपेटया पुत्रौ प्रहृतवती ।
४) व्याघ्रं दृष्ट्वा धूर्तः शृगालः अवदत् ।
५) त्वं मानुषात् बिभेषि ।
६) पुरा त्वया मह्यं व्याघ्रत्रयं दत्तम् ।

### ४. कः कं वदति ?

१) ''भवान् कुतः भयात् पलायितः ?''
२) ''यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात् ।''
३) ''रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा ।''

### ५. समानार्थकशब्दान् लिखत ।

ग्रामः, भार्या, काननम् , पुत्रः, जम्बुकः, धूर्तः, सत्वरम् , प्रत्युत्पन्नमतिः, कलहः

### ६. विरुद्धार्थकशब्दान् लिखत ।

ग्रामः, प्रत्युत्पन्नमतिः, धूर्तः, सत्वरम् , दूरम्

### ७. विशेषणविशेष्यमेलनं कुरुत ।

| अ | आ |
|---|---|
| १) धूर्तः | क) राज्ञी |
| २) भीतः | ख) जम्बुकः |
| ३) बुद्धिमती | ग) पुत्रौ |
| ४) मातृगामिनौ | घ) व्याघ्रः |

### ८. सूचनानुसारं परिवर्तनं कुरुत ।

१) त्वं मां मुक्त्वा यासि । ('त्वम्' इत्यस्य स्थाने 'भवान्' शब्दं योजयत ।)
२) स व्याघ्रः तथा कृत्वा काननं ययौ । (लिट्लकारस्थाने लट्लकारं योजयत ।)
३) तत्र राजसिंहः नाम राजपुत्रः वसति स्म । ('स्म' निष्कासयत ।)
४) सा एकं व्याघ्रं ददर्श । (लङ्लकारे परिवर्तयत ।)
५) त्वया महत्कौतुकम् आवेदितम् । (वाच्यपरिवर्तनं कुरुत ।)
६) त्वं मां निजगले बद्ध्वा चल सत्वरम् । ('त्वं' स्थाने 'भवान्' उपयुज्य वाक्यं लिखत ।)
७) दूरात् व्याघ्रं दृष्ट्वा बुद्धिमती चिन्तितवती । (पूर्वकालवाचकम् अव्ययं निष्कासयत ।)

### ९. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

१) तस्य भार्या पितुः गृहं प्रस्थिता । (राजसिंह)
२) गहनकानने सा एकं व्याघ्रं ददर्श । (बुद्धिमती)
३) धूर्तः जम्बुकः मां वञ्चयति । (व्याघ्र)
४) अहो प्रत्युत्पन्नमतित्वं बुद्धिमत्याः । (तद्)
५) रे रे धूर्त, त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा । (बुद्धिमती)
६) जम्बुकेन सहितम् आयान्तं व्याघ्रं दृष्ट्वा बुद्धिमती चिन्तितवती । (तद्)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१०. पृथक्करणं कुरुत ।

**घटनाक्रमानुसारेण वाक्यानि पुनर्लिखत ।**

बुद्धिमती चपेटिकां ददाति । भीतः व्याघ्रः पलायते ।

जम्बुकः व्याघ्रं मिलति । बुद्धिमती पितुः गृहं प्रति चलति ।

उपक्रमः – १) बुद्धिचातुर्यविषयकाणां कथानां सङ्ग्रहं कुरुत ।

२) बुद्धिचातुर्यविषयकाणां सुभाषितानां सङ्ग्रहं कुरुत ।

***

**कथारञ्जनी**

इस्लामिकैः पारसदेशः आक्रान्तः । तेषाम् अमानुषैः अत्याचारैः सन्त्रस्ताः ३०० परिवाराः स्वदेशत्यागम् अकुर्वन् । जलमार्गेण ते भारतवर्षं प्राप्नुवन् । समुद्रतटे स्थितं सञ्जाणनगरं ते समागताः । प्रधान-पुरोहितस्य नेतृत्वे ते राजानं प्रार्थितवन्तः– ''महाप्रभो, शरणागताः वयम् । आश्रयम् इच्छामः'' इति । नृपः अवदत्– ''भवन्तः सर्वे मम अतिथयः । भवतां स्वागतं मम कर्तव्यम् । वदन्तु, भवन्तः किम् इच्छन्ति?'' इति । प्रधानपुरोहितः प्रत्यवदत्– ''अग्निः अस्माकं पवित्रतमः देवः । एतम् अग्निं कष्टेन संरक्ष्य वयम् अत्र आनीतवन्तः। तस्य अग्नेः प्राणप्रतिष्ठार्थं देवालयः आवश्यकः'' इति। ''बाढम् । देवालयः प्रदीयते । अन्यत् किम् अपेक्षन्ते भवन्तः?'' राजा अपृच्छत् । ''निवासार्थं साधारणानि गृहाणि रचयितुम् इच्छामः''– प्रधानपुरोहितः अवदत् । ''आम् । तानि अपि दीयन्ते । अन्यत् किम्?'' – राजा पुनः पृच्छाम् अकरोत् । ''एतस्मिन् देशे भारभूताः न भविष्यामः । कृषिं कृत्वा उदरभरणं कर्तुम् इच्छामः । तदर्थं पर्याप्ता भूमिः अस्माकं कृते यदि उपलब्धा भवेत् तर्हि महान् उपकारः स्यात्''– प्रधान पुरोहितः याचितवान् । ''भूमिरपि कृषिकार्यार्थं प्रदास्यते''– राजा उक्तवान् । समस्ताः पारसिकाः आनन्दिताः । तदा राजा तान् अपृच्छत्– ''अतिथिधर्मम् अनुसृत्य अस्माभिः भवत्सु आदरः दर्शितः । सर्वविधानाम् अपेक्षाणां पूरणम् अपि प्रतिज्ञातम्। प्रतिफलरूपेण भवन्त : अस्मै देशाय किं दातुम् इच्छन्ति?'' इति। प्रधानपुरोहितः दुग्धं प्रार्थितवान् । राजाज्ञानुसारं भटैः चषकपरिमितं दुग्धम् आनीतम् । प्रधानपुरोहितः एकां पुटिकाम् उद्घाटितवान् । पुटिकायाम् आसीत् शर्कराचूर्णम् । प्रधानपुरोहितः चूर्णं दुग्धे योजितवान् । चूर्णं दुग्धे विलीनम् । पश्चात् प्रधानपुरोहितः अवदत्– ''एतद्देशीयसमाजे दुग्धे शर्करावत् वयं सम्मिलिताः भविष्यामः । शर्करायोगतः दुग्धस्य माधुर्यं यथा वर्धते, दुग्धं चषकात् बहिः नागच्छति यथा, तथा वयम् अत्र जीवनं करिष्यामः'' इति । तदनन्तरं शतकानि यावत् पारसिकाः भारतीयसमाजे पूर्णरूपेण विलीनाः भूत्वा न्यवसन् । शिक्षणं, विज्ञानं, सेवा, वाणिज्यम् इत्यादिषु क्षेत्रेषु अनेन अल्पसङ्ख्यासमाजेन कृतं योगदानं तावत् अपूर्वम् । तेषां धर्मः, तेषां परम्पराः, तेषां संस्कृतिः च न केवलं सुरक्षितम्, अपि तु संवर्धितं चापि दृश्यते अत्र । १९१९ तमे ख्रिस्ताब्दे आङ्ग्लशासनेन पारसिकानां कृते आरक्षणविषयकः प्रस्तावः आनीतः । तदा दादाभाईनौरोजीमहोदयस्य नेतृत्वे सर्वैः पारसिकैः स च प्रस्तावः धिक्कृतः । तेषां सर्वेषाम् आक्रोशः आसीत्– 'अस्मान् अन्येभ्यः भूमिपुत्रेभ्यः मा पृथक् कुर्वन्तु' इति । अनुकरणीयः मार्गः खलु पारसिकनायकैः उपदिष्टः!



Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com

# तृतीयः पाठः । शरण्यः शिबिः ।

**भूमिका –** कारुणिकस्य शिबिराजस्य एषा पद्यकथा कर्तव्यनिष्ठायाः पराकाष्ठां दर्शयति । राजा शिबिः शरणागतस्य कपोतस्य रक्षणार्थं स्वमांसमपि श्येनाय दातुं सिद्धः ।

काश्मीरनिवासिकविसोमदेवविरचितः 'कथासरित्सागरः' संस्कृतकथासाहित्यस्य शिरोमणिग्रन्थः । अनुमानतः सोमदेवस्य कालः एकादशं शतकमिति मन्यन्ते । गुणाढ्यकवेः 'बृहत्कथा' इति ग्रन्थस्य आधारेण लिखितोऽयं ग्रन्थः 'भारतीयकथापरम्परायाः महाकोषः' इति ख्यातिप्राप्तः । क्वचित् इतिहासाधारिताः कथाः सन्ति, क्वचित् अद्भुताश्रिताः अपि । तासु प्राचीनभारतीयसमाजस्य तथा संस्कृतेः चित्रं दृश्यते ।

एषा कथा कथासरित्सागरस्य कथापीठलम्बकस्य सप्तमतरङ्गात् गृहीता ।



तथा च पूर्वं राजाभूत् तपस्वी करुणापरः ।
दाता धीरः शिबिर्नाम सर्वसत्त्वाभयप्रदः ।।१।।

तं वञ्चयितुमिन्द्रोऽथ कृत्वा श्येनवपुः स्वयम् ।
मायाकपोतवपुषं धर्ममन्वपतद् द्रुतम् ।।२।।

कपोतश्च भयाद् गत्वा शिबेरङ्कमशिश्रियत् ।
मनुष्यवाचा श्येनोऽथ स तं राजानमब्रवीत् ।।३।।

राजन् भक्ष्यमिदं मुञ्च कपोतं क्षुधितस्य मे ।
अन्यथा मां मृतं विद्धि कस्ते धर्मस्ततो भवेत् ।।४।।

ततः शिबिरुवाचैनमेष मे शरणागतः ।
अत्याज्यस्तद्ददाम्यन्यन्मांसमेतत् समं तव ।।५।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

श्येनो जगाद यद्येवमात्ममांसं प्रयच्छ मे ।
तथेति तत् प्रहृष्टः सन् स राजा प्रत्यपद्यत ।।६।।

यथा यथा च मांसं स्वमुत्कृत्यारोपयन्नृपः ।
तथा तथा तुलायां स कपोतोऽभ्यधिकोऽभवत् ।।७।।

ततः शरीरं सकलं तुलां राजाध्यरोपयत् ।
साधु साधु समं त्वेतद् दिव्या वागुदभूत्ततः ।।८।।

इन्द्रधर्मौ ततस्त्यक्त्वा रूपं श्येनकपोतयोः ।
तुष्टावक्षतदेहं तं राजानं चक्रतुः शिबिम् ।
दत्त्वा चास्मै वरानन्यांस्तावन्तर्धानमीयतुः ।।९।।

## अन्वयः ।

१. तथा च पूर्वं तपस्वी, करुणापरः, दाता, धीरः, सर्वसत्त्वाभयप्रदः शिबिः नाम राजा अभूत् ।
२. अथ तं वञ्चयितुम् इन्द्रः स्वयं श्येनवपुः कृत्वा मायाकपोतवपुषं धर्मं द्रुतम् अन्वपतत् ।
३. कपोतः च भयात् गत्वा शिबेः अङ्कम् अशिश्रियत् । अथ सः श्येनः तं राजानं मनुष्यवाचा अब्रवीत् ।
४. राजन् ! क्षुधितस्य मे इदं भक्ष्यं कपोतं मुञ्च । अन्यथा मां मृतं विद्धि । ततः कः ते धर्मः भवेत् ?
५. ततः शिबिः एनम् उवाच, ''एषः मे (मां) शरणागतः । (अतः) अत्याज्यः । (अहम्) एतत् (एतेन) समं अन्यत् मांसं तव (तुभ्यं) ददामि ।
६. श्येनः जगाद, ''यदि एवं (तर्हि) मे आत्ममांसं प्रयच्छ । स राजा प्रहृष्टः सन् तत् (तं) 'तथा' इति प्रत्यपद्यत ।
७. नृपः च यथा यथा स्वं मांसम् उत्कृत्य आरोपयत्, तथा तथा तुलायां स कपोतः अभ्यधिकः अभवत् ।
८. ततः राजा सकलं शरीरं तुलां (तुलायाम्) अध्यरोपयत् । ततः ''साधु ! साधु ! एतत् तु समं'' (इति) दिव्या वाग् उदभूत् ।
९. ततः तुष्टौ इन्द्रधर्मौ श्येनकपोतयोः रूपं त्यक्त्वा तं शिबिं राजानम् अक्षतदेहं चक्रतुः । अस्मै च अन्यान् वरान् दत्त्वा तौ अन्तर्धानम् ईयतुः ।

## वाग्विशेषः ।

१. अशिश्रियत् – श्रि-श्रय् (१ उ.प. अत्र प.प.) लुङ्, प्रथमपुरुषः, एकवचनम् । लुङ्लकारः दशसु लकारेषु एकः तृतीय-भूतकालप्रदर्शकः ।
२. मांसं तव ददामि – पञ्चमे श्लोके 'तव' इति षष्ठीप्रयोगः चतुर्थ्यर्थे योजितः । अयं सामान्यषष्ठीप्रयोगः इति उच्यते ।

## शब्दार्थः ।

१) करुणापरः – कारुणिकः ।
२) वपुः – शरीरम् ।
३) विद्धि – जानीहि ।
४) प्रहृष्टः – मुदितः ।
५) शरण्यः – शरणे साधुः ।
६) शरणम् – आश्रयः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## सन्धिविग्रहः ।

१) राजाभूत् – राजा + अभूत् ।
२) श्येनोऽथ – श्येनः + अथ ।
३) त्वेतद् – तु + एतद् ।
४) राजाध्यरोपयत् – राजा+अध्यरोपयत् ।
५) ततस्त्यक्त्वा – ततः + त्यक्त्वा ।
६) वागुदभूत्ततः – वाक्+उदभूत्+ततः ।
७) यद्येवमात्ममांसम् –यदि+एवम्+आत्ममांसम्।
८) तुष्टावक्षतदेहम् – तुष्टौ + अक्षतदेहम् ।
९) वञ्चयितुमिन्द्रोऽथ – वञ्चयितुम् + इन्द्रः + अथ ।
१०) शिबेरङ्कमशिश्रियत् – शिबेः + अङ्कम् + अशिश्रियत् ।
११) स्वमुत्कृत्यारोपयन्नृपः – स्वम् + उत्कृत्य + आरोपयत् + नृपः ।
१२) शिबिरुवाचैनमेषः – शिबिः + उवाच + एनम् + एषः ।
१३) कपोतोऽभ्यधिकोऽभवत् – कपोतः + अभ्यधिकः + अभवत् ।
१४) अत्याज्यस्तद्ददाम्यन्यन्मांसमेतत् – अत्याज्यः + तद् + ददामि + अन्यत् + मांसम् + एतत् ।
१५) वरानन्यांस्तावन्तर्धानमीयतुः – वरान् + अन्यान् + तौ + अन्तर्धानम् + ईयतुः ।

## समासविग्रहः ।

१) सर्वसत्त्वाभयप्रदः – सर्वाणि सत्त्वानि । कर्मधारयः ।
अभयं प्रददाति इति । उपपदतत्पुरुषः ।
सर्वसत्त्वेभ्यः अभयप्रदः । चतुर्थीतत्पुरुषः ।
२) श्येनवपुः – श्येनस्य वपुः इव वपुः यस्य सः । बहुव्रीहिः ।
३) मनुष्यवाचा – मनुष्यस्य वाक्, तया । षष्ठीतत्पुरुषः ।
४) शरणागतः – शरणम् आगतः । द्वितीया तत्पुरुषः ।
५) अत्याज्यः – न त्याज्यः । नञ्तत्पुरुषः ।
६) इन्द्रधर्मौ – इन्द्रः च धर्मः च । इतरेतरद्वन्द्वः ।
७) श्येनकपोतयोः – श्येनः च कपोतः च, तयोः । इतरेतरद्वन्द्वः ।
८) अक्षतदेहम् – न क्षतः । नञ्तत्पुरुषः ।
अक्षतः देहः यस्य सः । तम् । बहुव्रीहिः ।

## रूपपरिचयः ।

१) तपस्वी – तपस्विन्, इन्नन्तम् , पुंल्लिङ्गम् , प्रथमा, एकवचनम् ।
२) दाता – दातृ, ऋकारान्तम् , पुंल्लिङ्गम् , प्रथमा, एकवचनम् ।
३) वञ्चयितुम् – वञ्च् (१० प.प.), हेत्वर्थक-तुमन्त-अव्ययम् ।
४) राजानम् – राजन्, अन्नन्तम् , पुंल्लिङ्गम् , द्वितीया, एकवचनम् ।
५) अब्रवीत् – ब्रू (२ उ.प. अत्र प.प.), लङ् , प्रथमपुरुषः, एकवचनम् ।
६) मुञ्च – मुच् (६ प.प.), लोट् , मध्यमपुरुषः, एकवचनम् ।
७) विद्धि – विद् (२ प.प.), लोट् , मध्यमपुरुषः, एकवचनम् ।
८) उवाच – ब्रू (२ उ.प. अत्र प.प.) / वच् (२ प.प.), लिट् , प्रथमपुरुषः, एकवचनम् ।
९) जगाद – गद् (१ प.प.), लिट् , प्रथमपुरुषः, एकवचनम् ।
१०) प्रयच्छ – प्र + दा (१ प.प.), लोट् , मध्यमपुरुषः, एकवचनम् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

११) प्रहृष्टः - प्र + हृ (१ प.प.), क्त-प्रत्ययान्त-विशेषणम् , पुंल्लिङ्गम् , प्रथमा-एकवचनम्।
१२) आरोपयत् - आ + रूह् (१ प.प.), णिजन्तम्, लङ् , प्रथमपुरुषः, एकवचनम् ।
१३) त्यक्त्वा - त्यज् (१ प.प), पूर्वकालवाचक-त्वान्त-अव्ययम् ।
१४) चक्रतुः - कृ (८ उ.प. अत्र प.प.), लिट् , प्रथमपुरुषः, द्विवचनम् ।
१५) उत्कृत्य - उत् + कृत् (६ प.प.), पूर्वकालवाचक-ल्यबन्त-अव्ययम् ।

## भाषाभ्यासः ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१) मायाकपोतवपुषं धर्ममन्वपतद् द्रुतम् । २) अत्याज्यस्तद्ददाम्यन्यन्मांसमेतत् समं तव।
३) ततः शरीरं सकलं तुलां राजाध्यरोपयत् । ४) तुष्टावक्षतदेहं तं राजानं चक्रतुः शिबिम् ।

**२. पूर्णवाक्येन उत्तरत ।**

१) राजा शिबिः कीदृशः आसीत् ? २) कपोतः कम् अशिश्रियत् ?
३) श्येनः राजानं किम् अब्रवीत् ? ४) राजा किम् अध्यरोपयत् ?
५) केन श्येनवपुः धृतम् ? केन च कपोतवपुः धृतम् ? ६ ) कौ राजानम् अक्षतदेहं चक्रतुः ?

**३. समानार्थकशब्दान् लिखत ।**

इन्द्रः, कपोतः, श्येनः, वपुः, प्रहृष्टः, वाक्, क्षुधितः, राजा

**४. विरुद्धार्थकशब्दान् लिखत ।**

दाता, राजा

**५. विशेषण-विशेष्याणां मेलनं कुरुत ।**

| अ | ब |
|---|---|
| १) दाता | राजानम् |
| २) तं | इदम् |
| ३) भक्ष्यम् | शिबिः |

**६. सूचनानुसारं परिवर्तनं कुरुत ।**

१) श्येनः राजानम् अब्रवीत् । (वाच्यपरिवर्तनं कुरुत ।)
२) त्वमिदं भक्ष्यं मुञ्च । ('त्वं' स्थाने 'भवान्' उपयुज्य वाक्यं पुनर्लिखत ।)
३) इन्द्रधर्मौ राज्ञे वरं दत्त्वा अन्तर्धानम् अगच्छताम् । (त्वान्तं निष्कासयत ।)
४) हे राजन् ! आत्ममांसं मे प्रयच्छ । (क्रियापदं विधिलिङ्लकारे परिवर्तयत ।)

**७. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।**

१) तं वञ्चयितुम् इन्द्रः श्येनवपुः अधारयत् । (शिबि)
२) कपोतः भयात् शिबेः अङ्कम् अशिश्रियत् (तद्)
३) हे राजन्, क्षुधितस्य मम भक्ष्यं मुञ्च । (श्येन)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४) एषः मे शरणागतः । (कपोत)


५) राजा सकलं शरीरम् अध्यरोपयत् । (तद्)

६) इन्द्रधर्मौ तुष्टौ । (तद्)

## ८. पृथक्करणं कुरुत ।

**जालरेखाचित्रं पूरयत ।**

शिबेः विशेषणानि लिखत ।




**उपक्रमः –** कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः ।
दद‍ौ दधीचिरस्थीनि नास्त्यदेयं महात्मनाम् ।।

सूचना – कर्णः, जीमूतवाहनः, दधीचिः एतेषां कथाः अन्विष्यत लिखत च ।

***

### कथारञ्जनी

कदाचित् आचार्यः शिष्यान् पृष्टवान्– ''पशुषु बृहत्तमः कः?'' छात्राः अवदन्– ''गजः । सः अस्ति महाशक्तिमान्'' इति । ''उन्नतः पशुः कः?'' आचार्यः पुनः अपृच्छत् । ''उन्नतः तु चित्रोष्ट्रः ।'' छात्राः अवदन्। ''महाबुद्धिमान् पशुः कः?'' पुनरपि अपृच्छत् आचार्यः । ''शृगालः'' छात्राः अवदन् । ''महता वेगेन धावितुं समर्थः कः?'' ''चित्रकः ।...'' ''अत्युन्नते स्थले डयने समर्थः कः?'' ''गरुडः ।'' ''वनस्य राजा कः?'' अपृच्छत् आचार्यः । ''वनराजः अस्ति सिंहः'' छात्राः अवदन् एकस्वरेण ।

तावत् कश्चन छात्रः अवदत्– ''सिंहः न अत्युन्नतः, न अतिशक्तिमान्, न महाबुद्धिमान् वा । अधिकवेगेन धावने समर्थः अपि न सः । तथापि सः वनराजः कथम् अभवत्?'' इति ।

''अन्येषु पशुषु ये शारीरशक्त्यतिशयाः दृश्यन्ते ते तु तान् पशून् उन्नत्यादिषु क्षेत्रेषु अद्वितीयान् अकुर्वन्। किन्तु राजत्वं प्राप्तुं तावन्मात्रं न पर्याप्तम् ।...'' छात्राः मौनेन आचार्यस्य कथनस्य श्रवणे मग्नाः आसन् । आचार्यः कथनम् अनुवर्तितवान्– ''मनोबलं सर्वबलातिशायि । मनोबलम् अस्ति चेत् यत्किमपि कार्यं साधयितुं शक्यम्। तदेव मनोबलं 'धीरता' इत्यपि उच्यते । तच्च मनोबलम् अधिकम् अस्ति सिंहे । अतः एव सिंहः वनराजः अभवत् ।...'' सर्वे छात्राः दत्तावधानाः सन्तः आचार्यस्य कथनं शृण्वन्तः आसन् । क्षणं विरम्य गुरुः कथनम् अनुवर्तितवान् – ''अस्मासु अपि एतत् मनोबलं सुदृढं स्यात् । शरीरस्य सर्वाणि अङ्गानि अपि यत्र असफलानि, तत्र मनोबलम् एकमेव अस्माकम् आधारः । अतः तस्य मनोबलस्य दृढतायै अस्माभिः निरन्तरं प्रयासः करणीयः । 'क्रियासिद्धिः सत्त्वे भवति' इति यद् वचनं श्रूयते तस्य अपि आशयः अयमेव । ये जीवने विशेषसफलतां प्राप्तवन्तः तेषां जीवनं पश्यत । ते आसन् मनोबलेन सुदृढाः । अतः सर्वदा अपि मनोबलस्य वर्धनाय प्रयासः करणीयः ।''



Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com

# चतुर्थः पाठः । शुकवृत्तान्तः ।

**भूमिका –** संस्कृतगद्यसाहित्ये बाणभट्टस्य स्थानम् अनन्यसाधारणं वर्तते । तस्य कालः ख्रिस्ताब्दस्य सप्तमं शतकम् इति विमर्शकाः वदन्ति । सः सम्राड्हर्षवर्धनस्य राजसभायां राजकविः आसीत् । 'कादम्बरी' इति विदग्धं गद्यकाव्यं तथा 'हर्षचरितम्' इति ऐतिहासिकगद्यकाव्यम् इति द्वौ तस्य ग्रन्थौ प्रसिद्धौ ।

कादम्बरीकथायाः नायिका 'कादम्बरी' । अतः कादम्बरी इति ग्रन्थनाम विद्यते । समासप्रचुरता, दीर्घवर्णनानि, विशेषणप्रचुरता, सन्धिविपुलता, अतिदीर्घवाक्यानि एतैः विशेषैः युक्ता अपि एषा कथा अतीव रुचिरा तथा मनोहारिणी इति ख्याता । पेटिकान्तर्गता पेटिका इव कथान्तर्गता कथा प्रकटीभवति इत्यपि अस्य ग्रन्थस्य रचनाविशेषः। केचित्परिच्छेदा अपि सरल-सुलभ-सुबोधशब्दादिसंयोजनेन समलङ्कृताः सन्ति ।

अयं कथांशः कादम्बरीग्रन्थस्य प्रारम्भे एव लभ्यते । वैशम्पायनः नाम शुकः शूद्रकराजाय स्वकथां वर्णयति। तस्यां कथायाम् अन्तर्भूता अस्ति शुकस्य पूर्वजन्मनः कथा ।



आसीत् राजा शूद्रको नाम । तस्य राज्ञः विदिशाभिधाना नगरी राजधान्यासीत् । एकदा प्रतिहारी राजानमब्रवीत्-देव, द्वारस्थिता काचित् कन्यका अन्येन केनचित् पुरुषेण सह पञ्जरस्थं शुकमादाय देवं विज्ञापयति, ''अहमिच्छामि देवदर्शनसुखमनुभवितुम् ।'' एतदाकर्ण्य उपजातकुतूहलस्तु राजा, ''को दोषः, प्रवेश्यताम्'', इत्यादिदेश। तदा प्रतिहारी तां कुमारीं प्रावेशयत्। सा कन्यका राजानं प्रणनाम । स पुरुषस्तं विहङ्गममादाय किञ्चिदुपसृत्य राज्ञे न्यवेदयत्, ''देव, विदितसकलशास्त्रः सकलभूतलरत्नभूतः अयं वैशम्पायनो नाम शुकः । तदयमात्मीयः क्रियताम् ।'' एवं नरपतेः पुरो निधाय पञ्जरमुदघाटयत्। उद्घाटिते स विहङ्गराजो राजानमुद्दिश्य राजस्तुतिपरमेकं श्लोकं पपाठ । राजा तं श्रुत्वा सञ्जातविस्मयः प्रधानममात्यं कुमारपालितमब्रवीत्, ''श्रुता भवद्भिरस्य विहङ्गमस्य स्पष्टता वर्णोच्चारणे, स्वरे च मधुरता? महदाश्चर्यम्! प्रायेण पक्षिणः पशवश्च भयाहारनिद्रासंज्ञामात्रवेदिनो भवन्ति। इदन्तु महच्चित्रम् ।'' कुमारपालितः नृपमवदत्, ''देव! किमत्र चित्रम्? एते शुकसारिकाप्रभृतयो विहङ्गविशेषा यथाश्रुतं वाचमुच्चारयन्ति ।'' वचनमेतत् श्रुत्वा नरपतिः वैशम्पायनमब्रवीत्, ''आस्तां तावत् सर्वमेवेदम्, अपनयतु नः कुतूहलम्, आवेदयतु भवानादितः । निवेदयतु भवतः पूर्ववृत्तान्तम्।'' वैशम्पायनस्तु सादरमब्रवीत्, ''देव, महतीयं कथा यदि कौतुकमाकर्ण्यताम्।''



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

''अस्ति मध्यदेशालङ्कारभूता विन्ध्याटवी । तस्यां महामुनेरगस्त्यस्य आश्रमपदमासीत् । तस्य नातिदूरे पम्पाभिधानं सरः । तस्य पश्चिमे तीरे जीर्णः शाल्मलीवृक्षः । तत्र कोटरेषु शुककुलानि प्रतिवसन्ति स्म । एकस्मिन् कोटरे जायया सह निवसतः पितुरहमेको सूनुरभवम् । प्रसववेदनया जननी मे लोकान्तरमगच्छत् । जायाविनाशदुःखितोऽपि तातः मत्संवर्धनपरः अभवत्। एकदा प्रभातसमये मृगयासक्तस्य महतो जनसमूहस्य कोलाहलमशृणवम् । तदाहं समीपवर्तिनः पितुः पक्षपुटान्तरमविशम् । अभिमुखं शबरसैन्यमपश्यम् । तदैव शबरसैन्यस्य शबरसेनापतिमपश्यम् । सः शबरसेनापतिः अटवीपरिभ्रमणसमुद्भवश्रमापनयार्थम् आगत्य तस्यैव शाल्मलीतरोः अधः छायायां पल्लवासने समुपाविशत्। एकतमस्तु वृद्धशबरः विहगामिषास्वादलालसः शुककुलस्थानं वृक्षम् आमूलम् अपश्यत् । ततः सः पादपमारुह्य कोटरान्तरेभ्यः शुकशावकानगृह्णात्। अपगतासून् कृत्वा क्षितौ अपातयत् । क्रमेण च तातम् आकृष्य अपगतासुमकरोत् । मां तु तत्पक्षपुटान्तर्गतं नालक्षयत्। शुष्कपत्रराशेः उपरि पतितमात्मानमपश्यम्। यावच्चासौ तस्मात् तरुशिखरात् अवतरति तावदहं विटपिनो मूलदेशमविशम् । अवतीर्य च क्षितितलविप्रकीर्णान् संहृत्य शुकशिशून् आबद्ध्य अगच्छत् । तदा मां बलवती पिपासा परवशमकरोत् । तस्मात् तरुमूलात् सलीलसमीपमुपसर्तुं प्रयत्नमकरवम्। सरसः अदूरवर्तिनि तपोवने जाबालिर्नाम महातपा मुनिः प्रतिवसति स्म । तत्तनयश्च हारितनामा मुनिकुमारः स्नातुमिच्छुः तदेव पम्पासरोवरमुपागमत्। स मां तदवस्थमालोक्य सरस्तीरमनाययत्। मामङ्गुल्या कतिचित् सलिलबिन्दूनपाययत्। मां गृहीत्वा तपोवनाभिमुखं शनैरगच्छत् । ततो मां छायायामेकदेशे स्थापयित्वा हारितः कृताभिवादनः पितुः समीपवर्तिनि कुशासने समुपाविशत् । आलोक्य मां ते मुनयः ''कुतः अयम् आसादितः शुकशिशुः'' इति तमपृच्छन्। असौ तानब्रवीत्, ''अयं स्नातुमितो गतेन मया सरस्तीर-तरु-नीड-पतितः जातदयेनानीतः। यावद् अयम् अक्षमः अन्तरिक्षम् उत्पतितुं तावत् अत्र एव कस्मिंश्चित् आश्रमतरुकोटरे धारयतु जीवितम्।'' इति एवम् अस्मत्सम्बद्धम् आलापम् आकर्ण्य भगवान् जाबालिः मां दृष्ट्वा ''स्वस्य एव अविनयस्य फलम् अनेन अनुभूयते'' इत्यवदत् । ततः सा तापसपरिषद् याचितवती तं भगवन्तम् ''आवेदय भगवन्, कथमस्य सम्भवः, किमभिधानो वायम्, अपनयतु नः कुतूहलम्।'' तदा सः महामुनिः प्रत्यवदत्- ''श्रूयतां यदि कौतूहलम्।'' एवं भगवता जाबालिना शुकस्य पूर्वजन्मवृत्तान्तकथनम् आरब्धम् ।

### शब्दार्थः ।

१) उपजातः – निर्मितः ।
२) विस्मयः – आश्चर्यम् ।
३) शुककुलानि – शुकवंशाः ।
४) जाया – पत्नी ।
५) सूनुः – पुत्रः, आत्मजः ।
६) लोकान्तरम् अगमत् – दिवङ्गता ।
७) समीपवर्तिनः – निकटवर्तिनः ।
८) अभिमुखम् – मुखस्य पुरतः ।
९) क्षितितलम् – पृथ्वीतलम् ।
१०) अपगतासुः – मृतः ।
११) विहगामिषास्वादलालसः – विहगानां मांसस्य आस्वादलोलुपः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### सन्धिविग्रहः ।

१) शूद्रको नाम - शूद्रकः + नाम ।
२) राजधान्यासीत् - राजधानी + आसीत् ।
३) उपजातकुतूहलस्तु - उपजातकुतूहलः + तु ।
४) भवद्भिरस्य - भवद्भिः + अस्य ।
५) क्रियतामित्युक्त्वा - क्रियताम् + इति + उक्त्वा ।
६) पशवश्च - पशवः + च ।
७) महच्चित्रम् - महत् + चित्रम् ।
८) सर्वमेवेदम् - सर्वम् + एव + इदम् ।
९) भवानादितः - भवान् + आदितः ।
१०) महतीयम् - महती + इयम् ।
११) पितुरहमेको - पितुः + अहम् + एकः ।
१२) अपगतासूंश्च - अपगतासून् + च ।
१३) कुतोऽयमासादितः - कुतः + अयम् + आसादितः ।
१४) जाबालिर्नाम - जाबालिः + नाम ।

### समासविग्रहः ।

१) विदिशाभिधाना - विदिशा अभिधानं यस्याः सा । बहुव्रीहिः ।
२) द्वारस्थिता - द्वारे स्थिता । सप्तमीतत्पुरुषः ।
३) पञ्जरस्थम् - पञ्जरे तिष्ठति इति । तम् । उपपदतत्पुरुषः ।
४) कोटरोदरेषु - कोटराणाम् उदराणि, तेषु । षष्ठीतत्पुरुषः ।
५) शाल्मलीवृक्षः - शाल्मली नाम वृक्षः । कर्मधारयः ।
६) क्षितितलविप्रकीर्णान् - क्षितेः तलं क्षितितलम् । षष्ठीतत्पुरुषः ।
क्षितितले विप्रकीर्णाः, तान् । सप्तमीतत्पुरुषः ।
७) अपगतासून् - अपगतानि असूनि येभ्यः ते, तान् । बहुव्रीहिः । (असु=प्राणः)
८) महातपाः - महत् तपः यस्य सः । बहुव्रीहिः ।
९) अक्षमः - न क्षमः । नञ्तत्पुरुषः ।

### रूपपरिचयः ।

१) आदाय - आ + दा (१ प.प., ३ उ.प.), पूर्वकालवाचक-ल्यबन्त-अव्ययम् ।
२) आदिदेश - आ + दिश् (६ प.प.), लिट्, प्रथमपुरुषः, एकवचनम् ।
३) प्रणनाम - प्र + नम् (१ प.प.), लिट्, प्रथमपुरुषः, एकवचनम् ।
४) न्यवेदयत् - नि + विद् (२ प.प.), णिजन्तम् , लङ्, प्रथमपुरुषः, एकवचनम् ।
५) निधाय - नि + धा (३ उ.प.), पूर्वकालवाचक-ल्यबन्त-अव्ययम् ।
६) पपाठ - पठ् (१ प.प.), लिट्, प्रथमपुरुषः, एकवचनम् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## भाषाभ्यासः ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१. ''प्रायेण पक्षिणः पशवश्च भयाहारनिद्रासंज्ञामात्रवेदिनो भवन्ति ।''

२. ''देव, महतीयं कथा यदि कौतुकमाकर्ण्यताम् ।''

३. ''आवेदय भगवन्, कथमस्य सम्भवः, किमभिधानो वायम् ।''

**२. पूर्णवाक्येन उत्तरत ।**

१) राज्ञः नाम किम् ?

२) कः राजस्तुतिपरं श्लोकं पपाठ ?

३) शुककुलानि कुत्र प्रतिवसन्ति स्म ?

४) शुकः प्रभाते किम् अशृणोत् ?

५) शुकं सरस्तीरं कः अनयत् ?

६) जाबालिः शुकं दृष्ट्वा किमवदत् ?

७) शुकसारिकाप्रभृतयः विहङ्गविशेषाः किम् उच्चारयन्ति ?

**३. उचितं कारणं चित्वा पूर्णवाक्येन उत्तरत ।**

१) राजा सञ्जातविस्मयः अभवत् ।

अ) यतः राजा शुकमुखात् श्लोकम् अशृणोत् ।

आ) यतः राजा द्वारस्थितां कन्यकाम् अपश्यत् ।

२) शुकशिशुः पितुः पक्षपुटान्तरम् अविशत् ।

अ) यतः सः व्याघ्रम् अपश्यत् ।

आ) यतः सः जनसमूहस्य कोलाहलम् अशृणोत् ।

३) मुनिकुमारः पम्पासरोवरम् उपागमत् ।

अ) यतः सः स्नानं कर्तुम् ऐच्छत् ।

आ) यतः सः पिपासाकुलः आसीत् ।

४) शुकशिशोः पिता तस्य संवर्धनपरः आसीत् ।

अ) यतः तस्य नीडम् असुरक्षितम् अभवत् ।

आ) यतः तस्य जननी लोकान्तरम् अगमत् ।

**४. कः कं वदति ।**

१) ''अहमिच्छामि देवदर्शनसुखमनुभवितुम्''।

२) ''आस्तां तावत् सर्वमेवेदम्, अपनयतु नः कुतूहलम्, आवेदयतु भवानादितः'' ।

३) ''श्रुता भवद्भिः अस्य विहङ्गमस्य स्पष्टता वर्णोच्चारणे, स्वरे च मधुरता?''

४) ''प्रायेण पक्षिणः पशवश्च भयाहारनिद्रासंज्ञामात्रवेदिनो भवन्ति '' ।

५) ''कुतोऽयमासादितः शुकशिशुः''।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

६) ''अयं स्नातुमितो गतेन मया सरस्तीर-तरु-नीड-पतितः जातदयेनानीतः'' ।
७) ''स्वस्यैवाविनयस्य फलमनेनानुभूयते'' ।

५. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।

१) शुकः राजानमुद्दिश्य राजस्तुतिपरमेकं श्लोकं पपाठ ।
२) प्रायेण पक्षिणः पशवश्च भयाहारनिद्रासंज्ञामात्रवेदिनो न भवन्ति ।
३) शाल्मलीवृक्षः नूतनः आसीत् ।
४) एकदा अहं सन्ध्यासमये जनसमूहस्य कोलाहलम् अशृणवम् ।
५) हारितः मां गृहीत्वा तपोवनाभिमुखं शनैरगच्छत् ।

६. समानार्थकशब्दान् लिखत ।

नगरी, शुकः, स्पष्टता, मुनिः, सरः, जाया, सूनुः, जननी, प्रभातम्, असुः, क्षितिः, पल्लवम्

७. विरुद्धार्थकशब्दान् लिखत ।

राजा, स्पष्टता, कोलाहलः, मधुरता, प्रभातम्

८. समानार्थकशब्दानां मेलनं कुरुत ।

| अ | आ |
|---|---|
| नाम | वृक्षः । |
| पार्थिवः | पक्षी । |
| कन्यका | अभिधानम् । |
| विहङ्गः | राजा । |
| पादपः | कुमारी । |

९. विरुद्धार्थकशब्दानां मेलनं कुरुत ।

| अ | आ |
|---|---|
| स्तुतिः | नूतनः । |
| स्पष्टता | अवतीर्य । |
| जीर्णः | निन्दा । |
| आरुह्य | तरुमूलम् । |
| तरुशिखरम् | सन्दिग्धता । |

१०. मञ्जूषातः विशेषणानि चित्वा लिखत ।

कन्यका, वैशम्पायनः, श्लोकः, अमात्यः, कथा, विन्ध्याटवी, शाल्मलीवृक्षः, तातः, जनसमूहः, वृद्धशबरः, पिपासा, मुनिः
(मध्यदेशालङ्कारभूता, महती, प्रधानः, राजस्तुतिपरः, विदितसकलशास्त्रः, द्वारस्थिता, महातपाः, बलवती, विहगामिषास्वादलालसः, मृगयासक्तः, दुःखितः, जीर्णः)

११. सूचनानुसारं परिवर्तनं कुरुत ।

१) अहम् इच्छामि देवदर्शनसुखम् अनुभवितुम् । (वाक्यं बहुवचने परिवर्तयत ।)



Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com

२) राजा आदिदेश । (लङ्लकारे परिवर्तयत ।)
३) राजा तं श्लोकं श्रुत्वा विस्मयचकितः अभवत् । (पूर्वकालवाचकं धातुसाधितम् अव्ययं निष्कासयत ।)
४) भवान् अपनयतु नः कुतूहलम् । ('भवान्' स्थाने 'त्वं' योजयत ।)
५) कोटरेषु शुककुलानि प्रतिवसन्ति स्म । ('स्म' निष्कासयत ।)
६) अहं मृगयासक्तस्य जनसमूहस्य कोलाहलम् अशृणवम् । (वाच्यपरिवर्तनं कुरुत ।)
७) शुकशावकान् अपगतासून् कृत्वा क्षितौ अपातयत् । (पूर्वकालवाचक -धातुसाधित-अव्ययं निष्कासयत ।)
८) स्वस्य एव अविनयस्य फलम् अनेन अनुभूयते । (वाच्यपरिवर्तनं कुरुत ।)
९) अयम् अत्र एव कस्मिंश्चित् आश्रमतरुकोटरे जीवितं धारयतु । (विधिलिङ्लकारे परिवर्तयत ।)
१०) जाबालिः मां दृष्ट्वा अवदत् । (पूर्वकालवाचक -धातुसाधित-अव्ययं निष्कासयत ।)

**१२. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।**

१) प्रतिहारी राजानम् अब्रवीत् । (तद्)
२) सा कन्यका राजानं प्रणनाम । (तद्)
३) पुरुषः नरपतेः पुरः निधाय पञ्जरम् उदघाटयत् । (तद्)
४) प्रायेण पक्षिणः भयाहारनिद्रासंज्ञामात्रवेदिनः भवन्ति (तद्)
५) तस्याम् अगस्त्यस्य आश्रमपदम् आसीत् । (विन्ध्याटवी)
६) सः शुकशावकान् अगृह्णात् । (तद्)
७) अहं विटपिनः मूलदेशम् अविशम् । (तद्)
८) मुनयः तम् अपृच्छत् । (हारित)
९) भगवता जाबालिना शुकस्य पूर्वजन्मवृत्तान्तकथनम् आरब्धम् । (तद्)

**१३. जालचित्रं पूरयत ।**




**उपक्रमः** - बाणभट्टः तथा दण्डी एतयोः परिचयं लिखत ।

***



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पञ्चमः पाठः । भेरीदृष्टान्तः ।

**भूमिका** – जैनानां मूलधार्मिकसाहित्यम् 'आगम' इत्युच्यते । तस्याः परम्परायाः 'नन्दीसूत्रम्' इति प्राकृतग्रन्थः प्रसिद्धः । ग्रन्थोऽयं ज्ञानकोष इव उपयुक्तः । अस्य ग्रन्थस्य विवरणाय मलयगिरि–आचार्यैः संस्कृतभाषया टीकैका लिखिता । तस्याः टीकायाः सम्पादितः भागोऽयम् ।

'सूत्रार्थग्रहणे शिष्यः कीदृशः भवेत्' एवं स्पष्टीकर्तुं भेरीदृष्टान्तः अत्र प्रस्तुतः । भगवता देवेन वासुदेवाय प्रसन्नमनसा अमङ्गलनाशाय भेरी प्रदत्ता । ततस्ततः ........



ततः चन्दनमयीम् अशिवोपशमनीं देवो भेरीमयच्छत् कल्पं चास्याः अकथयत् – "यथा षण्मासषण्मासपर्यन्ते निजाऽस्थानमण्डपे वाद्यैषा भेरी । शब्दश्चास्याः सर्वतो द्वादशयोजनव्यापी जलभृन्मेघध्वनिः इव गम्भीरः प्रसरिष्यति। यश्च शब्दं श्रोष्यति तस्य प्राक्तनो व्याधिः नियमतः अपयास्यति। भावी च भूयः षड्भ्यः मासेभ्यः पूर्वं न भविष्यति।" तत एवमुक्त्वा देवः स्वस्थानमगच्छत्। वासुदेवोऽपि तां भेरीं सदैव भेरीताडननियुक्ताय समर्पितवान्। शिक्षां चास्मै ददौ – "यथा षण्मासषण्मासपर्यन्ते ममास्थानमण्डपे वाद्यैषा त्वया भेरी यत्नतः च रक्षणीया ।" ततो द्वितीयदिवसे विशिष्टसिंहासने उपविष्टः तां भेरीमताडयत्। भेरीशब्दश्रवणसमनन्तरमेव दिनपतिकरताडितम् अन्धकारम् इव द्वारवत्यां पुरि सकलमपि रोगजालं विध्वंसमुपागच्छत् ।

तत एवं व्याधिविकले गच्छति काले कोऽपि दूरदेशान्तरवर्ती धनाढ्यो महारोगाभिभूतो भेरीशब्दमाहात्म्यम् आकर्ण्य द्वारवतीमगच्छत् । स दैवविनियोगात् भेरीताडनदिवसातिक्रान्ते प्राप्तः। ततोऽचिन्तयत्, "कथमिदानीमहं भविष्यामि? यतः भेरीताडनं षण्मासानन्तरमेव । षड्भिः च मासैः एषः प्रवर्धमानो व्याधिरसूनपि कवलयिष्यति। ततः किं करोमि इति । इत्थं कतिपयदिनानि चिन्ताशोकसागरनिमग्नः कथमपि शेमुषीपोतमासाद्य तर्तुं प्रायतत–'यदि तस्याः शब्दतः अपि रोगः अपयाति तर्हि तदेकशकलं घर्षित्वा प्राशनेन सुतरामपयास्यति। प्रभूतं च मे स्वम्। ततः प्रलोभयामि धनेन भेरीवादकम् । येन तस्याः शकलम् एकं मे समर्पयति ।' ततः प्रलोभितो धनेन भेरीवादकः । ततः सः तच्छकलमेकं तस्मै अयच्छत्। तत्स्थाने च तस्याम् अन्यत् शकलं योजितम्। एवमन्यान्यदेशान्तरात् आयाताः रोगिजनाः । तेभ्यः धनलुब्धतया खण्डखण्डप्रदानेन सकलापि भेरी कन्थेव खण्डसङ्घातात्मिका कृता । ततः अपगतः दिव्यप्रभावः।

ततः प्रातः आस्थानमण्डपे सिंहासने समुपविश्य आकारितः भेरीताडननियुक्तः पुमान् । दत्तः च आदेशः अस्मै भेरीताडने । ततस्ताडिता तेन भेरी । साऽपगतदिव्यप्रभावा न भाङ्कारनादेन आस्थानमण्डपमात्रम् अपि पूरयति । ततो विस्मितो वासुदेवो यथा किमेषा न आस्थानमण्डपम् अपि भाङ्कारनादेन पूरयितुं शक्तवती? ततः स्वयम् अवलोकयामास तां भेरीम् । दृष्टा सा महादरिद्रकन्था इव लघु–लघुतर–शकल–सहस्र–सङ्घातात्मिका । ततः चुकोप तस्मै वासुदेवो, 'रे



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

दुष्टाधम, किमिदम् ?'' ततः स प्राणभयात् सकलमपि यथावस्थितमकथयत्। ततः स तत्कालमेव निरोपितो विनाशाय ।

ततो भूयोऽपि वासुदेवो जनानुकम्पया तं देवम् आराधयामास । ततः प्रत्यक्षीबभूव देवः । कथितवान् च वासुदेवो प्रयोजनम् । ततः पुनरपि दत्तवान् अशिवोपशमनीं भेरीम् । तां च आप्तत्वेन सुनिश्चिताय वासुदेवः समर्पयामास।

यथा भेरी तथा प्रवचनावगतौ सूत्रार्थौ । यः सूत्रार्थावन्तराले विस्मृत्य विस्मृत्य अन्यतः सूत्रम् अर्थं वा संयोज्य कन्थासमानौ करोति स भेरी-ताडन-नियुक्त-प्रथम-पुरुष-समानः । स च एकान्तेन अयोग्यः। यस्त्वाचार्यप्रणीतौ सूत्रार्थौ यथावत् अवधारयति स कल्याणसम्पदे योग्यः ।

## वाग्विशेषः ।

१. कवलयिष्यति - 'कवल' शब्दात् नामधातुः 'कवलय्', लृट् , प्रथमपुरुषः, एकवचनम् । एषा वैशिष्ट्यपूर्णा रचना ।

२. अगमत् - गम् (१ प.प.) लुङ् , प्रथमपुरुषः, एकवचनम् । लुङ्लकारः दशसु लकारेषु एकः भूतकालप्रदर्शकः ।

३. प्रत्यक्षीबभूव - प्रत्यक्ष + भू च्विरूपम् , लिट् , प्रथमपुरुषः, एकवचनम् ।

४. अस्मिन् पाठे आम्-प्रत्ययान्तानि लिट्लकारस्य नैकानि रूपाणि सन्ति। (समर्पयामास, निभालयामास इ.)

## शब्दार्थः ।

| | | | |
|---|---|---|---|
| १) अशिवोपशमनी | - अमङ्गलहारिणी । | २) भेरी | - दुन्दुभिः । |
| ३) कल्पः | - नियमः । | ४) प्राक्तनः | - पुरातनः । |
| ५) असु | - प्राणः । | ६) स्वम् | - धनम् । |
| ७) शकलः | - खण्डः । | ८) शेमुषीपोतः | - बुद्धिरूपा नौका । |
| ९) खण्डसङ्घातात्मिका | - खण्डसमूहेन युक्तः । | १०) आस्थानमण्डपः | - सभामण्डपः । |
| ११) शिक्षा | - आदेशः । | १२) रोगजालम् | - रोगसमूहः । |
| १३) विध्वंसम् उपागमत् | - नष्टः अभवत् । | १४) कवलयिष्यति | - गिलयिष्यति । |
| १५) एकान्तेन | - सर्वथा । | १६) आचार्यप्रणीतौ | - आचार्यैः अध्यापितौ । |

## सन्धिविग्रहः ।

| | | | |
|---|---|---|---|
| १) वाद्यैषा | - वाद्या + एषा । | २) शब्दश्चास्याः | - शब्दः + च + अस्याः । |
| ३) विध्वंसमुपागमत् | - विध्वंसम् + उपागमत् । | ४) व्याधिरसूनपि | - व्याधिः + असून् + अपि । |
| ५) तच्छकलमेकम् | - तत् + शकलम् + एकम् । | ६) सूत्रार्थावन्तराले | - सूत्रार्थौ + अन्तराले । |
| ७) यस्त्वाचार्यप्रणीतौ | - यः + तु + आचार्यप्रणीतौ | | |

## समासविग्रहः ।

१) अन्यान्यदेशान्तरायातरोगिजनेभ्यः - अन्यश्च अन्यश्च अन्यान्यौ । इतरेतरद्वन्द्वः ।
अन्य देशः देशान्तरम्। कर्मधारयः ।
अन्यान्यदेशान्तरात् आयाताः । पञ्चमीतत्पुरुषः ।
अन्यान्यदेशान्तरायाताः रोगिजनाः । कर्मधारयः । तेभ्यः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२) द्वादशयोजनव्यापी – द्वादशानां योजनानां समाहारः – द्वादशयोजनम् । द्विगुः ।
द्वादशयोजनं व्याप्नोति । उपपदतत्पुरुषः ।
३) भेरीताडननियुक्ताय – भेर्याः ताडनं भेरीताडनम् । षष्ठीतत्पुरुषः ।
भेरीताडने नियुक्तः । सप्तमीतत्पुरुषः । तस्मै ।
४) चिन्ताशोकसागरनिमग्नः – चिन्ता च शोकः च चिन्ताशोकौ । इतरेतरद्वन्द्वः ।
चिन्ताशोकयोः सागरः । षष्ठीतत्पुरुषः ।
चिन्ताशोकसागरे निमग्नः । सप्तमीतत्पुरुषः ।
५) जनानुकम्पा – जनेषु अनुकम्पा । सप्तमीतत्पुरुषः ।
६) अपगतदिव्यप्रभावा – दिव्यः प्रभावः । कर्मधारयः ।
अपगतः दिव्यप्रभावः यस्याः सा बहुव्रीहिः ।
७) प्रवचनावगतौ – प्रवचनेन अवगतौ । तृतीयातत्पुरुषः ।
८) सूत्रार्थौ – सूत्रं च अर्थः च । इतरेतरद्वन्द्वः ।

## रूपपरिचयः ।

१) तर्तुम् – तृ-तर् (१ प.प.), हेत्वथक-तुमन्त-अव्ययम् ।
२) घर्षित्वा – घृष् (१ प.प.), पूर्वकालवाचक-त्वान्त-अव्ययम् ।
३) अपयास्यति – अप+या (२ प.प.), लृट्, प्रथमपुरुषः, एकवचनम् ।
४) प्रलोभयामि – प्र+लुभ् (४ प.प.), णिजन्तम् , लट् उत्तमपुरुषः, एकवचनम्।
५) प्रलोभितः – प्र+लुभ् (४ प.प.), णिजन्तम् , क्त-प्रत्ययान्त-विशेषणम् , पुंल्लिङ्गम् , प्रथमा, एकवचनम्।
६) योजितम् – युज् (७ उ.प.), णिजन्तम् , क्त-प्रत्ययान्त-विशेषणम् , नपुंसकलिङ्गम्, प्रथमा, एकवचनम्।
७) विस्मितः – वि+स्मि (१ आ.प.), क्त-प्रत्ययान्त-विशेषणम् , पुंल्लिङ्गम् , प्रथमा, एकवचनम् ।
८) शक्तवती – शक् (५ प.प.), क्तवतु-प्रत्ययान्त-विशेषणम्, स्त्रीलिङ्गम्, प्रथमा, एकवचनम् ।
९) निभालयामास – नि+भल् (१० आ.प.), आम्-प्रत्ययान्त-लिट्, प्रथमपुरुषः, एकवचनम् ।
१०) आराधयामास – आ+राध् (५ प.प.), णिजन्तम् , आम्-प्रत्ययान्त-लिट्, प्रथमपुरुषः, एकवचनम् ।
११) समर्पितवान् – सम्+ऋ (१ प.प.), णिजन्तम् , क्त-प्रत्ययान्त-विशेषणम् , पुंल्लिङ्गम् , प्रथमा, एकवचनम् ।
१२) आकर्ण्य – आ+कर्ण् (१० उ.प.), पूर्वकालवाचक-ल्यबन्त-अव्ययम् ।
१३) कथितवान् – कथ् (१० उ.प.), क्तवतु-प्रत्ययान्त-विशेषणम् , पुंल्लिङ्गम् , प्रथमा, एकवचनम् ।
१४) समर्पयामास – सम्+ऋ (१ प.प.), आम्-प्रत्ययान्त-णिजन्तम्, लिट्, प्रथमपुरुषः, एकवचनम् ।
१५) अवधारयति – अव+धृ (१ प.प.), णिजन्तम्, लट्, प्रथमपुरुषः, एकवचनम् ।
१६) प्रत्यक्षीबभूव – प्रत्यक्ष+भू (१ प.प.), च्विरूपम्, लिट्, प्रथमपुरुषः, एकवचनम् ।
१७) अवनीया – अव+नी (१ प.प.), कृत्य-प्रत्ययान्त-विशेषणम्, स्त्रीलिङ्गम्, प्रथमा, एकवचनम् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१८) उपागमत्  – उप+आ+गम् (१ प.प.), लुङ्, प्रथमपुरुषः, एकवचनम् ।
१९) प्रवर्धमानः  – प्र+वृध् (१ आ.प.), शानच्-प्रत्ययान्त-विशेषणम्, पुंल्लिङ्गम्, प्रथमा, एकवचनम् ।

## भाषाभ्यासः ।

### १. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।

१) वाद्यैषा त्वया भेरी यत्नतश्चावनीया ।
२) ततः प्रलोभयामि धनेन भेरीवादकम् ।
३) ततः अपगतः दिव्यप्रभावः ।
४) यथा भेरी तथा प्रवचनावगतौ सूत्रार्थौ ।

### २. पूर्णवाक्येन उत्तरत ।

१) देवः कीदृशीं भेरीम् अयच्छत् ?
२) भेर्याः शब्दं श्रुत्वा किं नियमतोऽपयास्यति ?
३) वासुदेवः भेरीं कस्मै समर्पितवान् ?
४) वासुदेवः किमर्थं देवम् आराधयामास ?
५) कः कल्याणसम्पदे योग्यः ?
६) दूरदेशान्तरवर्ती धनाढ्यः किमर्थं द्वारवतीम् अगच्छत् ?
७) धनलुब्धतया भेरीवादकेन भेर्याः स्थितिः कीदृशी कृता ?

### ३. प्रश्ननिर्माणं कुरुत ।

१) धनाढ्यः भेरीशब्दमाहात्म्यमाकर्ण्य द्वारवतीमगच्छत् ।
२) स प्राणभयात् सकलमपि यथावस्थितमकथयत् ।
३) देवो भेरीम् अयच्छत् ।
४) वासुदेवो जनानुकम्पया देवम् आराधयामास ।
५) वासुदेवः तां भेरीं भेरीताडननियुक्ताय समर्पितवान् ।

### ४. समानार्थकशब्दान् लिखत ।

कल्पः, मेघः, धनाढ्यः, पोतः, सुतराम्,

### ५. विरुद्धार्थकशब्दान् लिखत ।

अशिवम्, भावी, प्रभूतम्, अयोग्यः

### ६. समानार्थकशब्दान् मेलयत ।

| अ | आ |
|---|---|
| भेरी | खण्डः |
| दिनपतिः | बुद्धिः |
| असवः | ध्वनिः |
| प्रभूतम् | दुन्दुभिः |
| शकलः | सूर्यः |
| शेमुषी | धनम् |
| व्याधिः | प्राणाः |
| अन्धकारः | विपुलम् |
| शब्दः | रोगः |
| स्वम् | तमः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### ७. विरुद्धार्थकशब्दान् मेलयत ।

| अ | आ |
|---|---|
| दूरम् | निर्भयः |
| धनाढ्यः | क्षयन् (क्षीयमाणः) |
| प्रभूतम् | समीपम् |
| प्रवर्धमानः | दरिद्रः |
| सभयः | अल्पम् |

### ८. विशेषण–विशेष्याणां मेलनं कुरुत ।

| अ | आ |
|---|---|
| भेरी | प्रलोभितः |
| धनाढ्यः | पुरी |
| द्वारवती | चन्दनमयी |
| वासुदेवः | व्याधिविकलः |
| भेरीवादकः | विस्मितः |

### ९. सूचनानुसारं परिवर्तयत ।

१) देवः स्वस्थानम् अगमत् । (लङ्लकारे परिवर्तयत)
२) धनाढ्यः भेरीशब्दमाहात्म्यम् आकर्ण्य द्वारवतीमगच्छत् । (पूर्वकालवाचकं ल्यबन्तं निष्कासयत)
३) ततस्ताडिता तेन भेरी । (वाच्यपरिवर्तनं कुरुत)
४) वासुदेवः प्रयोजनं कथितवान् ।(वाच्यपरिवर्तनं कुरुत)
५) व्याधिविकले गच्छति काले कोऽपि धनाढ्यो भेरीशब्दमाहात्म्यमाकर्ण्य द्वारवतीमगच्छत् । (सतीसप्तमीरचनां निष्कासयत)

### १०. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

१) देवः अस्याः कल्पम् अकथयत् । (भेरी)
२) देवः भेरीं भेरीताडननियुक्ताय समर्पितवान् । (तद्)
३) द्वारवत्यां पुरि सकलमपि रोगजालं विध्वंसम् उपागच्छत् । (तद्)
४) प्रलोभयामि धनेन भेरीवादकम् । (तद्)
५) यथा भेरी तथा प्रवचनावगतौ सूत्रार्थौ । (तद्)

**उपक्रमः –**

प्रजाहितदक्षस्य राज्ञः काञ्चित् कथां लिखत ।

***




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# सति-सप्तमी



घण्टानादः
छात्राणां गमनम्



सूर्यस्य उदयः
कृषीवलस्य कार्यम्



रेलयानस्य आगमनम्
यात्रिकाणाम् आरोहणम्

**(एकस्याः क्रियायाः अनन्तरं साक्षात् तत्सम्बधिनी अपरा क्रिया भवति । किन्तु कर्ता भिन्नः ।)**

१. घण्टानादे जाते छात्राः वर्गात् बहिः अधावन् ।
२. सूर्ये उदिते कृषीवलः कार्यम् आरभते ।
३. रेलयाने सम्प्राप्ते यात्रिकाः यानम् आरूढाः ।

} ईदृशी रचना सतिसप्तमी नाम्ना प्रसिद्धा ।

**सतिसप्तमीरचनां निष्कास्य अपि एतानि वाक्यानि लेखितुं शक्यानि ।**

१. यदा घण्टानादः जातः तदा छात्राः वर्गात् बहिः अधावन् ।
२. यदा सूर्यः उदितः तदा कृषीवलः कार्यम् आरभते । ३. यदा रेलयानं सम्प्राप्तं तदा यात्रिकाः यानम् आरूढाः ।

## स्वाध्यायः

**सतिसप्तमीरचनां निष्कासयत ।**

१) आम्रे पतिते किशोरः अधावत् ।
२) वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ।
३) रामे वनं गते रावणेन सीता अपहृता ।
४) अपत्ये क्रन्दिते माता धावन्ती आगच्छत् ।
५) अध्यापके प्रविष्टे तूष्णीम् उपविशन्तु ।
६) मोदकं खादितवति बालके माता आगता ।
७) ज्ञाते तत्त्वे कः संसारः ?
८) क्षीणे पुण्ये मर्त्यलोकं प्रविशति ।
९) दुःखेषु प्राप्तेषु न तस्य उद्वेगः ।
१०) प्राप्ते मित्रे विमुखः न भवति सः ।
११) तण्डुलेषु सुपक्वेषु अग्निं शामय ।

सतिसप्तमीरचनां निष्कासयितुं कदाचित् 'यद्यपि-तथापि', 'यदि-तर्हि', 'यावत्-तावत्' एतेषामपि प्रयोगः भवति । यथा -

१. कृतेऽपि अध्ययने पूर्णगुणान् न प्राप्नोमि । - यद्यपि कृतम् अध्ययनं तथापि पूर्णगुणान् न प्राप्नोमि ।
२. रचितेऽपि काव्ये फलं न प्राप्यते । - यद्यपि रचितं काव्यं तथापि फलं न प्राप्यते ।
३. अवशिष्टे अन्ने दरिद्रेषु वितर । - यदि अवशिष्टम् अन्नं तर्हि दरिद्रेषु वितर ।
४. मृत्यौ निश्चिते भयेन किम् ? - यदि मृत्युः निश्चितः तर्हि भयेन किम् ?
५. सिद्धे पाके अतिथयः आगताः । - यावत् सिद्धः पाकः तावत् अतिथयः आगताः ।
६. धनस्य अभावे दुर्लक्षितः आसम् । - यावत् धनस्य अभावः (आसीत्) तावत् दुर्लक्षितः आसम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# षष्ठः पाठः । देवेषु सत्यम् असुरेषु अनृतम् ।

**भूमिका –** संस्कृतकथावाङ्मयस्य मूलं वैदिकसाहित्ये दृश्यते । ब्राह्मणग्रन्थाः नाम वैदिकसाहित्यस्य एकतमः विभागः । एतेषु गद्यग्रन्थेषु विपुलाः विविधाः च कथाः प्राप्यन्ते । तासु देवासुरसम्बद्धाः नैकाः कथाः दृश्यन्ते । कथाद्वारेण ब्राह्मणग्रन्थाः नीतिम् उपदिशन्ति । एताः कथा अतीव रोचकाः सन्ति ।

शुक्लयजुर्वेदस्य मुख्यः ब्राह्मणग्रन्थः नाम शतपथब्राह्मणम् । अस्मिन् ब्राह्मणग्रन्थे शतम् अध्यायाः सन्ति । अतः शतपथब्राह्मणम् इति उच्यते । तत्रस्था एषा देवासुरयोः कथा रञ्जिका तथैव बोधपरा अस्ति । शतपथब्राह्मणे नवमे काण्डे आगता एषा कथा ।

साम्प्रतं स्पर्धायुगे सत्यम् अनुपयुक्तम्, असत्यम् एव उपयुक्तम् इति प्रतिभाति । यः मनुष्यः सत्येन चरति सः तत्कालं यशः न प्राप्नोति इति दृश्यते । सः वञ्चनशीलेभ्यः धनमानयशोविहीनः इव प्रतिभाति। किन्तु, सत्यानुगामी सः अन्ततः यशो विन्दते यथा देवासुरेषु देवाः अन्ते विजयिनः अभवन् । क्षारमृत्तिका यथा जलपानेन पीना भवति तथैव, नित्यम् अनृतं वदन्तः असुराः धनमानयशोभिः अवर्धन्त, किन्तु यथा क्षारमृत्तिका दोषपूर्णा तथैव ते मदोन्मत्ताः दर्पिताः आसन् । अन्ततः ते असुराः अभिभूताः । 'सत्यमेव जयते, नानृतम् ।' असत्यवाचिनां यशः न शाश्वतम् इति अत्र सरसतया स्पष्टीकृतम् ।



देवाश्चासुराश्चोभये प्राजापत्याः । प्रजापतेः पितुः सत्यानृते वाचमेव दायाद्यमुपेयुः । सत्यं चैवानृतं च वाक् । त उभय एव सत्यमवदन्, उभये अनृतम् अवदन् । ते ह सदृशं वदन्तः सदृशा एवासुः ।।

अनृतम् उत्सृज्य ते देवा सत्यम् अन्वालेभिरे । उ ह असुरा सत्यम् उत्सृज्य अनृतम् अन्वालेभिरे ।।

तद् ह यदसुरेषु सत्यम् आस तद् ईक्षाञ्चक्रे, देवा वा अनृतम् उत्सृज्य सत्यम् अन्वालप्सत । हन्त तद् (देवान्) अयानि । तद् सत्यं देवान् आजगाम ।।

यद्देवेषु अनृतम् आस, तद् ईक्षाञ्चक्रे, असुरा वा सत्यम् उत्सृज्य अनृतम् अन्वालप्सत। हन्त तद् (असुरान्) अयानि।'' तद् अनृतम् असुरान् आजगाम ।।

ते देवाः सर्वं सत्यम्, सर्वम् असुरा अनृतम् अवदन् । आसक्ति (आग्रहपूर्वकं) सत्यं वदन्तः ते देवाः, प्रथमतः ऐषावीरतरा (धनमानयशोभिः कृशाः) इव बभूवुः, न असुरान् इव आढ्यतरा (धनमानयशोभिः सम्पन्नाः) आसुः। किन्तु, देवा हि एव अन्ततः (विजयिनः) अभवन् । तस्मादु हैतद् य आसक्ति सत्यं वदति, सः प्रथमतः ऐषावीरतर (धनमानयशोभिः कृशः) इवैव भवति, अनाढ्यतर (धनमानयशोविहीनः) इव भवति । परन्तु, स ह त्वेव अन्ततो (विजयी) भवति ।।



अथ ह यथा पिपासुः ऊष (जलं पातुमिच्छमाना क्षारमृद् जलपानेन पीना भवति) तथा आसक्ति (आग्रहपूर्वकं) अनृतं वदन्त असुरा आढ्या इव आसुः । परन्तु, अन्ते परा हि असुरा अभवन् (पराजिताः)। तस्माद् उ ह्यैतद् य आसक्ति अनृतं वदति, सः प्रथमतः ऊष इवैव पिस्यति (प्रभूतजलपानं करोति) आढ्य इव भवति (प्यायते)। किन्तु, स ह त्वेव अन्ततो पराजयते ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## वाग्विशेषः ।

१. अस्यां कथायां वा, ह, उ इत्यादिपादपूरणानां प्रयोगः वारं वारं कृतः ।
२. लिट्लकारस्य रूपाणि अपि बहूनि सन्ति ।
३. समासाः अपि न दीर्घा अत्र । 'सत्यानृते' इति इतरेतरद्वन्द्वसमासस्य विग्रहोऽपि 'सत्यं च एव अनृतं च' इति परिच्छेदे एव उल्लिखितः ।
४. 'अनाढ्यतरा' शब्दस्य स्थाने 'नाढ्यतरा' इति शब्दः प्रयुक्तः । तर-तम भावस्य प्रयोगोऽपि परिच्छेदे दृश्यते ।
५. धातु-उपसर्गयोः मध्ये व्यवधानं वर्तते । यथा-परन्तु, अन्ते परा हि असुरा अभवन् ।
६. कथायाम् 'इव' अव्ययम् उपमार्थे प्रयुक्तम् ।
७. 'प्राजापत्याः' इति तद्धितरूपमपि प्रयुक्तं कथायाम् ।
८. वाक्यानां द्विरुक्तिः अपि अस्ति इति रचनावैशिष्ट्यम् ।

## शब्दार्थः।

१) दायाद्यम् - पुत्रेषु विभजनीयं पितुः धनम्, विभागार्हपितरादिधनम् । देवाः च असुराः च प्रजापतेः पुत्राः । ते पितुः धनरूपेण वाचं प्राप्तवन्तः ।
२) वाचमेव सत्यानृते - वाक् द्विविधा, सत्या च असत्या च । अनृतं नाम असत्यम् ।
३) अन्वालेभिरे - स्वीचक्रुः, जगृहुः ।
४) अन्वालप्सत - आजगाम ।
५) ईक्षाञ्चक्रे - ददर्श, चिन्तयाञ्चकार ।
६) ऐषावीर: - कृशमानवः । अस्मिन् परिच्छेदे धनमानयशोभिः कृशः इत्यर्थः ।
७) ऊष: - क्षारमृत्तिका, क्षारमृद् । क्षारमृत् केवलं जलपानं करोति । जलपानेन सा वर्धते । किन्तु, वर्धितायाः तस्याः न कापि उपयुक्तता कृष्याः कृते ।
८) परा ह त्वेव अन्ततो भवति परा हि असुरा अभवन् - अन्ततः (अनृतवाचिनः) पराजयन्ते यथा देवासुरेषु अनृतवाचिनः असुराः पराजयन्त ।
९) पिपासुः ऊष इव - आत्यन्तिकं पातुम् इच्छन्ती क्षारमृत्तिका इव ।
१०) ऊष इव पिस्यति आढ्य इव भवति - क्षारमृत्तिका पानं करोति, पानेन पिनुते, तथा अनृतवाची यशसा वर्धते किन्तु उन्मत्तो भवति ।

## सन्धिविग्रहः ।

| | | | |
|---|---|---|---|
| १) दायाद्यमुपेयुः | - दायाद्यम् + उपेयुः । | २) एवासुः | - एव + आसुः । |
| ३) तद्धेदम् | - तत् + ह + इदम् । | ४) यद्देवेषु | - यत् + देवेषु । |
| ५) तस्मादु | - तस्मात् + उ । | ६) ह्यैतद् | - हि + एतद् । |

७) देवाश्चासुराश्चोभये - देवाः + च + असुराः + च + उभये ।

## समासविग्रहः ।

१) देवासुराः - देवाः च असुराः च । इतरेतरद्वन्द्वः । २) सत्यानृते - सत्यं च अनृतं च । इतरेतरद्वन्द्वः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### रूपपरिचयः ।

१) उपेयुः – उप + इ (२ प.प.), विधिलिङ्, प्रथमपुरुषः, बहुवचनम् ।
२) अन्वालेभिरे – अनु + आ + लभ् (१ आ.प.), लिट्, प्रथमपुरुषः, बहुवचनम् ।
३) उत्सृज्य – उद् + सृज् (६ प.प.), पूर्वकालवाचक-ल्यबन्त-अव्ययम् ।
४) ईक्षाञ्चक्रे – ईक्ष् (१ आ.प.), लिट्, प्रथमपुरुषः, एकवचनम् ।
५) अन्वालप्सत – अनु + आ + लभ् (१ आ.प.), लुङ्, प्रथमपुरुषः, बहुवचनम् । वैदिकरूपम् ।
६) आसुः – अस् (२ प.प.), लिट्, प्रथमपुरुषः, बहुवचनम् ।
७) आस – अस् (२ प.प.), लिट्, प्रथमपुरुषः, एकवचनम् ।
८) अयानि – इ (२ प.प.), लोट्, उत्तमपुरुषः, एकवचनम् ।
९) पिपासुः – पा (१ प.प.), सन्नन्तरूपम्, कृदन्तम्, पुंल्लिङ्गम्, प्रथमा, एकवचनम् ।

### व्याकरणविशेषः ।

प्राजापत्याः – प्रजापतेः अपत्यानि पुमांसः, तद्धितम् ।

## भाषाभ्यासः ।

**१. माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत ।**

१. ते देवाः सर्वं सत्यम् अवदन् सर्वम् असुरा अनृतम् ।
२. ते ह सदृशं वदन्तः सदृशा एवासुः ।
३. स ह त्वेव अन्ततो भवति देवा हि एव अन्ततोऽभवन् ।
४. परा ह त्वेव अन्ततो भवति परा हि असुरा अभवन् ।

**२. पूर्णवाक्येन उत्तरत ।**

१. देवासुराः कस्य पुत्रा आसन्?
२. दायाद्यरूपेण देवासुराः किं किं प्राप्नुवन् ?
३. देवाः किम् अन्वालेभिरे?
४. असुराः किम् अन्वालेभिरे?
५. देवाः किम् उदसृजन्?
६. असुराः किम् उदसृजन्?
७. अन्ततः के विजयिनोऽभवन्?
८. अन्ततः के पराजिता आसन्?

**३. समानार्थकशब्दान् लिखत ।**

देवाः, असुराः, पिता, सत्यम्, वाक्, पीनः

**४. विरुद्धार्थकशब्दान् लिखत ।**

देवाः, असुराः, सत्यम्, ऐषावीरतरः, अनाढ्यतरः, पीनः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### ५. विशेषण-विशेष्याणां मेलनं कुरुत ।

| अ | ब |
|---|---|
| १) प्रजापते: | देवा: |
| २) दिव्या | पितु: |
| ३) वदन्त: | वाक् |

### ६. सूचनानुसारं परिवर्तनं कुरुत ।

१) सत्यं देवान् आजगाम । (लङ्लकारे परिवर्तयत ।)
२) देवा: हि अन्तत: विजयिन: अभवन् । (एकवचने परिवर्तयत ।)
३) स: अन्तत: पराजयते । (बहुवचने परिवर्तयत ।)

### ७. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।

१) असुरा: अनृतम् अन्वालेभिरे । (तद्)
२) यद् देवेषु अनृतम् आस, तद् ईक्षाञ्चक्रे । (तद्)
३) सत्यं देवान् आजगाम । (तद्)
४) देवा: हि एव अन्तत: (विजयिन:) अभवन् । (तद्)

### ८. पृथक्करणं कुरुत ।


**(अ) घटनाक्रमानुसारेण वाक्यानि पुनर्लिखत ।**

क) १) देवा: असत्यम् उदसृजन् ।
२) देवासुरा: सत्यानृते दायाद्यरूपेण प्राप्तवन्त: ।
३) देवा: एव विजयिन: अभवन् ।
४) सत्यवादिन: देवा: ऐषावीरतरा: अभवन् ।

ख) १) देवासुरा: सत्यानृते दायाद्यरूपेण प्राप्तवन्त: ।
२) अनृतवादिन: असुरा: आढ्यतरा: अभवन् ।
३) असुरा: पराजिता: अभवन् ।
४) असुरा: सत्यम् उदसृजन् ।

**(आ) जालरेखाचित्रं पूरयत ।**

(१)







Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(२)





**(इ) स्तम्भं पूरयत ।**

| देवाः | असुराः |
|---|---|
| | |
| | |

(सत्यवादिनः, अनृतवादिनः, ऐषावीरतराः, आढ्यतराः)


**(ई) प्रवाहिजालं पूरयत ।**

(१) देवाः-



(विजयिनः, ऐषावीरतराः, सत्यस्वीकृतिः, वाग्रूपं दायाद्यम्)

(२)




(वाग्रूपं दायाद्यम्, आढ्यतराः, पराजिताः, अनृतस्वीकृतिः)

**उपक्रमः –** १) वैदिकवाङ्मयेषु आगतानां कतिपयकथानां सङ्ग्रहणं कुरुत ।
२) उपनिषत्कथासु कस्याश्चित् कथायाः प्रस्तुतीकरणं कुरुत ।

***



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

चतुर्थमण्डलम् ।

# सङ्कलितभाषाभ्यासः -४

१. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।

**क) अवबोधनम् ।**

**१) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

शुकस्य श्लोकपठनेन राजा विस्मितः । यतः .............

प) शुकस्य उच्चारणम् अशुद्धम्, अस्पष्टम् ।

फ) शुकस्य उच्चारणं सुस्पष्टम्, स्वरः च मधुरः ।

**२) कः कं वदति?**

को दोषः, प्रवेश्यताम् ।

**३) पूर्णवाक्येन उत्तरत ।**

राज्ञः शूद्रकस्य राजधानी का?

**४) नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।**

नरपतेः पुरः निधाय पञ्जरम् उदघाटयत् ।

आसीत् राजा शूद्रको नाम । तस्य राज्ञः विदिशाभिधाना नगरी राजधान्यासीत्। एकदा प्रतिहारी राजानमब्रवीत्-देव, द्वारस्थिता काचित् कन्यका अन्येन केनचित् पुरुषेण सह पञ्जरस्थं शुकमादाय देवं विज्ञापयति, ''अहमिच्छामि देवदर्शनसुखमनुभवितुम्।'' एतदाकर्ण्य उपजातकुतूहलस्तु राजा, ''को दोषः, प्रवेश्यताम्'', इत्यादिदेश । तदा प्रतिहारी तां कुमारीं प्रावेशयत्। सा कन्यका राजानं प्रणनाम। स पुरुषस्तं विहङ्गममादाय किञ्चिदुपसृत्य राज्ञे न्यवेदयत्, ''देव, विदितसकलशास्त्रः सकलभूतलरत्नभूतः अयं वैशम्पायनो नाम शुकः। तदयमात्मीयः क्रियताम्।'' एवं नरपतेः पुरो निधाय पञ्जरमुदघाटयत् । उद्घाटिते स विहङ्गराजो राजानमुद्दिश्य राजस्तुतिपरमेकं श्लोकं पपाठ। राजा तं श्रुत्वा सञ्जातविस्मयः प्रधानममात्यं कुमारपालितमब्रवीत्, ''श्रुता भवद्भिरस्य विहङ्गमस्य स्पष्टता वर्णोच्चारणे, स्वरे च मधुरता? महदाश्चर्यम्! प्रायेण पक्षिणः पशवश्च भयाहारनिद्रासंज्ञामात्रवेदिनो भवन्ति। इदन्तु महच्चित्रम्।''

**ख) पृथक्करणम् ।**

**घटनाक्रमानुसारेण वाक्यानि पुनर्लिखत ।**

१) पुरुषेण पञ्जरस्य उद्घाटनम् ।
२) पुरुषद्वारा शुकविशेषतायाः कथनम् ।
३) शुकस्य श्लोकपठनम् ।
४) कन्यकायाः राजगृहं प्रति आगमनम् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२. **अन्वयपूर्तिं कुरुत ।**

कपोतश्च भयाद् गत्वा शिबेरङ्कमशिश्रियत् ।
मनुष्यवाचा श्येनोऽथ स तं राजानमब्रवीत् ।।

कपोतश्च ............... गत्वा ............ अङ्कम् अशिश्रियत् । अथ सः ............ मनुष्यवाचा तं ............ अब्रवीत् ।

३. **माध्यमभाषया सरलार्थं लिखत ।**

तथा च पूर्वं राजाभूत् तपस्वी करुणापरः ।
दाता धीरः शिबिर्नाम सर्वसत्त्वाभयप्रदः ।।१।।
तं वञ्चयितुमिन्द्रोऽथ कृत्वा श्येनवपुः स्वयम् ।
मायाकपोतवपुषं धर्ममन्वपतद् द्रुतम् ।।२।।

अथवा

श्येनो जगाद यद्येवमात्ममांसं प्रयच्छ मे ।
तथेति तत् प्रहृष्टः सन् स राजा प्रत्यपद्यत ।।

यथा यथा च मांसं स्वमुत्कृत्यारोपयन्नृपः ।
तथा तथा तुलायां स कपोतोऽभ्यधिकोऽभवत् ।।

४. **ससंदर्भं स्पष्टीकुरुत ।**

१) ते ह सदृशं वदन्तः, सदृशाः एव आसुः ।

२) ततः अपगतः दिव्यप्रभावः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




# लेखनकौशलम् ।

## १. चित्रपटवर्णनम्।

अद्यतनीये आधुनिके युगे 'चित्रपट:' जनानां मनोरञ्जनस्य उत्तमं साधनं मन्यते । 'नाट्यशास्त्रम्' इति स्वग्रन्थे भरतमुनिना वर्णिता: रसा: भावा: च अधुना चित्रपटमाध्यमेन अपि अस्मान् आनन्दयन्ति । शृङ्गार:, हास्य:, रौद्र:, करुण:, वीर:, अद्भुत:, बीभत्स:, भयानक:, शान्त: च इति नव रसान् आधृत्य नैके चित्रपटप्रकारा: नैकासु भाषासु निर्मिता: भवन्ति । तेषु केचित् अस्माभि: वर्णनीया: ।

**मार्गदर्शक: शब्दकोष: ।**


चित्रग्राही (Camera इति आङ्ग्लभाषायाम्)/नट:/अभिनेता, नायक:/नायिका, नटी/अभिनेत्री, खलनायक:/खलनायिका, लेखक: , संवादा: , गीतानि, मनोरञ्जनम्, कथा, प्रारम्भ:, अन्त:, पराकोटि: (स्त्री)/उत्कर्षबिन्दु: (Climax इति आङ्ग्लभाषायाम्)/पार्श्वसङ्गीतम् ।







Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




### रहस्यपट: ।

प्रियरहस्यपटस्य नाम ‘कहानी’ इति । एतस्मिन् चित्रपटे विद्या-बालनमहोदया प्रमुखा नायिका वर्तते । नायिकाप्रधान: एव एष: चित्रपट: । गर्भवती नायिका स्वपते: अन्वेषणार्थं कोलकतानगरम् आगच्छति । सा नैकेषां सङ्कटानां प्रतिकारं करोति । प्रेक्षकाणां मनसि तस्या: कृते करुणा जायते । किन्तु अन्ते रहस्यभेद: भवति यत् सा तु नैव गर्भवती । सा जानाति यत् तस्या: पति: मृत: । तस्य घातकस्य अन्वेषणार्थम् एव सा छद्मवेषं धृत्वा अटति । सा दुर्गापूजासमये मार्गे स्वपते: घातकस्य वधं करोति । प्राय: सर्वेभ्य:/सर्वाभ्य: एतस्मिन् चित्रपटे विद्यामहोदयाया: अभिनय: अतीव रोचते ।





### भयपट: ।

गतसप्ताहे एक: भयपट: दृष्ट: । तस्य नाम ‘स्त्री’ इति । एतस्मिन् चित्रपटे श्रद्धा कपूरमहोदया प्रमुखा नायिका। राजकुमार रावमहोदय: प्रमुख: अभिनेता च । एकस्मिन् ग्रामे ‘स्त्री’ इति एका निशाटा पूजासमये रात्रौ आगत्य पुरुषाणाम् अपहरणं करोति । एतस्मिन् समये पार्श्वे भयकारिध्वनि: जायते । तस्या: निवारणार्थं जना: द्वारे ‘ओ स्त्री कल आना’ इति वाक्यं लिखन्ति । अन्ते या चित्रपटस्य नायिका सा एव खलनायिका नाम ‘स्त्री’ इति दिग्दर्शक: सूचयति । चित्रपटस्य संवादा: अधिकं गूढं निर्मान्ति । गीतानि अपि रम्याणि गेयानि च सन्ति । प्राय: सर्वेभ्य:/सर्वाभ्य: एष: चित्रपट: रोचते यत: तस्य अन्तपर्यन्तं गूढ: अनाकलनीय: वर्तते ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




## देशभक्तिपट: ।

'उरी-द सर्जिकल स्ट्राईक' इति देशभक्तिपट: दृष्ट: । विकी-कौशलमहोदय: एतस्मिन् चित्रपटे सेनानायकस्य भूमिकां नाटयति । यामी-गौतममहोदया नायिका च । एष: चित्रपट: सत्यघटनाधारित: । प्रारम्भे भारतीयसेनाया: 'पठाणकोट:' इति सेनानिवेशे शत्रुसैनिकानाम् आक्रमणं भवति । तस्मिन् नैके भारतीयसैनिका: वीरगतिं प्राप्नुवन्ति । तस्य आक्रमणस्य प्रतिक्रियारूपेण भारतीयसैनिका: एकां योजनां रचयन्ति । योजनाया: अनुसारं मध्यरात्रौ भारतीयचमू: शत्रुनिवेशं प्रविश्य तेषां शिबिरम् उद्ध्वस्तं करोति । अस्माकं भारतस्य कोऽपि योद्धा क्षतिग्रस्त: न भवति । अन्ते अस्माकं भारतस्य एव जय: भवति । एष: चित्रपट: सामान्यजनानां मनसि सेनाया: कृते आदरं जनयति । सर्वेभ्य:/सर्वाभ्य: देशभक्ते: प्रेरणां यच्छति च ।

### मार्गदर्शक-प्रश्ना: ।

१) चित्रपटस्य नाम किम्?

२) क: नायक:/का नायिका/क: खलनायक:/का खलनायिका?

३) चित्रपटस्य प्रारम्भे किं भवति?

४) का कथा?

५) अन्ते क: उत्कर्षबिन्दु:?

६) संवादा: कीदृशा:?

७) अपि गीतानि गेयानि?

८) कानि वैशिष्ट्यानि?


९) किमर्थम् एष: चित्रपट: तुभ्यं रोचते?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## २. वृत्तान्तलेखनम्




कार्यक्रमपत्रिका (वृक्षारोपणकार्यक्रमः)

**निमन्त्रणम्**

**वृक्षो रक्षति रक्षितः ।**

**विश्वपर्यावरणदिननिमित्तेन**

**वनविभागः, महाराष्ट्रशासनम् तथा च निसर्गमित्रमण्डलं, जलग्रामः आयोजयति ।**

**आयुर्वेदिकवृक्षारोपणकार्यक्रमः ।**

**मुख्यातिथिः –** डॉ. महेशः प्रभाकरन् । (मा. वनायुक्तः) **उद्घाटकः –** प्रा. एन. रामचन्द्रः (उद्यानविद्यावेत्ता)

**स्थलम् –** बोराखेडी ग्रामं, जलग्रामः जनपदः । **समयः –** प्रातः १०.०० वादने । दि. ५.६.२०१९

सर्वेषां सहर्षं स्वागतम् ।

**संयोजकाः**

| | | |
|---|---|---|
| **सौ. तृप्ती सागर** | **श्री. जाधव विजय** | **श्री. राजहंस** |
| ९३××××××७५ | ९४××××××१० | ९४××××××२७ |

**मार्गदर्शक–प्रश्नाः ।**

१) कः कार्यक्रमः ?
२) किं निमित्तम् ?
३) कदा/कस्मिन् दिनाङ्के ?
४) कुत्र सम्पन्नः ?
५) प्रमुखातिथिः कः ?
६) कः आयोजकः ?
७) कार्यक्रमस्य समयः कः ?
८) संयोजकाः के ?
९) कार्यक्रमस्य संक्षेपेण वर्णनम् ।

वृत्तान्तलेखनम् ।

वृक्षो रक्षति रक्षितः ।

विश्वपर्यावरणदिननिमित्तेन 'महाराष्ट्रशासनस्य वनविभागः' तथा 'निसर्गमित्रमण्डलं, जलग्रामः एताभ्यां सम्मिल्य 'बोराखेडीग्रामे 'आयुर्वेदिकवृक्षारोपणकार्यक्रमः' आयोजितः । जूनमासस्य पञ्चमे दिनाङ्के प्रातः दशवादने एषः कार्यक्रमः सम्पन्नः । मा. वनायुक्तः 'मा. डॉ. महेशः प्रभाकरन्' महोदयः मुख्यातिथिरूपेण तत्र उपस्थितः। उद्यानविद्यावेत्ता 'मा. प्रा. एन्. रामचन्द्रः' अस्य कार्यक्रमस्य उद्घाटनं कृतवान् ।

वृक्षारोपणं तु सर्वदा सर्वत्र एव भवति । परम् अयं विशिष्टः कार्यक्रमः यतोऽहि अत्र दुर्लभाणाम् आयुर्वेदिकवृक्षाणां रोपणं कृतं जनैः ।

सौ. तृप्ती सागरमहोदया, श्री. जाधव विजयमहोदयः तथा श्री. राजहंसमहोदयः एभिः एषः कार्यक्रमः सफलतां नीतः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



# सङ्कलितभाषाभ्यासः -५

१. **मार्गदर्शकप्रश्नाधारेण दृष्टपूर्वस्य कस्यचन 'रहस्यपटस्य' अथवा 'भयपटस्य' वर्णनं कुरुत ।**

१) चित्रपटस्य नाम किम्?
२) कः नायकः/का नायिका/ कः खलनायकः/का खलनायिका?
३) चित्रपटस्य प्रारम्भे किं भवति?
४) का कथा?
५) अन्ते कः उत्कर्षबिन्दुः?
६) संवादाः कीदृशाः?
७) अपि गीतानि गेयानि?
८) कानि वैशिष्ट्यानि?
९) किमर्थम् एषः चित्रपटः तुभ्यं रोचते?

२. **निमन्त्रणपत्रिकां दृष्ट्वा मार्गदर्शकप्रश्नाधारेण कार्यक्रमस्य वृत्तान्तं लिखत ।**

*निमन्त्रणम्*

'निर्मलं च विशुद्धं च मानसं देवमन्दिरम् ।

स्वच्छता-अभियानं, महाराष्ट्रशासनं तथा च

महात्मागान्धि-महाविद्यालयः, सेवाग्रामः आयोजयति ।

एकदिवसीयं-ग्रामस्वच्छताअभियानम् ।

**मुख्यातिथिः** – श्रीमती वनमाला सी. जी. (ग्रामविकास-सचिवः)

**उद्घाटकः** – डॉ. नरसिंहः परदेसी (प्रख्यात-समाजसेवकः)

**स्थलम्** – पवनारग्रामः, वर्धाजनपदः ।

**समयः** – प्रातः ८ वादनतः सायं ६ वादनपर्यन्तम् ।

सर्वेषां सहर्ष स्वागतम् ।

✻ संयोजकाः ✻

| सौ. जया शुद्धे | श्रीमती शुभ्रा गोरे | श्री. पावन तीर्थस्थळे |
|---|---|---|
| ९४××××××६० | ९१××××××४२ | ७७××××××२१ |

**मार्गदर्शक-प्रश्नाः ।**

१) कः कार्यक्रमः ?
२) किं निमित्तम् ?
३) कदा/कस्मिन् दिनाङ्के ?
४) कुत्र सम्पन्नः ?
५) प्रमुखातिथिः कः ?
६) कः आयोजकः ?
७) कार्यक्रमस्य समयः कः ?
८) संयोजकाः के ?
९) कार्यक्रमस्य संक्षेपेण वर्णनम् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## अपठितगद्यांशः ।

अपठितं नाम यस्य अन्तर्भावः पाठ्यपुस्तके नास्ति । अपठितगद्यस्य पठनं छात्रैः करणीयम् । तस्य आकलनं कृत्वा कृतयः कर्तव्याः ।

१) प्रथमं परिच्छेदः पठनीयः ।

२) पदविच्छेदं कृत्वा अर्थः बोधनीयः ।

३) निर्दिष्टानुसारं कृतयः कर्तव्याः ।

उदाहरणम् –

एकस्य काकस्य मुखे रोटिका आसीत् । सः वृक्षस्य उपरि शाखायाम् अतिष्ठत् । ततः एकः लोमशः तत्र आगच्छत् । लोमशः काकस्य मुखे रोटिकां दृष्ट्वा अचिन्तयत्, यदि एषः स्वमुखं विवृतं करिष्यति तर्हि सा रोटिका अधः पतिष्यति । अहं च तां खादिष्यामि । सः काकं वदति, "त्वं तु अतीव सुन्दरोऽसि । तव स्वरः अपि मधुरः स्यात् । एकं गीतं गातुं शक्नोषि किल?"

स्वप्रशंसां श्रुत्वा काकः आनन्दितः । यदा सः गीतं गायति तदा तस्य मुखात् रोटिका अधः पतति । लोमशः रोटिकां खादित्वा शीघ्रं ततः पलायनं करोति ।

**कृतीः कुरुत ।**

अ) पूर्णवाक्येन उत्तरत ।

काकः कुत्र उपाविशत्?

आ) अधोरखितशब्दस्य कृते प्रश्ननिर्माणं कुरुत ।

<u>लोमशः</u> काकस्य मुखे रोटिकां दृष्ट्वा अचिन्तयत् ।

इ) लकारं लिखत ।

अतिष्ठत् ।

ई) प्रातिपदिकं लिखत ।

रोटिका, अहम्

उ) अनुवादं कुरुत ।

स्वप्रशंसां श्रुत्वा काकः आनन्दितः ।

ऊ) एकम् अव्ययं चित्वा लिखत ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# नाम

✻ नामतालिकां पूरयत ।

| नाम | प्रातिपदिकम् | अन्तम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| भाषासु | | | | | |
| चेतांसि | | | | | |
| युवकानाम् | | | | | |
| वणिजौ | | | | | |
| याचनया | | | | | |
| पद्धत्या | | | | | |
| भार्या | | | | | |
| स्वामिन् | | | | | |
| रोमाणि | | | | | |
| स्रोतांसि | | | | | |
| जिह्वाम् | | | | | |
| व्याधिः | | | | | |
| भावी | | | | | |
| पुरि | | | | | |
| द्वारवत्याम् | | | | | |
| राज्ञः | | | | | |
| भगवान् | | | | | |
| राजानम् | | | | | |
| पक्षिणः | | | | | |
| सरसः | | | | | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| नाम | प्रातिपदिकम् | अन्तम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| पितुः | | | | | |
| वाक् | | | | | |
| असुरेषु | | | | | |
| मितव्ययी | | | | | |
| वक्ता | | | | | |
| वैराणि | | | | | |
| मूर्खस्य | | | | | |
| पेषण्याम् | | | | | |
| स्थाल्याम् | | | | | |
| वटिकासु | | | | | |
| पयसा | | | | | |
| नाम्ना | | | | | |
| दाता | | | | | |
| तपस्वी | | | | | |
| धर्मः | | | | | |
| कर्माणि | | | | | |
| ज्ञानिनः | | | | | |
| इन्द्रियाणि | | | | | |
| तन्वि | | | | | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# सर्वनाम

✻ सर्वनामतालिकां पूरयत ।

| सर्वनाम | प्रातिपदिकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| तासु | | | | |
| एतासु | | | | |
| अस्माकम् | | | | |
| अहम् | | | | |
| अनेन | | | | |
| कया | | | | |
| अस्मिन् | | | | |
| त्वया | | | | |
| माम् | | | | |
| मह्यम् | | | | |
| भवान् | | | | |
| सः | | | | |
| ते | | | | |
| ताम् | | | | |
| तस्याः | | | | |
| याः | | | | |
| अस्मै | | | | |
| तेभ्यः | | | | |
| अन्येन | | | | |
| तस्याम् | | | | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| सर्वनाम | प्रातिपदिकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| तस्मात् | | | | |
| तद् | | | | |
| सर्वम् | | | | |
| तस्मात् | | | | |
| कः | | | | |
| एषः | | | | |
| सर्वेषु | | | | |
| तान् | | | | |
| अयम् | | | | |
| माम् | | | | |
| तव | | | | |
| एतद् | | | | |
| मा | | | | |
| यः | | | | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# क्रियापदरूपाणि

## धातुतालिका

### प्रथमः गणः

| धातुः | लट् | लङ् | लृट् | लोट् | लिङ् | कर्मणि लट् | लिट् |
|---|---|---|---|---|---|---|---|
| गै-गाय् (प.प.) | गायति | अगायत् | गास्यति | गायतु, गायतात् | गायेत् | गीयते | जगौ |
| अनु + भू (प.प.) | अनुभवति | अन्वभवत् | अनुभविष्यति | अनुभवतु | अनुभवेत् | अनुभूयते | अनुबभूव |
| त्यज् (प.प.) | त्यजति | अत्यजत् | त्यक्ष्यति | त्यजतु | त्यजेत् | त्यज्यते | तत्याज |
| रक्ष् (प.प.) | रक्षति | अरक्षत् | रक्षिष्यति | रक्षतु | रक्षेत् | रक्ष्यते | ररक्ष |
| भज् (उ.प.) | भजति | अभजत् | भक्ष्यति | भजतु | भजेत् | भज्यते | बभाज |
| | भजते | अभजत | भक्ष्यते | भजताम् | भजेत | | भेजे |
| परि + ईक्ष् (आ.प.) | परीक्षते | पर्यैक्षत | परीक्षिष्यते | परीक्षताम् | परीक्षेत | परीक्ष्यते | परीक्षाञ्चक्रे |
| रुच् (आ.प.) | रोचते | अरोचत | रोचिष्यते | रोचताम् | रोचेत | रुच्यते | रुरुचे |
| आ + रभ् (आ.प.) | आरभते | आरभत | आरप्स्यते | आरभताम् | आरभेत | आरभ्यते | आरेभे |
| अभि + नी (आ.प.) | अभिनयते | अभ्यनयत | अभिनेष्यते | अभिनयताम् | अभिनयेत | अभिनीयते | अभिनिन्ये |

### द्वितीयः गणः

| धातुः | लट् | लङ् | लृट् | लोट् | लिङ् | कर्मणि लट् | लिट् |
|---|---|---|---|---|---|---|---|
| रुद् (प.प.) | रोदिति | अरोदीत्, अरोदत् | रोदिष्यति | रोदितु | रुद्यात् | रुद्यते | रुरोद |
| हन् (प.प.) | हन्ति | अहन् | हनिष्यति | हन्तु | हन्यात् | हन्यते | जघान |
| स्वप् (प.प.) | स्वपिति | अस्वपीत्, अस्वपत् | स्वप्स्यति | स्वपितु | स्वप्यात् | सुप्यते | सुष्वाप |
| अस् (प.प) | अस्ति | आसीत् | भविष्यति | अस्तु | स्यात् | भूयते | बभूव |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ब्रू (प.प.) | ब्रवीति, आह | अब्रवीत् | वक्ष्यति | ब्रवीतु | ब्रूयात् | उच्यते | उवाच |
| (आ.प.) | ब्रूते | अब्रूत | वक्ष्यते | ब्रूताम् | ब्रुवीत | | ऊचे |
| या (प.प.) | याति | अयात् | यास्यति | यातु | यायात् | यायते | ययौ |

## तृतीयः गणः

| धातुः | लट् | लङ् | लृट् | लोट् | लिङ् | कर्मणि लट् | लिट् |
|---|---|---|---|---|---|---|---|
| दा (प.प.) | ददाति | अददात् | दास्यति | ददातु | दद्यात् | दीयते | ददौ |
| (आ.प.) | दत्ते | अदत्त | दास्यते | दत्ताम् | ददीत | | ददे |
| भी (प.प.) | बिभेति | अबिभेत् | भेष्यति | बिभेतु | बिभियात्, बिभीयात् | भीयते | बिभाय/ बिभयाञ्चकार |

## चतुर्थः गणः

| धातुः | लट् | लङ् | लृट् | लोट् | लिङ् | कर्मणि लट् | लिट् |
|---|---|---|---|---|---|---|---|
| नृत् (प.प.) | नृत्यति | अनृत्यत् | नर्तिष्यति | नृत्यतु | नृत्येत् | नृत्यते | ननर्त |
| युध् (आ.प.) | युध्यते | अयुध्यत | योत्स्यते | युध्यताम् | युध्येत | युध्यते | युयुधे |
| सम्+पद् (आ.प.) | सम्पद्यते | समपद्यत | सम्पत्स्यते | सम्पद्यताम् | सम्पद्येत | सम्पद्यते | सम्पेदे |

## पञ्चमः गणः

| धातुः | लट् | लङ् | लृट् | लोट् | लिङ् | कर्मणि लट् | लिट् |
|---|---|---|---|---|---|---|---|
| श्रु (प.प) | शृणोति | अशृणोत् | श्रोष्यति | शृणोतु | शृणुयात् | श्रूयते | शुश्राव |

## षष्ठः गणः

| धातुः | लट् | लङ् | लृट् | लोट् | लिङ् | कर्मणि लट् | लिट् |
|---|---|---|---|---|---|---|---|
| लिख् (प.प.) | लिखति | अलिखत् | लेखिष्यति | लिखतु | लिखेत् | लिख्यते | लिलेख |
| दिश् (प.प.) | दिशति | अदिशत् | देक्ष्यति | दिशतु | दिशेत् | दिश्यते | दिदेश |
| (आ.प.) | दिशते | अदिशत | देक्ष्यते | दिशताम् | दिशेत | | दिदिशे |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## सप्तमः गणः

| धातुः | लट् | लङ् | लृट् | लोट् | लिङ् | कर्मणि लट् | लिट् |
|---|---|---|---|---|---|---|---|
| युज् (प.प.) | युनक्ति, | अयुनक् अयुनग् | योक्ष्यति | युनक्तु | युञ्ज्यात् | युज्यते | युयोज |
| युज्(आ.प.) | युङ्क्ते | अयुङ्क्त | योक्ष्यते | युङ्क्ताम् | युञ्जीत | | युयुजे |

## अष्टमः गणः

| धातुः | लट् | लङ् | लृट् | लोट् | लिङ् | कर्मणि लट् | लिट् |
|---|---|---|---|---|---|---|---|
| कृ (प.प.) | करोति | अकरोत् | करिष्यति | करोतु | कुर्यात् | क्रियते | चकार |
| (आ.प.) | कुरुते | अकुरुत | करिष्यते | कुरुताम् | कुर्वीत | | चक्रे |

## नवमः गणः

| धातुः | लट् | लङ् | लृट् | लोट् | लिङ् | कर्मणि लट् | लिट् |
|---|---|---|---|---|---|---|---|
| प्री (प.प.) | प्रीणाति | अप्रीणात् | प्रेष्यति | प्रीणातु | प्रीणीयात् | प्रीयते | पिप्राय |
| (आ.प.) | प्रीणीते | अप्रीणीत | प्रेष्यते | प्रीणीताम् | प्रीणीत | | पिप्रये |
| ग्रह् (प.प.) | गृह्णाति | अगृह्णात् | ग्रहीष्यति | गृह्णातु | गृह्णीयात् | गृह्यते | जग्राह |
| (आ.प.) | गृह्णीते | अगृह्णीत | ग्रहीष्यते | गृह्णीताम् | गृह्णीत | | जगृहे |

## दशमः गणः

| धातुः | लट् | लङ् | लृट् | लोट् | लिङ् | कर्मणि लट् | लिट् |
|---|---|---|---|---|---|---|---|
| पीड् (प.प.) | पीडयति | अपीडयत् | पीडयिष्यति | पीडयतु | पीडयेत् | पीड्यते | पीडयामास |
| (आ.प.) | पीडयते | अपीडयत | पीडयिष्यते | पीडयताम् | पीडयेत | | पीडयाञ्चक्रे |
| वर्ण् (प.प.) | वर्णयति | अवर्णयत् | वर्णयिष्यति | वर्णयतु | वर्णयेत् | वर्ण्यते | वर्णयामास |
| आ.प.) | वर्णयते | अवर्णयत | वर्णयिष्यते | वर्णयताम् | वर्णयेत | | वर्णयाञ्चक्रे |
| सूच् (प.प.) | सूचयति | असूचयत् | सूचयिष्यति | सूचयतु | सूचयेत् | सूच्यते | सूचयामास |
| (आ.प.) | सूचयते | असूचयत | सूचयिष्यते | सूचयताम् | सूचयेत | | सूचयाञ्चक्रे |
| कथ् (प.प.) | कथयति | अकथयत् | कथयिष्यति | कथयतु | कथयेत् | कथ्यते | कथयामास |
| (आ.प.) | कथयते | अकथयत | कथयिष्यते | कथयताम् | कथयेत | | कथयाञ्चक्रे |
| वञ्च् (प.प.) | वञ्चयति | अवञ्चयत् | वञ्चयिष्यति | वञ्चयतु | वञ्चयेत् | वञ्च्यते | वञ्चयामास |
| (आ.प.) | वञ्चयते | अवञ्चयत | वञ्चयिष्यते | वञ्चयताम् | वञ्चयेत | | वञ्चयाञ्चक्रे |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# समासः

✻ समासतालिकां पूरयत ।

| सामासिकशब्दः | समासविग्रहः | समासनाम |
|---|---|---|
| सवेगम् | | |
| प्रतिसप्ताहम् | | |
| अचिरात् | | |
| प्राप्तख्यातिः | | |
| सविनयम् | | |
| प्रतिविभागम् | | |
| दत्तचित्तः | | |
| ज्ञातुकामः | | |
| भिन्नरुचिः | | |
| अपर्याप्तम् | | |
| भयाकुलचित्तम् | | |
| प्रत्युत्पन्नमतिः | | |
| पितृगृहम् | | |
| शीतस्पर्शः | | |
| अरोचिष्णुः | | |
| जिह्वाग्रम् | | |
| शोणितसङ्घातः | | |
| देहसादः | | |
| अपगतदिव्यप्रभावा | | |
| भेरीताडनम् | | |
| चिन्ताशोकसागरः | | |
| विदिशाभिधानम् | | |
| अपगतासून् | | |
| महातपाः | | |
| अक्षमः | | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| सामासिकशब्दः | समासविग्रहः | समासनाम |
|---|---|---|
| कोटरोदरेषु | | |
| क्षितितलम् | | |
| विजितेन्द्रियः | | |
| अव्यवस्थितचित्तस्य | | |
| षट्पदम् | | |
| अवैरेण | | |
| अव्यवस्थितम् | | |
| यथार्हम् | | |
| लघुरूपः | | |
| एलाचूर्णम् | | |
| हिङ्गुधूपेन | | |
| श्येनवपुः | | |
| अक्षतदेहम् | | |
| अत्याज्यः | | |
| अक्षमः | | |
| मनुष्यवाचा | | |
| कर्मफलहेतुः | | |
| विमूढात्मा | | |
| मिथ्याचारः | | |
| अकर्मणि | | |
| असक्तः | | |
| कर्मफलम् | | |
| अक्षिभ्रुवम् | | |
| कण्ठकपोलम् | | |
| सपित्तः | | |
| सरक्तः | | |
| द्वादशयोजनम् | | |
| अन्यान्यदेशान्तरायातः | | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| सामासिकशब्दः | समासविग्रहः | समासनाम |
|---|---|---|
| सर्वसत्त्वाभयप्रदः | | |
| शरणागतः | | |
| दुर्गापुरनगरे | | |
| दृढविश्वासः | | |
| कार्यमग्नः | | |
| पुत्रद्वयोपेता | | |
| गहनकानने | | |
| जम्बुककृतोत्साहम् | | |
| भयाकुलम् | | |
| जम्बुककृतः | | |
| व्याघ्रमारी | | |
| षट्पदपिपीलिकाः | | |
| अन्यान्यरोगिजनेभ्यः | | |
| अपगतदिव्यप्रभावा | | |
| भेरीताडननियुक्ताय | | |
| चिन्ताशोकसागरनिमग्नः | | |
| जनानुकम्पा | | |
| प्रवचनावगतौ | | |
| द्वादशयोजव्यापी | | |
| अन्यान्यौ | | |
| चिन्ताशोकौ | | |
| सूत्रार्थौ | | |
| शाल्मलीवृक्षः | | |
| द्वारस्थिता | | |
| क्षितितलविप्रकीर्णाः | | |
| पञ्जरस्थम् | | |
| मध्यस्थः | | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| सामासिकशब्दः | समासविग्रहः | समासनाम |
|---|---|---|
| सत्यवक्ता | | |
| मितव्ययी | | |
| हितभुक् | | |
| देवासुराः | | |
| सत्यानृते | | |
| मितभुक् | | |
| प्रियवादिनम् | | |
| मृगपक्षिणाम् | | |
| घृताक्ता | | |
| शर्करायुक्तम् | | |
| एलाचूर्णविमिश्रितम् | | |
| शर्करैलासमायुक्ताः | | |
| पाकज्ञः | | |
| हिङ्गुसर्पिर्भ्याम् | | |
| शर्करैलाः | | |
| जीरकार्द्रकसैन्धवैः | | |
| सर्वसत्त्वानि | | |
| अभयप्रदः | | |
| इन्द्रधर्मौ | | |
| श्येनकपोतयोः | | |
| योगस्थः | | |
| सिद्ध्यसिद्ध्योः | | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# तद्धितान्ताः ।

✻ नाम्नः वा विशेषणस्य अग्रे प्रत्ययं योजयित्वा अपि शब्दा भवन्ति । वयम् एतादृशानां शब्दानां लीलया उपयोगं कुर्मः । ते नाम तद्धिताः । मूलशब्दस्य अग्रे प्रत्ययं योजयित्वा तत्सम्बन्धदर्शकः शब्दः प्राप्यते । तेषां वृत्तिसहितानि उदाहरणानि अत्र संक्षेपेण दीयन्ते ।

१) **आधुनिकः** = अधुना भवः ।
२) **महत्त्वम्** = महतः भावः ।
३) **दैनिकम्** = दिने भवम् ।
४) **पाक्षिकम्** = पक्षे भवम् ।
५) **साप्ताहिकम्** = सप्ताहे भवम् ।
६) **वार्षिकम्** = वर्षे भवम् ।
७) **कौशलम्** = कुशलस्य भावः ।
८) **शैघ्र्यम्** = शीघ्रस्य भावः ।
९) **शिथिलत्वम्** = शिथिलस्य भावः ।
१०) **नियमात्** = नियमतः ।
११) **माहात्म्यम्** = महात्मनः भावः ।
१२) **वाणिज्यम्** = वणिजः भावः ।
१३) **सौरभः** = सुरभेः अयम् ।
१४) **आधिक्यम्** = अधिकस्य भावः ।
१५) **उत्कृष्टता** = उत्कृष्टस्य भावः ।
१६) **योग्यता** = योग्यस्य भावः ।
१७) **भिन्नत्वम्** = भिन्नस्य भावः ।
१८) **शीलता** = शीलस्य भावः ।
१९) **बुद्धिमती** = बुद्धिः अस्याः अस्ति ।
२०) **दिव्या** = दिवि भवा ।
२१) **मधुरता** = मधुरस्य भावः ।
२२) **पक्षिणः** = पक्षौ स्तः एषाम् ।
२३) **विटपिनः** = विटपम् एषाम् अस्ति ।
२४) **भगवान्** = भगः अस्य अस्ति ।
२५) **प्राजापत्यः** = प्रजापतेः अपत्यं पुमान् ।
२६) **समत्वम्** = समस्य भावः ।
२७) **देही** = देहः अस्य अस्ति ।
२८) **सर्वशः** = सर्वः अस्ति अस्य ।

✻ तद्धिततालिकां पूरयत ।

| तद्धितः | वृत्तिः |
|---|---|
| आधिक्यम् | ................ |
| ................ | सुरभेः अयम् |
| माहात्म्यम् | ................ |
| ................ | शिथिलस्य भावः |
| वार्षिकम् | ................ |
| ................ | कुशलस्य भावः |
| साप्ताहिकम् | ................ |
| ................ | पक्षे भवम् |
| नियमात् | ................ |
| ................ | वणिजः भावः |
| महत्त्वम् | ................ |
| ................ | बुद्धिः अस्याः अस्ति |

| तद्धितः | वृत्तिः |
|---|---|
| उत्कृष्टता | ................ |
| ................ | सर्वः अस्ति अस्य |
| योग्यता | ................ |
| ................ | देहः अस्य अस्ति |
| वार्षिकम् | ................ |
| ................ | कुशलस्य भावः |
| समत्वम् | ................ |
| ................ | भिन्नस्य भावः |
| शीलता | ................ |
| ................ | पक्षौ स्तः एषाम् |
| भगवान् | ................ |
| ................ | मधुरस्य भावः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# कृदन्ताः (पुं. प्रथमाएकवचनम्)

| धातुः | क्त | क्तवतु | कृत्याः | | | शतृ/शानच् |
|---|---|---|---|---|---|---|
| गम्-गच्छ् (१ प.प.) | गतः | गतवान् | गम्यः | गन्तव्यः | गमनीयः | गच्छन् |
| रम् (१ आ.प.) | रतः | रतवान् | रम्यः | रन्तव्यः | रमणीयः | रममाणः |
| मन् (४ आ.प.) | मतः | मतवान् | मान्यः | मन्तव्यः | मननीयः | मन्यमानः |
| दा-यच्छ् (१ प.प.) | दत्तः | दत्तवान् | देयः | दातव्यः | दानीयः | यच्छन् |
| पा-पिब् (१ प.प.) | पीतः | पीतवान् | पेयः | पातव्यः | पानीयः | पिबन् |
| ज्ञा (९ उ.प.) | ज्ञातः | ज्ञातवान् | ज्ञेयः | ज्ञातव्यः | ज्ञानीयः | जानन्/जानानः |
| नी-नय् (१ उ.प.) | नीतः | नीतवान् | नेयः | नेतव्यः | नयनीयः | नयन्/नयमानः |
| कृ (८ उ.प.) | कृतः | कृतवान् | कार्यः कृत्यः | कर्तव्यः | करणीयः | कुर्वन्/कुर्वाणः |
| सृ (१ प.प.) | सृतः | सृतवान् | सार्यः | सर्तव्यः | सरणीयः | सरन् |
| पठ् (१ प.प.) | पठितः | पठितवान् | पाठ्यः | पठितव्यः | पठनीयः | पठन् |
| पत् (१ प.प.) | पतितः | पतितवान् | पात्यः | पतितव्यः | पतनीयः | पतन् |
| खाद् (१ प.प.) | खादितः | खादितवान् | खाद्यः | खादितव्यः | खादनीयः | खादन् |
| वद् (१ प.प.) | उदितः | उदितवान् | वाद्यः | वदितव्यः | वदनीयः | वदन् |
| नृत् (४ प.प.) | नर्तितः | नर्तितवान् | नृत्यः | नर्तितव्यः | नर्तनीयः | नृत्यन् |
| लिख् (६ प.प.) | लिखितः | लिखितवान् | लेख्यः | लेखितव्यः | लेखनीयः | लिखन् |
| सेव् (१ आ.प.) | सेवितः | सेवितवान् | सेव्यः | सेवितव्यः | सेवनीयः | सेवमानः |
| वन्द् (१ आ.प.) | वन्दितः | वन्दितवान् | वन्द्यः | वन्दितव्यः | वन्दनीयः | वन्दमानः |
| प्र+अर्थ् (१०आ.प.) | प्रार्थितः | प्रार्थितवान् | प्रार्थ्यः | प्रार्थयितव्यः | प्रार्थनीयः | प्रार्थयमानः |
| पूज् (१० उ.प.) | पूजितः | पूजितवान् | पूज्यः | पूजयितव्यः | पूजनीयः | पूजयन्/पूजयमानः |
| कथ् (१० उ.प.) | कथितः | कथितवान् | कथ्यः | कथयितव्यः | कथनीयः | कथयन्/कथयमानः |
| दृश्-पश्य् (१ प.प.) | दृष्टः | दृष्टवान् | दृश्यः | द्रष्टव्यः | दर्शनीयः | पश्यन् |
| प्रच्छ्-पृच्छ् (६ प.प.) | पृष्टः | पृष्टवान् | प्रच्छ्यः | प्रष्टव्यः | प्रच्छनीयः | पृच्छन् |
| प्र+विश् (६ प.प.) | प्रविष्टः | प्रविष्टवान् | प्रवेश्यः | प्रवेष्टव्यः | प्रवेशनीयः | प्रविशन् |
| आ+दिश् (६ उ.प.) | आदिष्टः | आदिष्टवान् | आदेश्यः | आदेष्टव्यः | आदेशनीयः | आदिशन्/आदिशमानः |
| मुच्-मुञ्च् (६ उ.प.) | मुक्तः | मुक्तवान् | मोच्यः | मोक्तव्यः | मोचनीयः | मुञ्चन्/मुञ्चमानः |
| वच् (२ प.प.) | उक्तः | उक्तवान् | वाच्यः | वक्तव्यः | वचनीयः | वचन् |
| आ+रभ् (१ आ.प.) | आरब्धः | आरब्धवान् | आरभ्यः | आरब्धव्यः | आरभणीयः | आरभमाणः |
| लभ् (१ आ.प.) | लब्धः | लब्धवान् | लभ्यः | लब्धव्यः | लभनीयः | लभमानः |
| वह् (१ उ.प.) | ऊढः | ऊढवान् | वाह्यः | वोढव्यः | वहनीयः | वहन्/वहमानः |
| आ+रुह्-रोह्(१ प.प.) | आरूढः | आरूढवान् | आरोह्यः | आरोढव्यः | आरोहणीयः | आरोहन् |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**कृदन्तरूपाणि उपस्तम्भे लिखत ।**

१)

| क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|
| | | | |
| | | | |

(दातव्यः, गतः, मान्यः, पानीयः, दृष्टवान् , पिबन् , ज्ञातः, कथितवान्)

२)

| क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|
| | | | |
| | | | |

(पूजयमानः, उदितः, लेख्यः, सेवितव्यः, प्रार्थयमानः, वन्दनीयः, पूजयन् , नर्तितवान्)

३)

| क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|
| | | | |
| | | | |

(प्रविष्टवान् , कथनीयः, द्रष्टव्यः, मुञ्चमानः, प्रच्छ्यः, उक्तवान् , मुञ्चन् , आदिष्टः)

४)

| क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|
| | | | |
| | | | |

(आरोहन् , वहनीयः, लब्धव्यः, आरभ्यः, उक्तवान् , वहमानः, आदिष्टवान् , प्रवेश्यः)

५)

| क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|
| | | | |
| | | | |

(लभमानः, आरभणीयः, वक्तव्यः, मोच्यः, प्रविष्टवान् , कथयितव्यः, वन्दमानः, लिखितः)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# सन्धिः

*** पूर्वपदं/उत्तरपदं लिखत ।**

१) निराशोऽहम् = ........+......... ।
२) ........... = भिन्नरुचिः+ हि ।
३) आत्मपुत्रावेकैकशः= ........+......... ।
४) ........... = हसन् + आह ।
५) तर्जयन्त्युवाच = ........+......... ।
६) ........... = कश्चित् + लक्षते ।
७) दर्शनाद्धर्षयति= ........+.......... ।
८) ............= कषायः+ तु ।
९) स्फुटयतीन्द्रियाणि= ........+......... ।
१०) ...........= वाद्या+ एषा ।
११) व्याधिरसून्= ........+......... ।
१२) ........... = सूत्रार्थौ+अन्तराले ।
१३) दत्तश्च= ........+......... ।
१४) ...........= राजधानी + आसीत् ।
१५) पशवश्च= ........+......... ।
१६) ...........= पितुः+ अहम् ।
१७) भवद्भिरस्य= ........+......... ।
१८) ..........= महती + इयम् ।
१९) अपगतासूंश्च= ........+......... ।
२०) ..........= जाबालिः+ नाम ।
२१) तद्ध= ........+......... ।
२२) ...........= तस्मात् + उ ।
२३) यद्देवेषु= ........+......... ।
२४) ...........= हि + एतद् ।
२५) स्मरेन्नित्यम् = ........+......... ।
२६) ...........= क्वचित् + रुष्टः ।
२७) अपकारांश्च= ........+......... ।
२८) ............= वपुः + आख्याति ।
२९) लोडयेच्च= ........+.......... ।
३०) ............= मज्जिका + इति ।
३१) वस्त्रगर्भाभिरन्याभिः= ........+......... ।
३२) .............= वासनार्थम् + तु ।
३३) अवतार्यात्र= ........+......... ।
३४) ............ = इति + अभिधीयते ।
३५) राजाभूत्= ........+......... ।
३६) ............ = तु + एतद् ।
३७) ततस्त्यक्त्वा= ........+......... ।
३८) ............= शिबिः + उवाच ।
३९) आरोपयन्नृपः= ........+......... ।
४०) ............. = शिबेः + अङ्कम् ।
४१) अन्यांस्तौ= ........+......... ।
४२) ........... = तौ + अन्तर्धानम् ।
४३) कर्मण्येव= ........+......... ।
४४) ............= अधिकारः + ते ।
४५) कर्मफलहेतुर्भूः= ........+......... ।
४६) ..............= श्रेष्ठः + तत् ।
४७) तदेव= ........+......... ।
४८) .......... = यथा + उल्बेन ।
४९) एतैर्विमोहयति= ........+......... ।
५०) ........... = विमोहयति + एषः ।
५१) बुद्धिरस्य= ........+......... ।
५२) ...........= कश्चित् + लक्षते ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अमरकोषः ।

| पङ्क्तिः | विग्रहः |
|---|---|
| १) **शीतम्–** शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जडः। | शीतम्, सुषीमः, शिशिरः, जडः । |
| २) **वपुः –** गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः। | गात्रम्, वपुः, संहननम्, शरीरम्, वर्ष्म, विग्रहः । |
| ३) **पक्षी –** शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः । | शकुन्तिः, पक्षी, शकुनिः, शकुन्तः, शकुनः, द्विजः। |
| ४) **प्रजापतिः–** स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः । | स्रष्टा, प्रजापतिः, वेधाः, विधाता, विश्वसृट्, विधिः । |
| ५) **वृत्तान्तः–** वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः। | वार्ता, प्रवृत्तिः, वृत्तान्तः, उदन्तः, आह्वयः । |
| ६) **मूढः–** अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः । | अज्ञः, मूढः, यथाजातः, मूर्खः, वैधेयः, बालिशः। |
| ७) **पुरुषः–** क्षेत्रज्ञः आत्मा पुरुषः । | क्षेत्रज्ञः, आत्मा, पुरुषः । |
| ८) **धूमः –** धूम्रधूमलौ कृष्णलोहिते । | धूम्रः, धूमलः, कृष्णलोहितः । |
| ९) **आदर्शः–** दर्पणे मुकुरादर्शौ । | दर्पणः, मुकुरः, आदर्शः । |
| १०) **वेतनम्–** भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि। | भरण्यम्, भरणम्, मूल्यम्, निर्वेशः । |
| ११) **याचना –** याञ्चाऽभिशस्तियाचनार्थना । | याञ्चा, अभिशस्तिः, याचना, अर्थना । |
| १२) **वृत्तिः–**आजीवोजीविकावार्ता वृत्तिर्वर्तनजीवने। | आजीवः, जीविका, वार्ता, वृत्तिः, वर्तनम्, जीवनम् । |
| १३) **पण्यम्–**विक्रयंपणितव्यंचपण्यंक्रय्यादयास्त्रिषु। | विक्रयम्, पणितव्यम्, पण्यम्, क्रय्यम् । |
| १४) **भृत्यः–** भृत्ये दासेरदासेयदासगोप्यकचेटकाः । | दासः, दासेरः, दासेयः, गोप्यकः, चेटकः । |
| १५) **स्वामी–** अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः। | अधिभूः, नायकः, नेता, प्रभुः, परिवृढः, अधिपः । |
| १६) **व्याघ्रः–** शार्दूलद्वीपिनौ व्याघ्रे । | शार्दूलः, द्वीपी, व्याघ्रः । |
| १७) **धूर्तः–** उन्मत्तः कितवो धूर्तो धत्तूरः कनकाह्वयः। | उन्मत्तः, कितवः, धूर्तः, धत्तूरः, कनकः । |
| १८) **रोगः –** स्त्री रुग्रुजा चोपतापरोगव्याधिगदामयाः। | रुक्, रुजा, उपतापः, व्याधिः, गदः, आमयः । |
| १९) **शकलम्–** भित्तं शकलखण्डे वा पुंस्यर्धोऽर्धं समेऽशके । | भित्तम्, शकलम्, खण्डम्, अर्धम् । |
| २०) **कण्ठः–** कण्ठो गलोऽथ ग्रीवायां शिरोधिः कंधरेत्यपि । | कण्ठः, गलः, ग्रीवा, शिरोधिः, कंधरा । |

***



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

षष्ठमण्डलम् ।

# सङ्कलितभाषाभ्यासः -६

१. नाम + सर्वनाम तालिकां पूरयत ।

| क्र. | नाम | प्रातिपदिकम् | अन्तम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| १) | भाषासु | .............. | आकारान्तः | स्त्रीलिङ्गम् | .............. | बहुवचनम् |
| २) | व्याधिः | व्याधि | .............. | ............. | प्रथमा | एकवचनम् |
| ३) | वक्ता | वक्तृ | .............. | पुंल्लिङ्गम् | प्रथमा | .............. |
| ४) | माम् | अस्मद् | सर्वनाम | ............. | द्वितीया | .............. |
| ५) | अस्मै | इदम् | सर्वनाम | पुंल्लिङ्गम् | .............. | .............. |

२. क्रियापदानां लकारैः सह मेलनं कुरुत ।

| क्रियापदः | लकारः |
|---|---|
| १) अगायत् | क) कर्मणि लट् |
| २) त्यक्ष्यति | ख) लोट् |
| ३) रक्षतु | ग) लट् |
| ४) भजते | घ) लिङ् |
| ५) अभिनयताम् | ङ) लङ् |
| ६) आरभ्यते | च) लृट् |

३. समासतालिकां पूरयत ।

| क्र. | सामासिकशब्दः | समासविग्रहः | समासनाम |
|---|---|---|---|
| १) | प्रतिसप्ताहम् | सप्ताहे सप्ताहे | .............. |
| २) | भिन्नरुचिः | ........................... | बहुव्रीहिः |
| ३) | .............. | न क्षतः | नञ् तत्पुरुषः |
| ४) | अक्षिभ्रुवम् | अक्षिणी च भ्रुवौ च एतेषां समाहारः । | .............. |
| ५) | .............. | जनेषु अनुकम्पा । | सप्तमी तत्पुरुषः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४. **तद्धित-तालिकां पूरयत ।**

१) आधुनिकः = .................... ।
२) माहात्म्यम् = .................... ।
३) .................... = वर्षे भवम् ।
४) .................... = मधुरस्य भावः ।
५) .................... = देहः अस्य अस्ति ।

५. **कृदन्तरूपाणि लिखत ।**

| क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|
| | | | |
| | | | |

(सार्यः, वदितव्यः, आदिष्टवान्, पीतः, वहन्/वहमानः)

६. **सन्धिः-पूर्वपदं/उत्तरपदं लिखत ।**

१) वस्त्रगर्भाभिरन्याभिः = ....................
२) .................... = परीक्ष्यान्यतरत् + भजन्ते ।
३) सङ्गोऽस्तु = .................... + .................... ।
४) .................... = शोषयति + अन्नम् ।
५) तुष्टावक्षतदेहम् = .................... + .................... ।

७. **सूचनानुसारं परिवर्तनं कुरुत ।**

१) स्म निष्कास्य वाक्यं पुनर्लिखत ।
चन्दमामा इति मासिकं बालकानां चेतांसि आकर्षयति स्म ।

२) लकारं परिवर्तयत ।
मनुजः अपकारान् विस्मरेत् । (लोट्लकारं प्रयुज्य वाक्यं पुनर्लिखत ।)

३) पूर्वकालवाचकं निष्कास्य वाक्यं पुनर्लिखत ।
किञ्चित् विचिन्त्य शिवदासः प्रतिप्रश्नं कृतवान् ।

४) सति-सप्तमी रचनां निष्कासयत ।
अध्यापके प्रविष्टे तूष्णीम् उपविशन्तु ।

५) वाच्यपरिवर्तनं कुरुत ।
वासुदेवः प्रयोजनं कथितवान् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### ८. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।

गोरखपुरस्य कारागारम् । 'काकोरी' प्रकरणसम्बन्धी कश्चन बन्धने स्थापितः । विचारणा प्रवृता । अन्ते न्यायाधीशः उक्तवान् – 'शूलारोपणेन दण्ड्यते एषः' इति । एतां वार्तां श्रुत्वा सर्वे खिन्नाः । किन्तु सः चिन्तितवान् – 'मातुः पदतले आत्मानं समर्पयितुं कश्चन अवसरः लब्धः' इति । अतः सः सन्तुष्टः । पुत्रस्य मरणदण्डनवार्तां श्रुत्वा माता धावन्ती आगतवती । मातरं दृष्ट्वा सः बहु रुदितवान् । माता पृष्टवती – 'भवान् धीरः राष्ट्रभक्तः इति ख्यातः । परन्तु मरणात् भीतः इव लक्ष्यते इदानीम् । एवं चेत् किमर्थम् एषः मार्गः आश्रयणीयः आसीत् भवता ?' तदा सः उक्तवान् – 'अहं मरणात् भीतः न । सिंहस्य उदरे सिंहः एव उत्पद्यते, न तु शृगालः । मातृवात्सल्यात् वञ्चितः भवामि खलु इति दुःखम् अम्ब !'

शूलारोपणदिने प्रातः उत्थाय सः भगवद्गीतां पठितवान् । योगासनं पूजां च कृतवान् । एतद् दृष्ट्वा अधिकारी पृष्टवान् – ''किमर्थम् एतद् सर्वं करोति भवान् ?'' इति । ''भारतीयानां पुनर्जन्मनि विश्वासः । एतस्य जन्मनः फलम् अग्रिमजन्मनि प्राप्स्यामः । कष्टकरं कार्यं कर्तुम् उत्तमं शरीरम् आवश्यकं खलु ? अतः योगासनं करोमि'', इति उक्तवान् सः तरुणः । एषः अप्रतिमः राष्ट्रभक्तः एव । देशाय आत्मानं समर्प्य प्रेरणादायकः जातः सः ।

अ. पूर्णवाक्येन उत्तरत ।
शूलारोपणदिने राष्ट्रभक्तः कां पठितवान् ?

आ. अधोरेखितशब्दस्य कृते प्रश्ननिर्माणं कुरुत ।
<u>भारतीयानां</u> पुनर्जन्मनि विश्वासः ।

इ. लकारं लिखत ।
प्राप्स्यामः।

ई. प्रातिपदिकं लिखत ।
वार्ताम्, सः

उ. अनुवादं कुरुत ।
पुत्रस्य मरणदण्डनवार्तां श्रुत्वा माता धावन्ती आगतवती ।

ऊ. एकम् अव्ययं चित्वा लिखत ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(प्रतिदर्श-वार्तापत्रम्)

# आह्लादपत्रिका ।

(संस्कृतवार्षिकम्)

सम्पादकमण्डलम्- संस्कृत-अभ्यासमण्डलम् प्रकाशनवर्षम् - २०१८-१९

## अग्रलेखः ।

### (सम्पादकीयम्)

### वर्धेत संस्कृतलेखनकार्यम् ।

अद्य पत्रकारितादिनम् । एतस्मिन् दिने बहवः विचारतरङ्गाः मनसि सञ्जाताः। यतः विंशतितमशतकस्य पूर्वार्धे तादृशः एव व्यवहारः प्रायः दृश्यते स्म यत् संस्कृतभाषायां समकालिकसाहित्यस्य अभावात् संस्कृतवृत्तपत्रसम्पादकाः अन्यभाषासाहित्यं शरणं गच्छन्ति स्म । अन्यभाषाभिः लिखितं विविधसाहित्यं संस्कृतेन अनूद्य स्वनियतकालिकेषु पत्रिकासु च प्रकाशयन्ति स्म । यतः बहुषु संस्कृतज्ञेषु महान् ज्ञानसङ्ग्रहः आसीत् । तथापि तेषु समकालिक-लेखनस्य प्रवृत्तिः विरला आसीत् । केचन लेखने प्रवृत्ताः आसन् तथापि तेषां लेखने सरलता सुबोधता च नासीत् ।

परं सन्तोषस्य विषयः विंशतितमशतकस्य उत्तरार्धात् कालः परिवृत्तः। इदानीं संस्कृतभाषया समकालिकसाहित्यं विपुलतया निर्मीयमाणमस्ति । साहित्येऽस्मिन् सरलता सुबोधता मनोहारिता च विराजते । अग्रेऽपि अधिकाधिकाः संस्कृतज्ञाः सरलस्य सरसस्य च आधुनिकसाहित्यस्य निर्माणे प्रयत्नरताः भवेयुः, अन्यभाषापत्रिकाः अपि तत् साहित्यम् अनूद्य प्रकाशयितुम् उत्सुकाः भवेयुः इति वयम् आशास्महे ।

## विश्वसंस्कृतसम्मेलनस्य उद्घाटनम् ।



**व्हॅनकॉवर-कॅनडा (दि.९जुलै२०१८)** - ९जुलैतः १३ जुलै २०१८ पर्यन्तम् आयोजितस्य विश्वसंस्कृतसम्मेलनस्य उद्घाटनं भारतस्य मानवसंसाधनविकासमन्त्री श्रीमान् प्रकाशजावडेकरमहोदयः कृतवान् । एशियन स्टडीज् इति संस्थया एतत् सम्मेलनम् आयोजितम् । ४० देशतः ५०० संस्कृतप्रेमिणः अस्मिन् सम्मेलने सहभागिनः । वेद-उपनिषद्-शास्त्र-दर्शन-कलादयः विषयाः अत्र चर्चिताः।

## संस्कृतं स्वीकृत्य आय. ए. एस. परीक्षा उत्तीर्णा ।

(दि.४.९.२०१९) (नवदेहली)- अचिरादेव केन्द्रीयलोकसेवा-आयोगस्य आय. ए. एस. परीक्षायाः परिणामः उद्घोषितः। आनन्दस्य वार्ता यत् श्रीमान् आदित्यझामहाभागः संस्कृतविषयं स्वीकृत्य देशे प्रथमक्रमाङ्कं प्राप्तवान् । बी. ए. परीक्षायां तेन संस्कृतविषयः मुख्यरूपेण अधीतः। संस्कृतेन एव मम व्यक्तित्वं विकसितम् इति प्रतिपादितम् आदित्येन। यु. ट्युब इति सामाजिक - वाहिन्यां तस्य साक्षात्कारः नैकैः अधुना दृष्टः ।

## अन्तरिक्षक्षेत्रे इस्रो द्वारा नूतनायामः प्रस्थापितः ।



(दि.१६.९.२०१८) (श्रीहरिकोटा) - अत्रस्थे सतीश धवन अन्तरिक्षकेन्द्रे इस्रो (भारतीय अन्तरिक्षसंशोधनसंस्था) इति अनेन P S LV-C-42 एतस्य भारतीय-उपग्रहप्रेक्षपकस्य यशस्वि प्रक्षेपणं कृतम्। भारतीयशास्त्रज्ञानाम् अविरतश्रमस्य एव फलम् एतद् । एषः सम्पूर्णतया व्यावसायिक-वाणिज्यिककार्यक्रमः अस्ति। U. K. देशस्य S. S. T. L. उपग्रहद्वयम् एतेन यानेन अन्तरिक्षे प्रक्षेपितम्। राष्ट्रपतिः प्रधानमन्त्री च शास्त्रज्ञानां तथा देशवासिनां अभिनन्दनं कृतवन्तौ ।

## जाह्नवी-संस्कृत-ई-पत्रिकायाः विमोचनम् ।

(दि.१५.८.२०१८) (अमरावती) आधुनिकविज्ञानं-प्राचीनसंस्कृतम् एतयोः संयोगीकरणमावश्यकम् इति प्रतिपादितम् अतिरिक्तजिल्लाधिकारिणा दुर्गानन्देन । जाह्नवी इति ई-पत्रिकायाः विमोचनसमये तेन उक्तम् । संस्कृते निहितशास्त्रस्य आधुनिकविज्ञानकालेऽपि उपयोगिता सिद्धा । शास्त्रस्य अस्य प्रमाणीकरणम् अन्तर्जालमाध्यमेन सम्भवेत् इति अपि उक्तं महोदयेन । अस्याः पत्रिकायाः अन्तर्जालसूत्रम्- jahnaveesanskritdaily.in


## व्यङ्ग्यचित्रम्




## संस्कृतशिष्यवृत्तेः कृते आवेदनस्य आवाहनम् ।

(दि.१.७.२०१८) (नवदेहली)-

राष्ट्रियसंस्कृतसंस्थानद्वारा प्रतिवर्षं संस्कृतच्छात्रेभ्यः शिष्यवृत्तिः दीयते । तस्य सद्यस्कं पञ्जीकरणम् (Online Registration)आरब्धम्।शैक्षणिकसंस्थाभिः संस्थानस्य सङ्केतस्थले पञ्जीकरणं क्रियताम् इति आवाहनं संस्थानस्य कुलपतिना कृतम्। संस्थापञ्जीकरणानन्तरं छात्राः पञ्जीकरणं कर्तुं शक्नुवन्ति।



## आरोग्यम् ।

**भोजनान्ते पिबेत् तक्रं दिनान्ते च पिबेत् पयः। निशान्ते च पिबेत् वारि किं वैद्यस्य प्रयोजनम्।।**

☞ यदि भोजनान्तरं तक्रं, रात्रौ शयनपूर्वं दुग्धं तथैव प्रातःकाले जलं पीयते तर्हि कदापि वैद्यस्य आवश्यकता न भवेत् ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## खेलाङ्गणम्

### एशियाक्रीडास्पर्धायां संस्कृतज्ञः दीपककुमारः रजतपदकविजेता ।

(दि.१.९.२०१८) (जकार्ता)-



(एशियाक्रीडास्पर्धाजकार्ता-इण्डोनेशिया) श्रीमान् दीपककुमारः आर्यः एशियाक्रीडास्पर्धायां लक्ष्यवेध-क्रीडायां रजतपदकं प्राप्तवान्। दयानन्द-आर्य-गुरुकुले सः प्रारम्भिकं विद्यार्जनं कृतवान् तथैव अनुशासनेन लक्ष्यवेधसाधनां कृतवान्। शस्त्रशास्त्रविद्याप्रदायिनी परम्परा गुरुकुले अद्य अपि विद्यते इति अनेन सिद्धम्।

भारतीयवायुसेनायां सेवारतः एषः महाभागः भारतराष्ट्रं गौरवान्वितवान्। एषः दीपकवर्यः संस्कृतज्ञः अपि अस्ति। संस्कृतभाषया मयि संस्काराः कृताः इति अपि सः वदति। संस्कृतव्याकरणम् अवश्यं पठनीयम् इति तस्य मतम्।

## कलाङ्गणम्




### शार्ङ्गदेवनृत्यमहोत्सवः सम्पन्नः ।

दि. १६.११.२०१८ (औरङ्गाबादनगरम्) सुप्रसिद्धनृत्यगुरुपार्वतीदत्तामहाभागायाः नृत्याविष्कारेण शार्ङ्गदेवनृत्यमहोत्सवस्य समापनम् अभवत्। महागामिगुरुकुले आयोजितः एषः महोत्सवः। मेघदूतं तथैव ऋतुसंहारम् इति द्वे कलाकृती अत्र प्रस्तुते। उडीसी तथा कथक एतयोः नृत्यप्रकारयोः नवरसपूर्णाविष्काराः महोत्सवे प्रस्तुतीकृताः। विश्वविद्यालयस्य संस्कृतविभागाध्यक्षा डॉ. क्रान्ती प्रमुखातिथिरूपेण उपस्थिता। कार्यक्रमदर्शनेन बहवः कलारसिकाः सन्तुष्टाः।

## युवविश्वम् चित्रपटवृत्तम्

### मराठीचित्रपटे संस्कृतगीतम् ।





वायझेड (YZ) नाम्नि मराठीचित्रपटे "प्रियकर: प्रियकरौ" इति संस्कृतगीतम् अधुना लोकप्रियतां गतम्। युवकाः एतद् गीतं श्रुत्वा आनन्दन्ति। केतकी माटेगावकर एषा सुप्रसिद्धा गायिका, अभिनेत्री एतद् गीतं गीतवती।

## संस्कृतलघुपटः प्रदर्शितः,

### "शिवाजि-महाराजः-द ग्रेटेस्ट ।"

छत्रपतिश्रीशिवाजीमहाराजस्य जीवनपटम् अनुलक्ष्य विश्वेऽस्मिन् प्रथमः लघुपटः प्रदर्शितः अस्ति श्रीशिवाजि-ज्ञानपीठ (इण्टरनॅशनल) इत्यनया संस्थया । 'शिवाजी महाराज द ग्रेटेस्ट' इति पुस्तकाश्रितः वर्तते लघुपटोऽयम्। पुस्तकमिदं लिखितमस्ति अस्याः संस्थायाः संचालकेन डॉ. हेमन्तराजे गायकवाडमहोदयेन । अस्मिन् पुस्तके महाध्ययनेन सप्रमाणं प्रतिपादितमस्ति यत् विश्वेऽस्मिन् ये दश योद्धारः प्रसिद्धाः श्रेष्ठाः सम्मानिताश्च तेषु सर्वेषु शिवाजिमहाराजस्य स्थानम् अग्रिमतमम्। लघुपटोऽयं त्रिभागेषु विभक्तः । प्रथमे भागे- अलक्षेन्द्रतः नेपोलिअनपर्यन्तं ये सर्वोत्तमाः दश योद्धारः सन्ति, तेषां कार्यं वर्णितम्। द्वितीये भागे- एषां दशयोद्धॄणां शिवराजेन सह तुलना विद्यते । तृतीयभागे- शिवराजस्य चतुर्दशकार्यविशेषाः प्रदर्शिताः ।

महोदयः लेखनकार्यार्थं २०१५ तमे वर्षे भारतस्य तत्कालीन-राष्ट्रपति-प्रतिभाताई पाटीलमहोदयया पुरस्कृतः गौरवान्वितश्च। पुस्तकलेखनानन्तरं शिवाजिमहाराजस्य कार्यं जनसामान्यैः ज्ञातव्यमेव इत्यर्थं महोदयेन किरण कुलकर्णीमहोदयस्य साहाय्येन मराठी-आङ्ग्ल-कन्नड-बांग्ला-हिन्दी-संस्कृतादिषु भाषासु लघुपटोऽपि निर्मितोऽस्ति । तमिळ - मल्ल्याळम् - जर्मन- फ्रेञ्च - उर्दू - गुजराथी - आदिषु भाषासु लघुपटस्य निर्माणं प्रचलति । मराठीभाषया लिखितस्य लघुपटस्य संस्कृतभाषया भावानुवादः कृतोऽस्ति श्रीहरि गोकर्णकरमहोदयेन । नैके विद्वज्जनाः कार्यपूर्तये साहायकाः । सर्वैः छात्रैः शिक्षकैश्च पठनीयमिदं पुस्तकं तथैव द्रष्टव्यः लघुपटोऽयं, तेन ज्ञातव्यं च छत्रपतिशिवाजिमहाराजस्य अभूतपूर्वं कार्यम् ।

hemantgaikwads@gmail.com

## महाविद्यालयवार्ता ।

### शासकीयमहाविद्यालये संस्कृतस्पर्धाः सम्पन्नाः ।

दि.१५/०९/१८ (नागपुरम्)

शासकीयमहाविद्यालये संस्कृतस्पर्धानाम् आयोजनम् अभवत्। संस्कृतदिनोत्सवनिमित्तेन एताः स्पर्धाः आयोजिताः। नगरस्थाः विविधमहाविद्यालयाः सहभागिनः आसन् । अत्र प्रश्नमञ्जूषा, गीतगायनम्, कथाकथनम्, नाट्याभिनयः एतेषाम् अन्तर्भावः आसीत्। महाविद्यालयस्य प्राचार्या कार्यक्रमस्य उद्घाटनं कृतवती। 'संस्कृतभाषा अस्माकं संस्कृतेः पोषिणी' इति गौरवेण सा उक्तवती। महाविद्यालयस्य संस्कृतविभागप्रमुखा श्रीमती पङ्कजा महोदया, प्राध्यापकवृन्दः छात्राः च भूरिश्रमं कृतवन्तः । अस्मिन् समये संस्कृतविज्ञानप्रदर्शनी वस्तुप्रदर्शनी च आयोजिता ।

## विज्ञापनम्

### संस्कृतसम्भाषणशिबिरम् ।

(महाविद्यालयीनच्छात्राणां कृते विशेषेण आयोजितम् ।)

दशदिनात्मकः अनिवासिवर्गः

दि.१ तः १० जुलै २०१९

**समयः-** सायं ५.०० वादनतः ७ वादनपर्यन्तम् ।

वर्गः निःशुल्कः अस्ति । , **स्थानम्-** गीताभवनम्, परभणी

**सम्पर्कः-** कु. तन्वी १२३४५६७८९०,

कु. गौरी ०९८७६५४३२१

**सदाचारेण सर्वेषां शुद्धं भवति मानसम् ।**
**निर्मलं च विशुद्धं च मानसं देवमन्दिरम् ॥**

## स्वच्छभारत-अभियान-जागृति-सप्ताहः ।



**दि.२ तः ८ ऑक्टोम्बर २०१९**

जनपदविद्यालये 'स्वच्छभारत-अभियान-जागृति' सप्ताहे घोषवाक्यस्पर्धा, वीथिस्वच्छतास्पर्धा, प्राङ्गणस्वच्छतास्पर्धा, चित्रकलास्पर्धा आदयः विविधाः स्पर्धाः आयोजिताः आसन्। तासु चित्रकलास्पर्धायाम् एकया छात्रया आरेखितं चित्रम्।

## लट्लकाराधारिता भाषाक्रीडा

**स्तम्भः । (उपरिष्टाद् अधः)**

२. तृ-तर् (१ प.प.) प्रथमपुरुषः, एकवचनम् ।
३. हृष् (४ प.प.) मध्यमपुरुषः, बहुवचनम्।
४. सम् + मिल् (१ प.प.) प्रथमपुरुषः, बहुवचनम्।
६. धाव् (१ प.प.) मध्यमपुरुषः, एकवचनम् ।
८. दा यच्छ् (१ प.प.) उत्तमपुरुषः, बहुवचनम्।
९. लभ् (१ आ.प.) प्रथमपुरुषः, बहुवचनम्।

| | | | | | | |
|---|---|---|---|---|---|---|
| १ | २ | | | | ३ | |
| | | | ४ | | | |
| | ५ | | | | | |
| ६ | | | | | | |
| ७ | | ८ | | | ९ | |
| | | | | १० | | |
| | ११ | | | | | |

**आवलिः । (वामतः दक्षिणम्)**

१. पत् (१ प.प.) प्रथमपुरुषः, द्विवचनम् ।
४. सम् + तुष् (४ प.प.) मध्यमपुरुषः, द्विवचनम् ।
५. स्था (१ प.प.) उत्तमपुरुषः, एकवचनम्।
७. वर्ण् (१० उ.प. अत्र प.प.) प्रथमपुरुषः, बहुवचनम्।
१०. शुभ् (१ आ.प.) प्रथमपुरुषः, एकवचनम् ।
११. या (२ प.प.) उत्तमपुरुषः, बहुवचनम्।

(संस्कृतविश्वसौजन्येन)

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# माहेश्वरसूत्राणि



अइउण्। ऋलृक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्।

महाराष्ट्रराज्य-पाठ्यपुस्तक-निर्मितिः तथा अभ्यासक्रम-संशोधन-मण्डलम्, पुणे.

संस्कृत आल्हाद, इयत्ता अकरावी

मूल्यम्- ₹ 99.00

Downloaded from https:// www.studiestoday.com